बिडि आक्रोशे। सौत्रो धातुः। बिडति। आक्रोशयत्यात्मनं बिडालः। अंत भावितण्यर्थः। मृ
ण हिंसायां। तौ। प। मृणाति नाशं। मृणालं। कुल संस्त्याने। भ्वा। प। कोलति।
भो ऽसंघातं करोति कुलालः। कपि चलने। भ्वा। आ। कंपते ऽस्मिन् प्रहृते कपालं। अधिक २५
रणे। कपालो स्त्री शिरो ऽस्थि स्यादिति मेदिनी। पल गतौ। भ्वा। प। पलति पलालं। पचि
विस्तारवचने। चौ। पंचयंति विस्तृता भवंति पंचालाः। देशाः। पतेः। पत्लृ गतौ।
भ्वा। प। पतति गच्छति पतंगः। पक्षी। पक्षिणि। नरत्यादिभ्यः। तॄ प्लवनतरणयोः। भ्वा। तरति
रंगः। स्तृञ् छेदने। क्र्या। [illegible] ऋणाति पीडयति कटुत्वात् रसनेंद्रियं। लवंगः। बिडादिभ्यः। बिड ३८
आक्रोशे सौत्रः। बिडति हिनस्ति क्रिमीन् बिडंगः। बिडंगः क्रिमिसंघ्न इति विश्वः। मृद क्षोदे।

(left margin: तिर्देशान्न लोप०।५)

क्र्या। प। मृद्यते। पीड्यते मृदंगः। कर्मणि। कृ विक्षेपे। तु। किरति कुरंगः। सृगेः। सृ गतौ।
जु। धावति। सारंगः। हरिणः। शृञ् वरणे। स्वा। शृणोति। वा रंगः। गम्यादेः। गम्लृ गतौ। भ्वा।
प। गच्छति गंगा। अद भक्षणे। अ। प। अद्यते। अद्गः। छापः। छो छेदने। दै। छायते वा शिकैः। छागः।
पूङ् पवने। भ्वा। पवते मुखं पूगः। क्रमुकः। पवते। पूगः। संघातः। खड भेदने। चौ। चुरादिभ्य ए
व बहुलं णिजित्युक्ते णिजभावपक्षे। खडति। खड्गः। बाहुलकादिति। षिट अनादरे। भ्वा।
प। सेट्यते न आद्रियते। षिङ्गस्तरलः। कर्मणि। भृञः। डुभृञ् धारणपोषणयोः। जौ। बिभर्ति
भ्रमणे भृंगः। शृणातेः। शृ हिंसायां। क्र्या। शृणात्यनेन शृंगं। करणे। गणेश कुमार्यां। शृणाति (left margin: विषाणे)
पध्वादि। शार्ङ्गः। पक्षी। मुदिग्रोः। मुद हर्षे। भ्वा। आ। मोदते ऽनेन मुद्गः। करणे। गॄ निगरणे।
तौ। गिरति। नाशयति दुःखं। गर्गः। ऋषिविशेषः। अंडन्कृसृ। डुकृञ् करणे। ता। क्रियते ऽ
स्मिन् नानाद्रव्याणि करंडः। (अधिकरणे) सृ गतौ। भ्वा। सरति सरंडः पक्षी। भृञ् भरणे। भ्वा। भरति भरंडः स्वामी।

शृ स्वरणे। शौ। शृणोति। सुखं। वरंडः। मुखरोगः। शृह। शृ हिंसायां। क्रै। शीर्यते ऽस्यां तृण गुल्म
वनस्पतीनां तेजांसि। शरत्। स्तृतुः। वर्षं च। अधिकरणे। शरत् स्त्री वत्सरे ऽप्यृतौ। इति मेदिनी।
दृ विदारणे। क्रै। दीर्यते नयेन। दरत्। हृदयं। दीर्यते नद्यादिना। दरत्। कूलं। दीर्यते ऽस्माद् दरत्।
पर्वतः। कर्मणि हृणाति पीड्यति। दरत्। भयोः कर्त्री दरणं प्रपतनं दरत्। भावे प्रत्ययः।
दरत् स्त्रियां प्रपाते च भय पर्वतयोरपि इति मेदिनी। भस भर्त्सन दीप्त्योः। जौ। पा। बभ
स्ति। दीप्यते। भसत्। भसत् स्त्री भास्वरे योनाविति मेदिनी। दृणातेः। दृ विदारणे। क्रै। दीर्यते ३६
७ अधिकरणे स्यां। दृषत्। निष्पेषण शिला। दृणाति। दृषत्। प्रस्तरपट्टः। कस्मी दृषन्निष्पेषण शिला
पट्ट प्रस्तरयोः स्त्रियां इति मेदिनी। त्यजतनि। त्यज हानौ। भौ। पा। त्यजति। त्यद्। तनु वि
स्तारे। ता। उ। ०। तनोति। तद्। यज देवपूजादौ। भौ। उ। यजति। यद्। एतेः। इण् गतौ। आ। पा। ३५
एति। एतद्। त्यदादिषु तदंतेषु व्युत्पत्ति मात्रं न तु तदर्थविगमः। सर्तेः। सृ गतौ। भौ।
सरति। सरद्। लंघेः। लघि गतौ। भौ। आ। लंघते। लघद्। पारयतेः। पार तीर कर्मसमा सौ।

यौ। अरंतः। पारयति। पारत्। सुवर्णं। प्रथः। प्रथ प्रख्याने। भौ। आ। प्रथते। पृथक्। भियः।
ञि भी भये। जौ। बिभेति रोगो ऽस्मात्। भिषक्। अपादाने। युष सेवायां। युषू सौ व ग
अस्तु क्षेपणे। दै। पा। योषति। युष्मद्। अस्यति। अस्मद्। त्वं। अहं। युष्मदादौ व्युत्पत्ति
मात्रं न तु तदर्थविगमः। अर्तिस्तु सु। ऋ गतौ। भौ। ऋच्छति। यच्छः प्राप्नोति। अर्भः। ष्टुञ्
स्तुतौ। आ। उ। स्तौति। समुदितो भवति। स्तोमः। षुञ् अभिषवे। सौ। सुनोति। अमृतेन
ओषधीः स्नपयति। सोमः। चंद्रः। हु दानादनयोः। जौ। हवनं। होमः। देवतोद्देशेन हविः
प्रक्षेपः। भावे प्रत्ययः। सृ गतौ। भौ। सरणं सर्गः। गमनं। भावे प्रत्ययः। धृञ् धारणे। भौ।
धरति। धर्मः। क्षि निवासगत्योः। तौ। क्षियति। निवसत्यनेन। क्षेमं। कुशलं। करणे। टुक्षु
शब्दे। आ। पा। क्षौति। शब्दं करोति। क्षौमं पट्टकूलं। भा दीप्तौ। आ। पा। भाति। भामः। या [illegible] गतौ
[illegible]। आ। पा। याति। गच्छति। यामः। प्रहरः। वा गतिगंधनयोः। आ। पा। वायते। गम्यते। वामः। शो
भनः। वा कर्मी वायते। पलायते ऽस्मात्। वामः। दुष्टः। अपादाने। पद गतौ। दै। आ। पद्यते प्राप्य

नो।भ्रमरः।षट्पदः।कमीय कम्प्रगायां।चौ।आत्मनेपदी।यद्यते स्यते।मांसादि निश्चयस्मः।रोगः।
प्रापयति२ कर्मणि।णी प्रापणे।भौ।नयति दुःखं नेमः।कीलः।जर्मः।केनत्वंच।नयति सुखं नेमः।प्रा
कारः।नयति।प्राप्नोति नेमः।अवधिः।नयति विभागं प्राप्नोति नेमः।अर्द्धः।नेमः
कीलेऽवधौ गर्त्ते प्राकारे कैतवेपि येति।मेदिनी।नेमस्त्वर्द्धे इति हैमः।यं५ः।जहातेः।ओ
हाक् त्यागे।जौ।जहाति ऋजुत्वं।जिह्मः कुटिलः।जहाति सन्मार्गं।जिह्मः।मूर्खः।अव तेः। ३७
अवर रक्षणादौ।भौ।प।अवतीति।ऊमः।यस्तन स्त्विनि।स्वरादीनां सत्वार्थत्वस्य नियमो ना
स्ति।कश्चित्सत्वार्थः कश्चिदसत्वार्थत्वं च वर्त्तते।तेनात्र सत्वार्थतेति भावः।ग्रसेराच्च
ग्रसु अदने।भौ।आ।ग्रसंतेऽस्मिन् जनाः ग्रामः।अधिकरणे।ग्रस्यते लुंठ्यते जनै
रिति वा।ग्रामः।कर्म।नगर विपरीतो देशः।अविसिवि।अवति।ऊमं।नगरं।अव
रक्षणादौ।भौ।प।कर्मणि।षिवु तंतुसंताने।दै।प।सीव्यति।सूत्रं तंतुवत् प्रसरति।स्यूमः।रश्मिः। ३८
षिञ् बंधने।स्वौ।सिनोति।सिमः।सर्वः।सर्वनामगणे पठितः।इह स्थूलत्विमात्रो न तु तद्धि
गमः।शुष शोषणे।दै।प।शुष्यति शुष्को भवत्यनेन शुष्मं।अग्निः।करणे।शुष्यति।धातू

नामनेकार्थत्वात् निकरवर्त्तिनि वर्त्तते।शुष्मं।समीपं।इषियुधीन्धि।इष गतिहिंसादर्शनेषु।
भौ।आ।इषगतौ।दै।प।इष्यति।प्राप्नोति।इध्मः कामवसंतयोः।ईषते।इध्मः कामो वसंत
श्च।युध संप्रहारे।दै।आ।युध्यते।युध्मः।योद्धा।कर्म।युध्यते प्रहरति अनेन।युध्मः।शरः।
करणे।ञिइंधी दीप्तौ।रौ।आ।इंधते।दीप्तिमान् क्रियतेऽग्निरनेन।इध्मः।समित्।करणे।
अंतर्भावितण्यर्थः।दसु उपक्षये।दै।प।दस्यति।णिपं क्षीणं करोति।दस्मो यजमानः।अं
तर्भावितण्यर्थः।श्यैङ् गतौ।भौ।श्यायते।प्राप्यते चक्षुर्मनोभिरिति।श्यामः कृष्णवर्णः।
कर्म।धूञ् कंपने।स्वौ।धूयते।कंप्यते।वायुनेति धूमः।कर्म।षूङ् प्राणिप्रसवे।आ।सूते
पंचमहाभूतांतर्गतत्वात् उत्पादयति।सूमः।अंतरिक्षं।आकाशमिति यावत्।नभोंतरि
क्षं गगनमनंतं सुरवर्त्म खं।वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी इत्यमरः।
दिति।ईङ् गतौ कंपने च।ईते।कंपयति ईर्मं व्रणः।अंतर्भावितण्यर्थः।युजिरुचि।युजिर् योगे। बाहुलका
रौ।उ।युनक्ति।योगं प्राप्नोति।युग्मं।रुच दीप्तौ।भौ।आ।रोचते।रुक्मं।तिज निशाने।चौ।

सुरादिभ्य एव बहुलं णि जित्युक्ते णिजभावपक्षे। तेजति। तीक्ष्णं भवति। तिग्मं। युजादिभ्यो मक्
कवर्गश्चान्तादेशः। हन्तेः। हन् हिंसागत्योः। आ० प० हन्ति। हिमं। भियः। ञिभी भये। जौ० प०
बिभेत्यस्मात् भीमं। भीष्मः। अपादाने। घर्मः। घृ क्षरणदीप्त्योः। जौ० जिघर्ति दीप्यते। घर्मः।
आतपः। जिघर्ति। अस्मिन् स्तूर्यः। घर्मः। ग्रीष्मः। अधिकरणे। जिघर्ति तप्तो भवत्यनेन घर्मः।
उष्ठः। जिघर्ति करति घर्मः स्वेदाम्भः। घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि। इति मे ३८
दिनी। ग्रीष्मः। ग्रसु अदने। भ्वा० आ०। अस्योपधाया ईत्वं षश्चान्तादेशः। ग्रसते जगत्स्ते ग्र इति
ग्रीष्मः। प्रथेः। प्रथ प्रख्याने। भ्वा० आ०। प्रथते। विस्तीर्णा भवति। पृथिवी। पृथ्वी पृथिवी पृथ्वी धरा
सर्वंसहा रसेति शाश्वतः। अशूप्रुषि। अशूङ् व्याप्तौ। जौ० आ० अश्नुतेऽध्वानं अश्वः। प्रुष स्ने
हनसेवनपूरणेषु। क्रै० प०। प्रुष्यते। सेव्यते जनैः। प्रुष्वः। ऋतुः सूर्यश्च। प्रुष्वात्यनया स्निह्यत्य
नया। प्रुष्वा। जलकणिका। करणे। लट बाल्ये। भ्वौ० प० लटति। लट्वा। पक्षिभेदः। प्राकृतभाषा ३९
यां लट्वा पक्षिणः हरियलिति नामधेयं। कण निमीलने। ~~भ्वौ~~ चौ। ~~[illegible]~~ सुरादिभ्य एव

बहुलं णिच्। कणति। णिजभावपक्षे। कणति। संकोचं प्राप्नोतीत्यनेन कण्वं। पापं। करणे। खट
काङ्क्षायां। भ्वौ० प०। खट्यते। इष्यते शयनार्थिभिः खट्वा। पर्यंकः। कर्म। विश प्रवेशने। तौ० प०
विशत्यस्मिन् विश्वं जगत्। अधिकरणे। इण्शीभ्यां। इण् गतौ। आ० प० एति। गच्छति। ए
वो गन्ता। असत्त्वे इति। असत्त्वे एव शब्दो निपातः। निपातत्वात् अव्ययत्वेन लिंगविभक्त्या
द्यभावः। निपातो य एव शब्दस्तत्र व्युत्पत्तिमात्रं न तु तदर्थावगमः। शीङ् स्वप्ने। अ० आ०
शेतेऽनेन शेवं। सुखं। अधिकरणे। सर्वनिघृष्व। सृ गतौ। भ्वौ० प०। घृषु संघर्षे। भ्वौ०
प०। रिष हिंसायां। भ्वौ० प०। रिष्यते राज्ञभिरिति रिष्वः। हिंस्रः। कर्म। लष कां
क्षौ। भ्वौ० उ०। लष्यते इष्यते राजादिभिः। लष्वो नर्तकः। कर्म॥ शीङ् स्वप्ने। अ॥
पट गतौ। भ्वौ० प०। पटत्यनेनेति पड्वो रथः। करणं। पटति अस्मिन् पड्वः। अ
ल्पोकः। अधिकरणं। ह्वेञ् स्पर्धायां शब्दे च। भ्वौ० प्रह्वयते आकार्यते सा ह्व इति
प्रह्वः। ओहाक् त्यागे। जौ० प० प्रहीयते गर्वेणेति प्रह्वः। कर्म। स्रू ईषगसादे।

कौ० उणादि
टीका

उ०प्र०१

भौ॰ आ॰ इष गतौ। दै॰ वा॰ प॰ ईष्यते प्राप्यते इति ईषुः आचार्यः। वा इष्यते इषुः आचा
हृ२ र्यः। कर्म। बाहुलकात् [illegible] स शब्दो। भौ॰ प॰ हस्यते आकार्यतेऽनेनेति हसुः। कर्म।
शेवयह्व। एते वन्प्रत्ययांता निपात्यंते। शीङ् स्वप्ने। आ॰ शेते इति शेवः। अजगरः।
यापापरणे। आ॰ पा॰ याति सुखमनेनेति यह्वो महान्। वैदिकं निघंटौ महन्नामसु पठि ४ यह्वशब्दे
तम्। लिह आस्वादने। आ॰ उ॰ गृ निगरणे। तौ॰ प॰ आ॰ प्र॰ व्या॰ हो॰ सो॰ प॰ मीञ् हिंसा २५
यां। हे मीयत इति मीवा उदरक्रिमिः। वायुरित्यन्ये। कर्त्ता। तम। दृ विक्षेपे। तौ॰ किर
ति। चित्तविक्षेपं करोति। कर्वः कामः आखुश्च। गृ निगरणे। तौ॰ गिरति चित्तं। गर्वोऽहंका
रः। शृ हिंसायां। क्रै॰ शृणाति प्रलयकाले संहरति। शर्वः। दृ विदारणे। क्रै॰ दृणाति। दर्वो राक्ष
सः। कनिन्युवृषि। यु मिश्रणे अमिश्रणे च। आ॰ प॰ यौति। स्त्रिया सह मिश्री भवति। युवा। वृ ३८
षु सेचने। भौ॰ प॰ वर्षति। वर्षयति। वृषा इंद्रः। अंतर्भावितण्यर्थः। तक्ष तनूकरणे। भौ॰ प॰
तक्षति। तक्षा। तक्षा तु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतडित्यमरः। राजृ दीप्तौ। भौ॰ [illegible] राजते।

राजा। धन्व गत्यर्थः। भौ॰ प॰ धन्वति पलायंतेऽस्मात् जनाः। धन्वा मरुः। अपादाने। धन्वा शरासनं।
द्यु अभिगमने। आ॰ प॰ द्यौति। गच्छति। द्युवा सूर्यः। दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुति
मोदमदस्वप्नकांतिगतिषु। दै॰ प॰ प्रतिदीव्यति। व्यवहारं करोत्यस्मिन् जनः प्रतिदिवा। दिवसः। अधिकरणे।
सपष्ट्यौ। षप समवाये। भौ॰ प॰ सपति। संधीभवंति। सप्त। अष्टयासौ। सौ॰ आ॰ अश्नु[illegible]वते।
धातूनामनेकार्थत्वात् समुदिता भवंति। अष्ट। नञि जहातेः। ओहाक् त्यागे। जौ॰ प॰ न जहाति
प्रकाशमिति। अहः। दिवसः। श्वन्नुक्षन्। एते कनिप्रत्ययांता निपात्यंते। अयं प्रत्ययो निर्द्देति
भावः। टुओश्वि गतिवृद्ध्योः। भौ॰ प॰ उक्ष सेचने। भौ॰ प॰ उक्षति। उक्षा। पृष सेके। भौ॰ प॰ पृषति
पृषा सूर्यः। प्लिह गतौ। भौ॰ [illegible] आ॰ प्लेहते। प्राप्नोति। कुक्षिः। प्लीहा। प्लीहानौ। प्लीहानः। क्लिदू
आर्द्रीभावे। दै॰ प॰ क्लेदा। क्लेदानौ। ष्णिह प्रीतौ। दै॰ प॰ स्निह्यति। स्नेहवान् भवति। स्नेहा। सुहृत्।
स्निह्यंति। आर्द्री[illegible] भवंति लतादयोऽनेन। स्नेहा। चंद्रः। करणे। स्नेहा। स्नेहानौ। मुह वैचित्ये।

कौ०वृत्ति २ टीका

दीप्ता। मुह्यत्यस्मिन्नाहते मूर्द्धा। अधिकरणे। टुमस्जो शुद्धौ। तौ। पा। मज्जन्त्यस्थिषु मज्जा। मज्जानौ।
मज्जानः। नकारान्तो राजवत्। तो प्युपगम्यते उष्मया सा इत्यमृ पि मज्जो क्तो मज्जया सह इति
द्विरूपकोशात्। माङ् माने शब्दे च। औ। अर्यः स्वामिवैश्ययोरित्युक्तेः। अर्यं स्वामिनं शिवं
मिमीते पूजयति। अर्यमा सूर्यः। प्राणन्ते। आप। जनी प्रादुर्भावे दै। आप। परिजायते।
ईश्वरस्य मनसो मुखाच्च उत्पद्यते परिज्मा। चंद्रो मिश्राः। चंद्रमा मनसो जातः। मुखादिंद्रश्चा ४०
ग्निश्चेति श्रुतिः। टुओश्वि गतिवृद्ध्योः। औ। पा। मातरिश्वा। निपातनात् सप्तम्या अलुक्। इह न
त्वविषये संप्रसारणं न भवति। श्वयुवेति सूत्रे अभिव्यक्तपरत्वेन कुक्कुरवाचकस्यैव श्व
शब्दस्य तदन्तस्य च ग्रहणात्। तेन मातरिश्वनः। मातरिश्वनेत्येव। ~~[illegible]~~ मह पूजायां। औ।
पा। मह्यते पूज्यते देवादिभिरिति। मघवा इंद्रः। कर्म। इह सूत्रे इति शब्द आद्यर्थस्तेनान्ये
भ्योऽपि यथादर्शनं कनिः प्रयोक्तव्यः। इत्युणादिषु प्रथमः पादः समाप्तः। कृहृभ्यां। डुकृञ् ३९
करणे। ना। करोतीति मदोदकवर्षणं। करेणुरिभ्यां स्त्री नेभे इत्यमरः। हृञ् हरणे। औ। हरति

चित्तं हरेणुः। [illegible] यो हनिकुषि। हन हिंसागत्योः। आप। हन्ति। खेदं प्राप्नोति। हथः। विषम:।
कुष निष्कर्षे। कै। कुष्णाति सारं निष्कासयति। कुष्ठं रोगः। कुष्णाति। आकर्षति भंगान्। कु
ष्ठं पुष्करं। कुष्ठं रोगे पुष्करेऽस्त्री इति मेदिनी। राजीवपुष्करांभोरुहाणि चेत्यमरः। णीञ् प्रापणे।
औ। नयति। नीथो नेता। रमु क्रीडायां। औ। आ रमन्तेऽस्मिन् प्राणिनः इति रथः। अधिकरणे।
काशृ दीप्तौ। काशतेऽनेनाग्निरिति। काष्ठं। कारणे। अवे भृञः। डुभृञ् धारणपोषणयोः। औ।
अवबिभर्ति [illegible] स्मादिति अवभृथो यज्ञान्तस्नानं। अपादाने। उषिकुषि। उष दाहे। औ।
पा। उष्यते कटुत्वेऽनेनेति। ओष्ठः। कर्म। कुष निष्कर्षे। कै। पा। ऊष्मा निष्काश्यते से
ति आहारमिति कोष्ठं उदरं। गै शब्दे। औ। पा। गीयते सा गाथा। कर्म। [illegible] गतौ। औ। पा।
२२ [illegible] गच्छति [illegible] नां प्राप्नोतीति सार्थः। कर्त्ता। बाहुलकात् णु गतौ। शवतीति शोथः। [illegible] ४ सो०त्रः।२
सर्त्तेर्णित्। सृ गतौ। औ। सरतीति सार्थः। ऊर्त्तिभ्यां। ऊर्ज्वयोः [illegible] ऊर्णोति [illegible]
तिवाऽवरूथं मांसं। वृञ् वरणे। सो। वृणोतीति वरूथं वरूथः। पातृदि। पा पाने। औ। पिबति

रसाने तेऽरां स्तिपाथो रविः। पीयते इति पाथं घृतं। कर्मा। तृभ्रवत्तरणयोः। भौ। तरत्यने
नेति तीर्थं। तीर्थं शास्त्रा द्रि। तरति अवतरत्यनेनेति अवतारः। करणं। तरति निर्गच्छति
तीर्थं क्षारजः। उदव्यथने। तो। ३। उदति तुत्थोऽग्निः। वच परिभाषणे। आप। उच्यते सा
मगे रिति उक्थं साम भेदः। रिचिर् विरेचने। रौ। ३। रिणक्ति नाशयति दुःखमिति रिक्थं
धनं। वा रूचं त्सु तो। तौ। प। रच्यते रेक्थं धनं। कर्म। षिचिर् क्षरणे। तौ। ३। सिच्यते सिक्थः
मत्कपुलाकः। सिं च्यते सिक्थं मधूच्छिष्टं। सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसक
मिति मेदिनी। मधूच्छिष्टं प्राकृते मीणसंज्ञं। अर्त्तेः। ऋ गतौ। भौ। प। निर्यते सामगैः
निरर्थः। साम। निशीथ एते थक् प्रत्ययांता निपात्यंते। शीङ् स्वप्ने। निशेरतेऽस्मि
न्निशीथः। निशीथस्तु पुमानर्द्धरात्रे स्याद्रात्रिमात्रके इति मेदिनी। पा पाने गोपूर्वः
जो। गावः पिबंत्यस्मिन् गोपीथं तीर्थं। गम्लृ गतौ। भौ। प। प्रवगच्छति स्फुरतां
प्राप्नोति प्रगथः प्रातःस्नातः। गस्थो दिगि शब्दे। भो। उद्गीयते उद्गीथः। सामगान।

इण् गतौ। आ। प। समीयते शीतार्त्तैर्न समिथोऽग्निः। समीयते वीरैः समिथः संग्रामः। क
र्म। तिथ प्रष्ठ। तिज निशाने। यौ। चुरादिर्ण्यन्तः एवव हुलं णि जित्युक्ते णिजि भावे। तेजति ती
क्ष्णीकरोति। तिथोऽनलः। तेजति। स्त्रीरूपं दीप्तं करोति। तिथः कामः। ष्ठु सेवने। भौ। पा
श्रमवताऽच्छो दके न ष्ठ्यते सिच्यते। पृष्ठं। गु पुरीषोत्सर्गे। तौ। गुवति। निर्गच्छति। गूथ
विष्ठा। युमिश्रणे अमिश्रणे च। आप। यौति। समुदितं भवति। यूथं। समूहः। निपातना
दीर्घः। क्रुङ् गतौ। भौ। प्रूयते। प्राप्यते वस्त्रया प्रोथं। निपातनाद्गुणः। तुरंगमास्यो। क
र्म। प्रवते प्रोथः। प्रस्थितः। स्फायितं चि। स्फायी वृद्धौ। भौ। आ। स्फायते। वर्द्धते। स्फा
बहुलं तंसूसं कोचने। शौ। प। तनक्ति। तापं नाशयति। तक्रं। वंचु प्रलंभने। यौ। वंचयति। कु
टिलं भवति। वक्रं। शक्लृ शक्तौ। सौ। पा। शक्नोति। शक्रः। क्षुदिर् संपेषणे। रौ। उ०। क्षु
द्यते। क्षुद्रः। कर्म। सृप्लृ गतौ। भौ। पा। सर्पति। सृप्रः। तृप प्रीणने। दे। पा। तृप्यति। प्रीणयति
देवान्। तृप्रः। पुरोडाशः। दृप हर्षमोहनयोः। मोहनं गर्वः। दैपा। दृप्यति। गर्वं प्राप्नोति। दृप्रः।

Margin notes, top leaf, left: रुराति / आत्रियो / जेन्यः
Margin notes, top leaf, right: ४१ / ३५ / कुर
Margin notes, bottom leaf, right: निपातनाद्दीर्घः / शे / क्षिप प्रेरणे। नौ / ग्म। क्षिपति / विलंबे क्षिप्रं २

बलवान्। वदि अभिवादनस्तुत्योः। भ्वा। आ। वंदते। वंद्रः। उंदी क्लेदने। रौ। प। उनत्ति। क्लि
द्यति। उंद्रो जलचरः। श्विता वर्णे। भ्वा। आ। श्वेतते। श्वेतो भवत्यनेन। श्वित्रं। कुष्ठं। रतु व
र्त्तने। भ्वा। आ। वर्त्तते। वृत्रः। अज गतिक्षेपणयोः। भ्वा। प। अजति। गच्छति। शत्रून् प्र
ति वीरः। णीञ् प्रापणे। भ्वा। नयति। बुद्धिं प्रापयति। नीरं। पद गतौ। दै। आ। पद्यते ऽस्मिन्
जनः। पद्रो ग्रामः। अधिकरणे। मदी हर्षे। दै। प। माद्यंत्यस्मिन् जनाः। मद्रो देशभेदः।
मुद हर्षे। भ्वा। आ। मोदते ऽनया मुद्रा। करणे। खिद दैन्ये। दै। आ। खिद्यते ऽनेन। खि ४२
द्रो रोगः। करणे। खिद्यते। खिद्रो दरिद्रः। कर्त्तरि। छिदिर् द्वैधीकरणे। रौ। उ। छिद्यते
छिद्रं कर्म। भिदिर् विदारणे। रौ। उ। भिनत्ति। भिद्रं वज्रं। मदि स्तुतौ। भ्वा। आ। मं
द्यते स्तूयते। मंद्रः। गंभीरः। कर्म। चदि आह्लादे। भ्वा। प। चंदति आह्लादयति।
चंद्रः। अंतर्भावितण्यर्थः। दह भस्मीकरणे। भ्वा। प। दहति। दह्रो ऽग्निः। दसु उप ३९
क्षये। दै। प। दस्यति। रोगान् क्षिपति। दस्रः। स्वर्वैद्यः। कर्त्तरि। दस्यते त्यज्यते ऽ
नेः। दस्रः खरः। कर्म। दस्रः खरे ऽश्विनीसुते ऽपि इति मेदिनी। दंशु दंशने। भ्वा। प

दशति। धातूनामनेकार्थत्वात् गंभीरः स्वल्पो वा भवति। दभ्रः समुद्रः स्वल्पो वा। वस
निवासे। भ्वा। प। वसंत्यस्मिन् तेजः। उस्रः। रश्मिः। वसंत्यस्यां दुग्धं। उस्रा। गौः। अ
धिकरणे। माहेयी सौरभेयी गौरुस्रा इत्यमरः। वसेः संप्रसारणे। नरपरसृपिसृजिस्पृ
शिस्पृहिसवनादीनां। रेफपरस्य सकारस्य सृपादीनां सवनादीनां च मूर्द्धन्यो न स्यात्। पूर्व
पदादिति प्राप्तः प्रतिषिध्यते। इति हन्तिर्भूयो भिर्माया। तेन शासिवसि इति प्राप्तमपि न।
पूर्वपदात्। पूर्वपदस्थान्निमित्तात्परस्य सस्य मूर्द्धन्य एकेषां छंदसि। द्विषंति। द्विसंति।।
नरपरसृपिसृजिस्पृशिस्पृहिसवनादीनां। रपरः। विस्रंसिकया। सृपि। कूरस्य वि
सृपः। सृजि। वाससो विसर्जने। स्पृशि। दिविस्पृशः। स्पृहि। निस्पृहः। स्वर्परे शरि विसर्ग
लोपो वा वक्तव्यः। सवनादिः। सवनमुखे सवनमुखे। सोमे सोमे इत्यादि। वाश्र शब्दे।
दै। आ। वाश्यंते ऽस्मिन् जनाः। वाश्रो दिवसः। वाश्रं मंदिरं। अधिकरणे। शीङ् स्वप्ने। आ। दादि।
शेते। शीरः। हसे हसने। भ्वा। प। हसति। विना निमित्तं हसो मूर्खः। षिध गत्यां। भ्वा। प।।

सेधति। जंगां गच्छति। सिध्रः। साधुः। शुभ दीप्तौ। भ्वौ। आ। शोभते। शुभ्रं। मुसेरक्। मुस
खंडने। दै। प। मुस्यति मंगलं मुस्तं। अ। स्फायि किरम्योः। चकतृप्तौ। भ्वौ। प। चकति। अनेन
शुक्रम्॥ स्वद्व्ये। करणे। रमकीडायां। भ्वौ। आ। रमते। आनंदं प्राप्नोत्यस्मिन्नु दिते। रुग्रो। उरुणः।
अधिकरणे। वौकसेः। कस गतौ। भ्वौ। प। विकसति। विकुस्त्रः। अमितम्योः। अम ग
त्यादिषु। भ्वौ। प। अम्यते प्राप्यते। आम्रं। कर्म। तमु कांक्षायां। दै। प। तम्यते इष्यते जनैः। ६२
ताम्रं। कर्म। निंदेः। णि दि कुत्सायां। भ्वौ। प। निंद्यते बुधैः। निंद्रा। कर्म। अर्देः। अर्द गतौ
याचने च। भ्वौ। प। अर्द्यते। गम्यतेऽस्मात्। आर्द्रा। क्लिन्नो। अपादाने। शुचेः। शुच शोके।
भ्वौ। प। शोचति। शूद्रः। दुरीणः। इण गतावित्यस्माद्दुरुपपदे रक्। धातोर्लोपश्च। इण
गतौ। आ। दादिः। ततेः। तनी छेदने। तौ। प। अस्माड्रक्। छ क्रू इत्येतावादेशौ। तत्तः। छस्तं
तस्यादेशः। क्रूत्वने कालत्वात्सर्वस्यादेशः। तन्यते धर्मेण। तप्रं। क्रूरं। कर्म। तंतति। ३९२
क्रूरः। कर्ता। रोदेः। रुदिर् अश्रुविमोचने। आ। प। रोदयति। प। पिनं रुद्रः। बहुलम
न्यत्रापि। अन्यत्रापि धातोर्वेनरात्प्रत्ययांतरे पि णिलुगित्यर्थः। संज्ञायां। रुंदयति। वर्द

यति। प्रजाः। ब्रह्मा। शंसात्वयति। शंखुः। इत्यादि। छंदसि। वर्द्धतु त्वा सुष्टुतय इत्यादि।
वर्द्धयं त्वित्यर्थः। पर्ण निशोषयंति। पर्ण मुषः। जोरीच्। जु गतौ। सौत्रः। अस्माड्रक् ईकार
श्चांतादेशः। जवति। जीरः। अणुः। न्यश्यत्यके। न्याव शयोहानो। कै। अस्माड्रक् ग्रहिज्येति
संप्रसारणे। पूर्वरूपं। हल इति दीर्घः। जिनाति। अणुर्भवति। जीरोऽणुः। सुस्स्था। सुप्र
अभिषवे। सौ। सुनोति पीडयति। दैत्यान् सुरः। सु प्रेरणे। तौ। सुवति प्रेरयति कर्माणि
लोकमिति सूरः। सूर्यः। डुधाञ् धारणपोषणयोः। जौ। दधाति धैर्यं धीरः। गृधु अभि
कांक्षायां। दै। प। गृध्यति। मांसं गृध्रः। पक्षिभेदः। गृध्यति धनं गृध्रः। लुब्धकः।
गृध्रः खगांतरे पुंसि वाच्यलिंगो थलुब्धके इति मेदिनी। शृसि। शृ गतौ। सौ त्रः।
शवति। शत्रून् प्रति गच्छति। शूरः। विस्र वंधने। सौ। धातूनामनेकार्थत्वात्। सिनो
ति उछिरवति। सूमिं सीरं लांगलं। चिञ् चयने। सौ। चिनोति। धातूनामनेकार्थ
त्वात्स्रवति दुग्धं। चीरं। गोस्तनः। कर्त्ता। चीयते संचीयते। चीरं। वस्त्रं। चीरं तु गो कर्म।१

स्तनेवस्त्रे इति मेदिनी। डुमिञ् प्रक्षेपणे। स्वो। मिनोति। मीरः। वाविंधेः। ञिइंधी दीप्तौ।
रो। आ। विपूर्वादस्मात्क्रन्। वींधे। दीप्तं भवति। वीध्रः। वृधिवपिभ्यां। वृधु वृद्धौ। भौ।
आ। वर्द्धते। वर्ध्रीचर्म। डुवप बीज संताने। भौ। उ। उप्यते वीयते ऽस्मिन् इष्टकादि।
वप्रः। प्राकारः। अधिकरणे। ऋज्रेन्द्राग्र। ऋज गतिस्थानार्जनोपार्जनेषु। भौ। आ। अर्जते
उपार्जते यशः। ऋज्रो नायकः। इदि परमैश्वर्ये। भौ। प। इंदति। इंद्रः। अगि गतौ। भौ। प। अंगति। धा ४४
तूनामनेकार्थत्वादग्रे तिष्ठति। अग्रं। वज गतौ। भौ। प। वजत्यरीन् प्रति। वज्रो पविः। कर्त्ता। वज
ति मनो ऽत्र। वज्रो। हीरकः। अधिकरणे। डुवप बीजसंताने। अयं छेदने ऽपि। भौ। उ। वपति। छि
नत्ति। विपदे। विप्रः। कुवि आच्छादने। भौ। प। कुंवति। कुब्रं अरण्यं। क्षुबि वक्रसंयोगे। भौ। प।
क्षुंबते। क्षुब्रं मुखं। क्षुर विलेखने। तौ। प। क्षुरति। क्षुरः। नापितशस्त्रं। खुर छेदने। तौ। प। खुर
ति। भूमिमुल्लिखति। खुरः। भदि कल्याणे सुखे च। भौ। आ। भंदते। सुखं करोति। भद्रं। ३९३
उच समवाये। दै। प। उच्यति। उग्रः। ञिभी भये। जौ। प। बिभेत्यस्याः। भेरी स्त्री दुंदुभिः पुमान्

इत्यमरः। अपादाने। बिभेति। धातूनामनेकार्थत्वात्तरति जलमनेन भेलः। जलसहचरद्ये।
करणे। शुच शोके। भौ। प। शोचति। दैत्यान्मृतान् दृष्ट्वा शोकं करोति। शुक्रः। भार्गवः। शोचति।
धातूनामनेकार्थत्वात् शुभ्रो भवति। शुक्रः। गुड् अयं श्लेषे। भौ। गूयते। स्तूयते ऽनेनैः।
गौरः। कर्म। वन संभक्तौ। भौ। प। वनति। वन्रो। विभागी। इण् गतौ। आ। प। एति। आकाशे गम
नं करोति। इरा मेघः। कर्त्ता। ईयते प्राप्यते पिपासुभिः। इरा वारि। कर्म। मा माने। आ। प। मा
ति। मानं करोत्यनया मात्रा। करणे। समिकसः। कस गतौ। भौ। प। संकसत्यस्मात्संकना।
संकसुको दुर्जनः। अपादाने। संकसति। संकसुकः। अस्थिरः। कर्त्ता। पचिनशोः। डु
पचष् पाके। भौ। उ। णश अदर्शने। दै। प। आभ्यां णुकन् प्रत्ययः स्यादनयोर्यथाक्रमं कादे
शनुमागमौ च। भवतः। पचति। पाकुकः। नश्यति। अल्पेन वायुना। नंशुकः। पोतुः। कर्त्ता
भियः। ञिभी भये। जौ। प। बिभेति। भीरुकः। कुन् शिल्पिसंज्ञयोः। शिल्पिन्यभिधेये सं

शायां यजन्यमानायां क्वुन् स्यात्। अपूर्वस्य निरुपपदस्य अपि शशस्पूर्वस्तोपपद
स्य। शिल्पिनि। रंज रागे। भौ० उ०। रजति। धातोरनेकार्थत्वात् शोधयति वस्त्रं। रजकः।
कुट्ट छेदने। चौ० इ०। कुट्टयति। इत्थं कुट्टकः। गोडिकः। संज्ञायां। त्सर गतिनक्षण
योः। भौ० प०। त्सरति। गच्छति रोगा अस्मात् त्सरकः। भिषक्शास्त्रविशेषः। त्सप भक्षणे
भौ० प०। त्सपति। पिबत्यनेन त्सपकः पानपात्रं। करणे। श्रुन गतौ। तौ० प०। श्रुनति। श्रुनकः। श्वा।
न्मष स्वने। भौ० प०। न्मषति। न्मषकः। श्वा। रमेरश्च लो वा। रम क्रीडायां। भौ० आ०। रमते। रमकः।
विलासी। रमते। आत्मनि लमकः। ऋषिविशेषः। जहातेः। ओहाक् त्यागे। जौ० प०। जहाति।
जहकः। त्यागी। जहाति। धातोरनेकार्थत्वात् जह्णाति। जहकः। कालः। ध्मो धमश्च। ध्मा शब्दाग्नि
संयोगयोः। भौ० प०। धमति। धमकः। हनो वधश्च। हन हिंसागत्योः। आ० प०। हंति। वधकः। बहु ३५४
लमन्यत्रापि। अन्यस्मादपि क्वुन् प्रत्ययः। कुह विस्मापने। चौ० आ० दा० वदंत आत्मनेपदी।
कुहयते। कुहकः। दांभिकः। लूञ् छेदने। तौ० प०। लुनति। लूनकः। लषेः। लष विलेखने। भौ० प०

कषति। काषकः। लषीवलः। लषकः। स एव। उदकं च। उंदी क्लेदने। रौ० प०। अस्मात् क्वुन्। नलु
क्वुन् शिल्पीत्यादिनागतार्थमिदमत आह। प्रपंचार्थमिति। वृश्चिकषोः। ओव्रश्चू छेदने। तौ०
प०। वृश्चति। वृश्चिकः। कष विलेखने। भौ० प०। कषति। कषिकः। प्राङि। पण व्यवहारे स्तुतौ च। भौ०
आ०। प्रापणते। विक्रीणाति। प्रापणिकः। पण्यविक्रयी। कष हिंसायां। भौ० प०। प्राकषते। प्राकषिकः।
कर्म। मुषेः। मुष स्तेये। क्रै० प०। मुष्णाति। मूषिकः। स्यमेः। स्यमु शब्दे। भौ० प०। स्यमति। स्यमिकः।
क्रियः। डुक्रीञ् द्रव्यविनिमये। क्रै०। क्रीणाति। क्रयिकः। आङि पणिपनि। नन्वनेनैव सि
द्धे प्राङीत्यत्र पणिग्रहणं व्यर्थमिति चेन्न। उपसर्गांतरनिवृत्त्यर्थत्वात्। पण व्यवहारे स्तु
तौ च। भौ० आ०। आपणते। आपणिको वणिक्। पन च स्तुतावित्येव। भौ० आ०। आपन्यते
आपनिकः। इंद्रनीलः। कर्म। आपनायति। आपनिकः। किरातः। कर्ता। अनुबंधस्य केवलो
परितार्थत्वादायप्रत्ययांतानात्मनेपदं। आयादय आर्धधातुके वा। पत्लृ गतौ। भौ० प०
आपतति। आपातिकः श्येनः। आपतति। धातूनामनेकार्थत्वाद्दैवाधीनो भवति। आप

तिकः। दैवायनः। खनु अवदारणे। भौ॰ उ। आखनति। आखनिकः। श्यास्त्या। श्यैङ् गतौ।
भौ॰ श्यायते। श्येनः। स्त्यै शब्दसंघातयोः। भौ॰। स्त्यायति। शब्दं कारयति। स्त्येन श्चोरः। अंत
र्भावितण्यर्थः। हृञ् हरणे। भौ॰। हरत्या। अधाने। हरिणः। अवरक्षणादिषु। भौ॰ पा॰ अ
वति। ददाति हविः। अविनो ऽध्वर्युः। [illegible]जेः। वृजी वर्जने। रौ॰ पा॰ वृज्यते। वृजिनं। पापं
कर्म। अजेः। अज गतौ क्षेपणे च। भौ॰ पा॰ वीयते। क्षिप्यते। अजिनं। चर्म। कर्म। बहुलमन्यत्रा ४ु
पि। अन्यस्मादपीत्यर्थः। कठ कृच्छ्रजीवने। भौ॰ पा॰ कठति। धातूनामनेकार्थत्वात्कठोरं भव
ति। कठिनं। णल गंधे। भौ॰ पा॰ नलति। गंधवद्भवति। नलिनं पद्मं। मल धारणे। भौ॰ आ
मलते। मलं धारयति। मलिनं। कुडि दाहे। भौ॰ आ॰ कुंडते। शोके दहति। कुंडिनं। नगरं
कुंडिनमंडजोयया वितिश्रीहर्षः। द्यतेः। दो अवखंडने। दे। ~~द्यति खंडितं न वति~~
प्रायेणपुरो
ङाशादिः।२
पर्वत्सादिनीखंडितं न देवानामिति नैत्तिरीयश्रुत्यर्थः। ~~निरन्तरभेषणे~~ द्यति। ३५५
तमः। दिनं। दिवसः। द्रुदक्षिभ्यां। द्रु गतौ। भौ॰ द्रवति यस्मिन्नत्र द्रविणं। अधिकरणे दक्ष

पक्षिव अपायिदिनं। कर्म। यत्पु
पिपर्वतादिनं

दक्षौ भौ॰ आ॰ दक्षते। दक्षिणः। दक्षिणः सरलोदारपरछंदानुवृत्तिषु इति विश्वः। कर्त्री द
क्षते ऽनया दक्षिणा। करणे। अर्तेः। ऋ गतौ। भौ॰। अस्माद् इनन् किच्च स्यादिकार अधातोः।
ऋच्छति। अस्मात् इरिणं। शून्यं। अपादानं। विपितृयोः। टुवेपृ कंपने। भौ॰ आ॰ वेपते ऽस्मात्
विपिनं। अपादानं। अटव्यरण्यं विपिनमित्यमरः। तुहिर् अर्दने। भौ॰ पा॰ तोहति। तुहिनं।
हिमं। लषूपधगुणे। ऽन्तेरुरुश्च। नलिपुलिभ्यां। णल प्रतिष्ठायां। यौ॰ नालयति।
धातूनामनेकार्थत्वात्। विरलं स्तोकं स्वच्छं च भवति। नलिनं। पुल महत्त्वे। भौ॰ पा॰ पोल
ति। पुलिनं। गर्वेः। गर्व माने। चुरादिरदंत आत्मनेपदी। गर्वयते। सागुर्विणी। रुहेश्च।
रुह बीजजन्मनि प्रादुर्भावे च। भौ॰ रोहति। रोहिणः। प्रज्ञादित्वाद् णः। रोहिणः चंदन
तरुः। महेः। मह पूजायां। भौ॰ पा॰ मह्यते ऽस्मिन्। माहिनं महिनं राज्यं। अधिकरणे। कि
त्यपिश्च। वच परिभाषणे। आ॰ पा॰ वक्तीति वाक्। सरस्वती। वाणिं द्रियं च। करणे। वक्ति
अनया वाक्। वचनं। करणे। प्रच्छ ज्ञीप्सायां। तौ॰ पा॰ पृच्छति। प्राट्। श्रिञ् सेवायां। भौ॰

कौ० वृ० ३
टीका

श्रयति । हरिं । श्रीः । स्रु गतौ । भौ । स्रूः । अपादानं । द्रु गतौ । द्रवति यस्मात् मन्त्र । द्रूः हिरण्यं ।
अधिकरणे । कट ग तौ । भौ । कटं प्रवते । कटप्रूः । जु गतौ । सौत्रः । जवत्यस्यां । जूः । आ
काशं । अधिकरणे । जूयते प्राप्यते । जूः सरस्वती । कर्म । जवत्यस्याः । जूः पिशाची । अपा
दाने । जवने । जूः । भावे प्रत्ययः । आप्नोतेः । आप्यते पिपासुभिः । आपः । कर्म । परिव्रजेः ।
व्रज गतौ । भौ । प । परिव्रजति । परित्यज्य सर्वं व्रजति । परिव्राट् । मस्करी । हुवः । हु दानाद
नयोः । जौ । अस्मात् क्विप् धातोर्दीर्घः । जुहुवद्भावात् द्विर्वचनं । करणस्य कर्तृत्व विवक्षायां । जुहो ७
ति । जुहूः । स्रुवः कः । स्रु गतौ । भौ । स्रवति घृतादिकं अस्मात् स्रुवः । अपादानं । चिकस्य ।
स्रवति घृतादिकमस्याः । स्रुक । अपादानं । बाहुलकात् । स्रुग् इति चकारस्य नेत्संज्ञा ।
तनोतेः । तनु विस्तारे । ता । उ । तनोति विस्तृता भवति । त्वक् । वइ तिसं धातग्रहणं । नेना ३५
न्यस्य न । स्त्रियां तु त्वगसृग्वृधरेत्यमरः । ग्लानुदिभ्यां । ग्लै हर्षक्षये । भौ । ग्लायति क्षी
णो भवति । ग्लौः । चंद्रः । णुद प्रेरणे । तौ । उ । नुद्यते नाविकैः । नौः । स्त्रियां नौस्तरणिस्तरी ।

कर्म ।
इत्यमरः । चिरस्थायं । डौरित्येव । नडौ प्रत्ययांतः शरच्छ्यं तएवाय्ययमित्यर्थः । अग्लौः
ग्लौः संपद्यते । तं करोतीति । ग्लौ करोति । अव्ययत्वात् सुपो लुक् । उणादिप्रत्ययांतइति ।
उणादि प्रत्ययांत एजं तो भांत च्छशरच्छ्यं तएवाव्ययं । तेन अ ◆ च्छ्यं नानां ग्लौ नौ गो
रै किमा ◆ दीनं नाव्ययत्वं । उणादिप्रत्ययांते कृशरे कु सन्मे जंत इति सूत्रं न प्रवर्त्तते इत्य र्थः । रातेः ।
रा आदाने । आप । रायते सर्वैः । राः । कर्म । गमेर्डोः । गम्लृ गतौ । भौ प । गच्छति । गौः । आदि
त्य बलीवर्द किरण सुरभि वज्र बाणाः । कर्त्ता । गच्छति प्राप्नोति स्वर्गादिकमनेन यज्ञ । गौः ।
करणं । गच्छंति जना अस्यां । गौः । दिग्भूमिश्च । अधिकरणं । गम्यते जनैः । गौः । भारती ।
कर्म । गम्यते प्राप्यते । स्तुवंति भिः पिपासु भिर्हस्तादिभिश्च । गौः । स्वर्गं बुसोमानि । कर्म ।
गच्छंति वाहा अनेनानया वा । गौः । रश्मिः । करणं । गच्छति प्राप्नोति पदार्थान् अनेनानया वा ।
गौः । ह्रक् । करणं । बाहुलकात् । द्युतदीप्तौ । भौ । आ । द्योतंते देवा नारकाश्च । अस्यां । द्यौः ।
स्वर्गोंऽतरिक्षं च । अधिकरणं । भ्रमेः । भ्रमु अनवस्थाने चलने । भौ प । भ्रमति ।

अः। ५७। अमेः। गम्लृ गतौ। भौ०प०। अग्रे गच्छति। अग्रेगूः। सेवकः। इत्यदंता ता त्समभ्याः
संज्ञायामिति। समभ्या अलुक्। दमेः। दमु उपशमे। दै०प०। दाम्यति पीडयति शत्रून् दोः।
बाहुः। पणेः। पण स्तुतौ व्यवहारे च। भौ०आ०। पणते। विक्रीणाति वणिक्। वशेः। वश कां
तौ। कांतिरिच्छा। आ०प०। उश्यते। उशिक् इष्टं। कर्म। वह्निस्तादिकं। उशिक् अग्निः। कर्त्ता।
भृमः। भृञ् भरणे। भौ०। भरति। भुरिक्। जसिसहोः। जसु मोक्षणे। दै०प०। जस्यते दैत्यान्
प्रति महेंद्रेण। जसुरिर्वज्रं। नीयमानं जसुरिं इति प्रयोगात्। सि। षह मर्षणे। भौ०आ०। स ४
हते। अपराधान् पादस्पर्शादिकं च सहुरिः। आदित्यः पृथिवी च। सुयुरुः। षुञ् अभिषवे।
स्वौ। सुनोति पीडयति विरहिणां स्वबनश्च। सुमि। श्रणि। अभिश्रणिभ्यां। आ०प०। सूयते इष्य
क्रियते यवनः। कर्म। कुशाः। आ०प०। श्रौति। श्रवणः। वृञ् वरणे। व्रियते औषधाधि स्या०३
भिः। वरणः। वृक्षभेदः। कर्म। अशेः। अश व्याप्तौ। स्वा०आ०। अश्नुते कटिं रशना। उंदेः। उंदी ३७
क्लेदने। रौ०प०। उनत्ति। ओदनः। गमेः। गम्लृ गतौ। भौ०प०। गच्छंति पक्षिणोऽस्मिन्। गगनं।

अधिकरणं। बहुलं। अन्यस्मादपीत्यर्थः। स्यंदू प्रस्रवणे। भौ०आ०। स्यंदते। स्यंदनो रथः।
रुच दीप्तौ। भौ०आ०। रोचते रोचनः। रक्तकल्हारे गोपित्तवरयोषितोः। इति मेदिनी। रंजेः।
रंज रागे। द्वौ०उ०। रजते। रजनं। रक्तचंदनादि। भूसूधः। भू सत्तायां। भौ०। भवत्यस्मिन्
भुवनं। भूलोकादिलोकः। अधिकरणं। भवति भुवनं। प्राणिविशिष्टो लोकः। कर्त्ता। षूङ् प्रे
रणे। तौ०। सुवति कर्मणि लोके प्रेरयति सुवनं आदित्यः। धूञ् कंपने। स्वा०। धूनोति पापं
धुवनो वह्निः। कर्त्ता। निधूनोति। नितरां कंपयति देहमत्र। निधुवनं। अधिकरणं।
यक्षो पाके। तौ०उ०। पचति। पचनं अंबरीषं। क्लीबेऽंबरीषं भ्राष्ट्रो ना इत्यमरः।
कृपृवृजि। कॄ विक्षेपे। तौ०। किरति तमः। किरणः। पृ पालनपूरणयोः। जौ०। पिपर्त्ति।
पुरणः। वृजी वर्जने। रौ०प०। वृणक्ति त्यजति दृष्टिगोचरत्वं। वृजनं। आकाशं। आकाशं यो
जिनो दृष्टिगोचरं त्यजंति वा। मदि स्तुत्यादिषु। भौ०आ०। मंदते। अनेन मंदनं स्तोत्रं करणं।
डुधाञ् धारणपोषणयोः। जौ०। निधानं। निधनं मरणं। धाञ् नो अनेकार्थत्वात् मरणे वृत्तिः।

भावे प्रत्ययः। धृषेः। निधृषा प्रागल्भ्ये। सौ। पा। धृष्णोति। धिषणस्त्रिदशाचार्य इति मेदि
नी। कर्त्तरि धृष्णोत्यनया धिषणा। करणे। वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च। एते वर्त्तमाने अति प्रत्ययां
तानि पात्यंते। शतृवच्चैषां कार्यं स्यात्। लटः शतृशानचाविति शतृप्रत्ययांताः एव
मवं तु वर्त्तमाने इति। शतृवच्चेति न कर्त्तव्यमिति चेत्। अत्राहुः। शतृप्रत्ययांतत्वेनुक ४८
त्तिरिशाविति शप्रत्ययेमहतीत्यादौ आच्छीनद्योरिति नुमस्यात्। पृषु सेचने। भौ। पा। प
र्षति तानि पृषंति। बिंदु वाची पृषच्छब्दो नपुंसकमिति ध्वनयता बहुवचनमुदाहृतं।
बृह वृद्धौ। भौ। पा। बृंहति। बृहत्। मह पूजायां। भौ। पा। महते। महत्। कर्मणि गम्लृ गतौ।
भौ। पा। गच्छति। जगत्। संश्चत्तृपत्। एते अति प्रत्ययांता निपात्यंते। चिञ् चयने। सौ।
सं चिनोति। संश्चत्। कुहकः। कुह विस्मापने। तृप प्रीणने। दै। पा। तृप्यति। प्रीणयति। तृ ३८
पत्। छत्रं। इन्। हिंसागत्योः। आ। पा। विहंति गर्भं वेहत्। गौरित्यनुवर्त्तते। वेहद्गर्भोप
घातिनीत्यमरः। या गौर्गर्भं पातयति सा वेहत्। छंदस्य सानच्। ऋगतौ। सौ। ऋः। शव

त्यस्मिन् शवसानः पंथाः। अधिकरणे। जृष्व्वयोहानौ। दै। पा। जीर्यति अक्रमत्र। जरसानः
पुरुषः। अधिकरणे। अर्जि ऋधि। ऋजि गत्यर्जने। भौ। आ। ऋंजति तापं। ऋंजसानो मेघः। ऋ
धु वृद्धौ। भौ। आ। वर्द्धते। ऋधसानः। मदि स्तुत्यादिषु। भौ। आ। मंदते। स्तूयते। मंदसा
नोऽग्निः। कर्मणि मंदते। मंदसानो जीवः। कर्त्तरि। षह मर्षणे। भौ। आ। सहते यशोऽस्मिन्
सहसानो यज्ञः। अधिकरणे। सहते विषं सहसानः मयूरः। कर्त्तरि। विषं मर्षणे दे हे
न कामति। अर्त्तेः। ऋ गतौ। भौ। अर्यते शीतार्त्तैः। अर्शसानो ऽग्निः कर्मणि। समान्यानच्। ष्टु
ञ् स्तुतौ। आ। उ। संस्तौति। संस्तवानः। युधि बुधि। युध संप्रहारे। दै। पा। आ। युध्यते।।
युधानः। रिपुः। बुध अवगमने। दै। आ। बुध्यते। बोधयति। बुधानः। आचार्यः। अंत
र्भावितण्यर्थः। दृशिर् प्रेक्षणे। भौ। पा। पश्यति। दृशानो लोकपालः। हुर्छेः। हुर्छ सनेता
दानच् प्रत्ययः। सनश्च लुक्। छकारलोपश्च। हुर्छ कौटिल्ये। भौ। पा। कौटिल्य

मपसरणमिति मैत्रेयः। शत्रुहन्तीन् दुःशासन दृष्टा दृष्टिं तमपसर्तुमिच्छति। तुहूर्षि
षति। तुहुराणच्छन्दः। कर्त्ती। च्यितेर्दन्त्य। च्यितावर्णे। भौ। आ। वर्णः स्फतिः। श्वेतितुंदे यान्
स्तो तुमिच्छति। शिश्वेतिषते। शिश्विदानः पुण्यकर्माकिर्त्ती त्वनन्तयौ शंसि। शंसुस्तुतौ।
जौ। प॰ [redacted] । शंसति। शंस्ता। अपूत्वनिति सूत्रेन आदिग्रहणं नियमार्थं औणादि
कत्वनन्तऊंतानां नेदुपधादीर्घः स्तादि नआदीनामेव सूक्तं। तेनात्र दीर्घो नेत्युदाहरति। ५०
शंस्तरौ। शंस्तरः इति। तिस्वादाद्युदात्तः। छदिः सौत्रः शकलीकरणे भक्षणे च। आत्मनेपदी।
छदते। धातूनामनेकार्थत्वात्। बाहान्प्रेरयति। प्रविशतो वारयति। जातिं नाशयति।
छत्ता। छत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे। शूद्राद्वैश्यायां जातः छत्ता। बहु
लमन्यत्रापीति दैः। आ। मन्यते। मंता। हन हिंसागत्योः। आ। प। हंति। हंता। नप्तनेष्टृ। नञ्आद्यो ७५९
दशतृन्तृचौ। तानि पात्यंते। पतनाद्गतौ। औ। पा। नञ्प्रकृतिभावः पतेरच्छ इलोपः नप्ता। नीञ्
प्रापणे। भौ। नयति। कर्मसमाप्तिं नेष्टा ऋत्विक्। त्विषदीप्तौ। भौ। उ। त्वेषति। दीप्तिमत्करोति। त्वष्टा।

कृत्स्नस्पर्द्ध्यादिरेय। भौ। कृयति
यशोभुदेवाकारयति। होता
कृयतेः संप्र
सारणं गुणाभा
वश्चेणिनिपात्यते

च्यंतनभिवितन्वर्थः। त्वष्टा पुमान्देवशिल्पितक्षणः। आदित्यभिद्यपि इति मेदिनी। हुदानादनयोः।
जौ। जुहोति। होता। पूञ्पवने। क्रै। पुनाति। पोता। पवित्रं। भ्राज्दीप्तौ। भौ। आ। भ्राजते। सौ। हाई
आदादिः। २ नाभ्राता। माङ्माने। जायांमाति। जामाता। अंतभीवितन्वर्थः। मानपूजायां। चौ। मानयते। सुते।
माता। कर्मपारक्षणे। आदादिः। पाति। पिता। दुहप्रपूरणे। आ। दोग्धि। पितृकुलं रिक्तीकरो
ति। दुहिता। सुन्वते। सुञ्जिउपपदे असेर्ऋन्। असुक्षेपणे। दैः। पा। स्वस्यति। दुःखं दूरीकरोति।
स्वसा। यत्नेः। यतीप्रयत्ने। भौ। आ। यतते। याता। दुहितायाता। ननंदृदुनदि समृद्धौ।
भौ। प। ननंदति। ततायामपि सेवायांनतुष्यति। ननांदा। दिवेर्ऋः। दिवुक्रीडादौ। दै। पा। दी बहुलननंद तिभ्रातृजायां ननांदा। ५
व्यति। भ्रातृजायायाविनोदं करोति। देवा। देवेध देवरविमाधवेयेति श्रीहर्षः। नयतेः।
णी। ञ्प्रापणे। भौ। अस्मात्तृन्प्रत्ययः स च डित्। नयति। जीवं ब्रह्मत्वं प्रापयति। ना। पुरुषः।
सव्येस्थः। ष्ठागतिनिवृत्तौ। भौ। अस्मात्छंदसि सव्ये उपपदे ऋन्प्रत्ययः स च डित्। सव्ये
अग्रे तिष्ठति। सव्येष्ठा। सारथिः। नतुरुषेन्नतीति सन्म्या अदुकं। ऋन्निरुद्ध। ऋगतौ।

णौ। अर्यते वह्निरत्र। अरणिः। अधिकरणं। अरणिर्वह्निमंथे नाड्योर्निर्मथ्यदारुणी
ति मेदिनी। सृ गतौ। णौ। सरत्यस्यां सरणिः। अधिकरणं। सरणिः पद्धतिः पद्या इत्य
मरः। धृञ् धारणे। णौ। धरति धरणिः। धमिः सौत्रः। धमति। वहति। धमनिः। नाडी
च धमनिः शिरा इत्यमरः। अम गत्यादौ। णौ। प। अमनं। अमनिः। गतिः। भावे प्रत्ययः।
अश भोजने। क्रैप। अश्यते भुज्यते राज्यमिंद्रेणानेनानया वा। अशनिः। करणं। द्वंभो
लिरशनिर्द्वयोः इत्यमरः। अव रक्षणादौ। णौ। प। अवति। अवनिः। तॄ प्लवनतरण ५१
योः। णौ। तरति दुःखमनेनेति तरणिः। सूर्यः। करणं। तरणिर्द्युमणौ पुंसीति मेदिनी। तर
ति। तरणीं। स्त्रियां नौस्तरणिस्तरिरित्यमरः। रंज रागे। णौ। उ। रजंति विलासिनो बाहुलकान्ता४
ऽस्यां रजनिः। अधिकरणं। आङि शुषेः। शुष शोषणे। दै। प। अस्मात् सन्नंताद् आङि उपप
दे अनिः स्यात्। आशोशुषं अंतर्भावितण्यर्थत्वात् आशोषयितुमिच्छति। आशुशुक्षति। ४०
आशुशुक्षणिः। वह्नेः। कष विलेखने। णौ। प। कषति। कषणिः। निः। वैदिकनिघंटौ च

र्वणिशब्दस्य मनुष्यनामसु पाठात्। अर्देः। अर्द चलने। णौ। प। अर्दनिर्हविः। अशनिः।
अग्निः। वर्तेः। वृतु वर्तने। णौ। आ। वर्त्तंते अस्यां वर्त्तनिः। अधिकरणं। चंद्रिकाया
दिति डीषि वर्त्तनी। सरणिः पद्धतिः पद्या वर्त्मन्येकपदीति चेत्यमरः। क्षिपेः। क्षि
प प्रेरणे। तौ। उ। क्षिपति। क्षिपणिरायुधं। अर्चिशुचि। अर्च पूजायां। णौ। प। अर्च्यते
स्तूयते। अर्चिः। कर्म। ज्वालाभासो न पुंस्यर्चिरिति नानार्थे सांतेष्वमरः। इदंतोप्ययं।
अर्चिर्हेतिः शिखा स्त्रियामित्यमरः। शुच शोके। णौ। प। शोचति। शोचादिरनेन। शोचिः।
करणं। शोचिः शोचिरुभे क्लीबे इत्यमरः। हु दानादनयोः। जौ। हूयते। हविः। कर्म। सृप्ल
गतौ। णौ। प। [redacted] तापं प्राप्य सर्पति। सर्पिः। छद अपवारणे। चौ। छाद्यते अनया छदिः। क
रणं। छदिः स्त्रियामेवेति लिंगानुशासनसूत्रे। छर्द वमने। चौ। छर्दयति अनेनेति छर्दिः।
करणं। इदंतोपि। छर्दिष्या। तीसार च सूत्रे संयतानियस्य संतीति विग्रहः। बृंहेः। बृहि वृ
द्धौ। णौ। प। बृंहति धर्मोऽनेन बर्हिः। अग्न्याऽग्निः। क्षुतेः। क्षु नदीनौ। जौ। आद्यातनते। ज्योतिः।

कौ० श्चत्ति २ टीका

ज्योतिरस्त्रौ दिवाकरे। पुमानन्नपुंसकं दृष्टौ स्यान्नद्युत्र प्रकाशयोरिति मेदिनी। वसौ कृ येः।
क्यद्दीप्तौ। भ्यौ। आ। वसुना रोच्यते। वसुरोचिः। भुवः। भूसत्तायां। भ्यौ। भवंति रत्नान्यत्राभुविः।
सलुङ्ः। अधिकरणे। सहेर्य्यश्च। बहमर्षणे। भ्यौ। आ। सहते सधिरन् द्वान्। पिबतेः। पिब रपापाने। भ्यौ।
ति। सादरावलोकनं करोति। पार्थिः। यलुङ्। पीयते ऽर्कमरीचिभिः। पार्थिः सलुङ्ः। कर्म।
गर्भं दधत्यर्कमरीचयो ऽस्मादिति रघुवंशे। जनेः। जनी प्रादुर्भावे। दै। आ। जननं। जनुः। ५२
भावे प्रत्ययः। जनुर्जननजन्मानीत्यमरः। मनेः। मन ज्ञाने। दिवादि। आ। मन्यते जनैः। मधुः।
पवित्रद्रव्यं। अर्त्तिदिवपि। ऋगतौ। भ्यौ। ऋच्छति। प्राप्नोति पापिनं। अरुः। ब्रणे ऽस्त्रियामी
र्म मरुः क्लीबे इत्यमरः। ऋच्छति मोहं प्राप्नोत्यस्मिन्नाहते। अरुः। मर्मस्थानं। अधिक
रणं। पॄ पालनपूरणयोः। जौ। पिपर्त्ति। धातूनामनेकार्थत्वान्न्यग्नो भवति। परुः। ग्रंथि ८१
र्ना पर्व परुषी इत्यमरः। टुवपू वीजसंताने। भ्यौ। वपति। उप्यते ऽस्मिन्। वपुः। नरनारीश
रीरं। कर्त्ता। अधिकरणे। तनु विस्तारे। ता। उ। तनोति। विस्तीर्णं भवति। तनुः। धन धान्ये। जौ। पा

यजदेवपूजादौ। भौ। उ। यजति। अनेन यजुः। करणे। १

दधंति। धान्यं करोति। यद्वा धातूनामनेकार्थत्वात् शरं दधाति। धनुः। अथ स्त्रियां धनुश्चा
पावित्यमरः। धनुषा च धनुं विदुरिति द्विरूपेषु विश्वः। तप संतापे। भौ। पा। तपति। तपुः। एतेः।
इण् गतौ। आ। पा। एति गच्छत्यायुः। चक्षेः। चक्षिङ् व्यक्तायां वाचि। आ। दादिं। चष्टे। रूपम
नुभवंत्यनेन। चक्षुः। करणं। मुहेः। मुह वैचित्ये। दै। पा। अस्मादुसिः स्यात्तस्य किन्न। इह प्र
कृति प्रत्ययविभागमात्रं। न तु तदर्थावगमः। मुहुः करोतीत्यादौ। इदुदुपधस्येति सूत्रेण
षत्वनिवृत्त्यर्थं प्रकृति प्रत्ययविभागकल्पना। मुहुरित्यव्ययं पुनः पुनरित्यर्थे। बहुलं। च
क्षिङ् व्यक्तायां वाचि। आ। दादिः। आचष्टे। आयक्षुः। परिचष्टे। परिचक्षुः। कृग्रहृ। कृवि
क्षेपे। तौ। किरति। कर्वरः। जृ निगरणे। तौ। जीर्यते। चायते ऽहंकारेण। गर्वरः। अहंकारी।
कर्मी श्रूहिंसायां। क्यौ। श्रृणाति। प्राणिनः क्रियो शर्वरी। इञ् वरणे। सौ। वृणोति। ववरः। यते
यायतने। भ्यौ। ड। यतते ऽस्मिन् चत्वरं। अंगणं। अधिकरणं। च्यवते। धातूनामनेकार्थत्वा
त्यज्यति। अनेन चत्वरं। स्थंडिलं। चत्वरं स्थंडिले गणे। इति मेदिनी। नौस्तदेः। षद्लृ विशर
णगत्यवसादनेषु। भ्यौ। पा। गमनशक्तिनाशान्निषीदत्यस्मिन्। निषद्वरः। जंबालः। अधि

डुधाञ् धारणपोषणयोः। जौ० दधाति। धारयति मत्स्यान्। धीवरः। निपातनादीत्वं। २

करणं। निषीदन्ति विरतक्रिया भवन्त्यस्यां। निषद्वरी। रात्रिः। इत्युणादिषु द्वितीयः पादः॥
छित्वर॥ छिदिर् द्वैधीकरणे। रौ० उ० छिनत्ति। छित्वरः। छद अपवारणे। णौ स्वरितेत्। आधृषीयत्वे
न णिजिच्विकल्पात् छदति। आच्छादयति। छित्वरः। (चीवमीवतीवनीवस्थौल्ये।) भौवादिकाः परस्मै
पदिनः। पा पाने। भ्वा० पिबति। दुग्धघृतान्नादिकं भक्षयति। पीवरः। निपातनाद्धातोरन्त्यस्य ईत्वं।
मा माने। अदादिः। माति धातूनामनेकार्थत्वाद्धिनस्ति। मीवरः। हिंसकः। निपातनाद्धातोरं ५२
न्त्यस्य ईत्वं। चिञ् चयने। स्वा० चीयते संचीयते भिक्षुकैः। चीवरं। कर्म। तीव नीव स्थौल्ये।
भ्वा० प० तीवति। तीवरः। लोपो व्योर्वलीति वकारलोपः। तीवरो नाम्बुधौ व्याधे इति मेदिनी।
नीवति। प्रभूतानन्दानुभवेन स्थूलो भवति। नीवरः। परिव्राट्। गाहू विलोडने। भ्वा० आ० गाहते
विशत्यस्मिन् सिंहादिः। गह्वरं [illegible]। अधिकरणं। कटे वर्षावरणयोः। भ्वा० प० कटति। क्रीयते ६२
भक्षकैः। कट्वरं। व्यंजनं। कर्म। यम उपरमे। भ्वा० प० संयच्छति। नियच्छति। संयद्वरः। पद गतौ। दै०
आ० संपद्यते। संपद्वरः। संपन्नः। इण्सिञ्जि दीङ् उष्यविभ्यो नक्। इण् गतौ। आ० पा० ईयते। ऋधिभिः। इनः। स्वर्य...

पौ० ईयते सेवकैः। इनः। पतिः। कर्म। षिञ् बंधने। स्वा० सिनोति। धातूनामनेकार्थत्वात् एकने
न रहितो भवति। सिनः। काणः। जि जये। भ्वा० जयति कामं। जिनः। दीङ् क्षये। दै० दीयते क्षी
णो भवति। दीनः। उष दाहे। भ्वा० प० ओषति। उष्णः। अवरकाणौ। भ्वा० प० ऊयते। असं
पूर्णत्वादूयते। ऊनः। ज्वरत्वरेत्यूठ्। सवर्णदीर्घः। कित्त्वाद्गुणाभावः। कर्म। फेनमीनौ। स्फायी
वृद्धौ। भ्वा० आ०। अस्य फि आदेशो गुणश्च निपात्यते। स्फायते। फेनः। मीञ् हिंसायां। क्र्या०
मीनाति। अनित्युदात्तस्यात्। मीनः। कषेः। कष विलेखने। भ्वा० प० अस्मान्नक् स्याद्धलो
वाच्ये। कष्यते वर्णो निरन्नीयते अनेन। कृष्णः। वर्णः करणं। बंधेः। बंध बंधने। क्र्या० प० अस्मा
न्नक्। बधिबुध्यादेशोऽस्य। बध्नाति तिमिरं। ब्रध्नः। भास्करे रक्तके ब्रध्न इत्यमरः।
बध्नाति दुःखं शंकां च। बुध्नः। बुध्नो मूलरुद्रयोरिति मेदिनी। धाञ्। डुधाञ् धारणपोष
णयोः। जौ० दधाति। पोषयति धानाः। पृ पालनपूरणयोः। जौ० पिपर्ति हतादिकमन्नपर्णं। अधिकरणं
पिपर्ति समिद्भिर्यज्ञं पूर्णं करोति। पर्णः। किं? कः। कनी। वस निवासे। भ्वा० प० वसत्यनेन

वस्नः। वस्नस्त्ववक्रये ऽपुंसि वेतने स्यान्नपुंसकमिति मेदिनी। अज गतौ क्षेपणे च। भ्वौ०प०
अजति। क्षिपति वेनः। लुंटाकः। चीयते। प्राप्यते वेनः प्रजापतिः। कर्मणि वेनो लुंटाकः प्रजा
पतिश्च। अत सातत्यगमने। भ्वौ०प०। अतति। अत्नः। बाहुलकान्न। कश श्वले। भ्वौ०। श्नथ
गमनशब्दयोरित्यन्ये श्रणेति। श्रोणः पंगुः। लक्षेः। लक्ष दर्शनांकनयोः। चौ०। लक्षयति। ल ५४
पश्यति। लक्ष्णं। लक्ष्मणं नाम। कर्त्री। लक्ष्यते ज्ञायते गमनेन। लक्षणं। लक्ष्मणं। चिह्नं।
करणं। भक्तत्वान् लक्षयति पश्यति रामं। लक्षणः। लक्ष्मणः। रामभ्राता। कर्ता। लक्षयति
सादरं हि संपश्यति। लक्षणा। लक्षयति। सारसी। लक्ष्मणा। लक्ष्मणं नाम्नि चिह्ने च सौमित्रिः अपि
लक्षणः। लक्ष्मणं। लांछने नाम्नि रामभ्रातरि लक्ष्मण इति विश्वः। वनेः। वन संभक्तौ। भ्वौ०प०
वन्यते। सेव्यते। वेन्ना नदी। कर्मणि। सिवेः। षिवु तंतुसंताने। दि०प०। सीव्यत्यनेन स्यूनः। आदित्यः। क
रणं। बाहुलकात् स्योनः। किरणसूर्ययोरिति मेदिनी। कृ विक्षेपे। तौ०। किरति। सु ४३
वर्णादिकं दुःखं च। कर्णः। पृथात्ज्येष्ठसुतः सुवर्णलिप्या किरति। धातूनामनेकार्थत्वात् कृ

णोति। कर्णः। कर्णः पृथात्ज्येष्ठसुते सुवर्णालेऽपि च श्रुतावपीति विश्वः। वृञ् वरणे। स्वौ०। वृणोति।
वर्णः। जृष् वयोहानौ। दि०प०। जीर्यति। क्षीणो भवति। जर्णः। चंद्रो वृक्षश्च। षिञ् बंधने। स्वौ०
सिनोति। परान्। सेना। द्रु गतौ। भ्वौ०। द्रवति। द्रोणः। अश्वत्थामजनकः। पन स्तुतौ च। भ्वौ०आ
पननं। धातूनामनेकार्थत्वान् नीयैः गमनं। पन्नः। भावे प्रत्ययः। अन प्राणने। अ०प०। अनिति।
जीवत्यनेन। अन्नं। ओदनः। करणं। ञिष्वप् शये। अ०प०। स्वपनं। स्वप्नः। भावे प्रत्ययः। धेट्।
धेट् पाने। भ्वौ०प०। धीयते। ऽकर्मणि। ञ्निः। धेनः। धीयते पिपासुभिः। धेना। कर्मणि। धेनः समुद्रे नद्यां च
धेना इति विश्वः। तृषि शुषि। ञितृष पिपासायां। दि०प०। तृष्यत्यनया तृष्णा। करणं। शुष शोषणे।
दि०प०। शुष्यति। शोषयति। शुष्णः। अग्निः। भावितण्यर्थः। रस शब्दे। भ्वौ०प०। रस्यते। स्तूयते। रस्नं।
द्रव्यं। कर्मणि। क्षुभो दीर्घश्च। क्षुभ अभिषवे। स्वौ०। सुनोत्यस्यां। सूना। वधस्थानं। अधिकरणे।
रमेस्त च। रमु क्रीडायां। भ्वौ०आ०। अस्मात् त्नप्रत्ययेनान्तः स्यात्। मकारस्य तादेशः। रमयति। रत्नं।
रास्नासास्ना। रस आस्वादने। चौरादिको ऽदंतः। रस्यते धातूनामनेकार्थत्वात् द्राघ्रा

कौ० वृत्ति २
टीका

उ० पा० २

यतेरास्नोस्त्ना। निपातनादुपधादीर्घः। कर्म। षस्नु स स्वप्ने। आप। स्नस्तिः अचेतनो
भवतिर्स्त्ना। निपातनादुपधादीर्घः। स्नागति निवृत्तौ। भौ। निपातनादस्य कृत्
प्रत्ययस्य णत्वं च। तिष्ठति स्थूणा। वीगत्यादिषु। आप। वेति धातूनामनेकार्थत्वा
त् शब्दं करोति वीणा। निपातनात् कुणाभावो णत्वं च। गादाभ्यां। गै शब्दे। भौ। गाय
ति गेष्णुः। डुदाञ् दाने। जौ। ददाति देष्णुः। कृत्सर्भ्यां। कृती वेष्टने। रौ। प। कृण सू० ५५
त्ति कृत्स्नं। अश्रयादौ। सौ। आ। अश्नुते अश्नं। तिजेः। तिज निशाने। भौ। चुरादिभ्य
त्वबहुलं णिच् इदस्य के णिङ भावपक्षे तेजति तीक्ष्णं। श्लिषेः। श्लिष आलिंगने।
दे। प। श्लिष्यते श्लक्ष्णं। कर्म। यजिमनि। यज देवपूजादौ। भौ। उ। यजति यज्युः। मन
ज्ञाने। दे। आ। मननं धातूनामनेकार्थत्वाद्दीनभवनं मन्युः। भावे प्रत्ययः। मन्यते मन्युः ४४
क तुः। कर्म। दुष्टत्वेन मन्यते मन्युः क्रोधः। कर्म। शुंधः शुद्धौ। भौ। प। शुंधति शुंध्युः रश्मिः
अंतर्भावितण्यर्थः। दसु उपक्षये। दे। प। दस्यति क्षीणं करोति दस्युः। अंतर्भावितण्य

र्थः। दस्युश्चौरे रिपौ पुंसि। जनी प्रादुर्भावे। दे। आ। जायते जन्युः। कर्त्ता। जंतुर्जन्युश्च शरी
रिणः इत्यमरः। भुजिमृङ्भ्यां। भुज पालनाभ्यवहारयोः। रौ। उ। भुज्यते अभुज्युः। अ
धिकरणं। मृङ् प्राणत्यागे। तौ। म्रियते अनेन मृत्युः। करणं। मृत्युर्ना मरणे यमे इति मे
दिनी। सर्त्तेः। सृ गतौ। भौ। सरति सरयुः। पानी। पा रक्षणे। आप। णीञ् प्रापणे। भौ।
नयति सुखं नेपः। बाहुलकात् कुणाभावे नीयते प्राप्यते पाहि मे रीति नीपः। नीपः कदंब
बंधूकनीलाशोकद्रुमेषु इति मेदिनी। कर्म। विषू व्याप्तौ। जौ। उ। वेवेष्टि वेष्पः। चुपः। चु
प् गतौ। भौ। धातूनामनेकार्थत्वादिह भाषणे। च्यवंते भाषंते अनेनेति च्युपः। करणं। स्तु
सू० ४ वः। ष्टुञ् स्तुतौ। आ। स्तूयते स्तूपः। कर्म। सुष्पभ्यां। षुञ् अभिषवे। सौ। ष्टूद सायां। कौ। प।
आभ्यां पः स्यात् स च नित्। चात् कित् सुनोते दीर्घश्च। क्षमते धातूनामनेकार्थत्वात् सूयते स्तू
पः। कर्म। शृणाति धातूनामनेकार्थत्वात् शुष्कं करोति अनेन शूर्पं। करणं। कुयुभ्यां च। कु
शब्दे। आप। यु मिश्रणे। आप। धातूनामनेकार्थत्वाद् स्य बंधने। चिः। रचयति। यौ। भरु

कौ०टि२ टीका

उ०प्र०२

॥५६॥ नुः। अवदारणे। भ्वौ। उ। खनति। अनेनेति खष्पः। करणं॥ शील समाधौ। भ्वौ। प। शीलति। अन्ये
षां चित्तवृत्तिं रुणद्धि। शिल्पं। शसु हिंसायां। भ्वौ। प। शस्यते पशुभिरिति शष्पं। कर्म। शंस ति
शानं अनेनेति शाष्पं। कर्त्ता। प्रतिभा हृयः। बाधृ विलोडने। भ्वौ। आ। बाधते बाष्पः। रूप
हृ। आ। प। रूप्यते सहवाससंभाषणादिभिर्ज्ञायते रूपं स्वभावः। कर्म। धातूनामनेकार्थत्वाद्
ज्ञाने वृत्तिः। रूप्यते रूप्यते रूपं सौदर्यं। कर्म। पृ पालनपूरणयोः। जौ। पिपर्त्ति पालयति जे
नं पशुं पर्णं च पर्प॥ तल प्रतिष्ठायां। चौ। तालयति निष्ठति अस्मिन्निति तल्पं। स्तनि श
ब्दे। स्तन देवशब्दे। चुरादिरदन्तः। स्तनयति। स्तनयित्नुर्बलाहकः। इत्यमरः। हृष तुष्टौ। दै। प
हर्षयति। हर्षयित्नुः। सुते हेम्नीति विश्वः। पुष पुष्टौ। दै। प। पोषयति। पोषयित्नुः पिके द्विजे इति वि
श्वः। गद्दे स्तन गदी देवशब्दे। चुरादिः। अदन्तः। गदयति। गदयित्नुः। मदी हर्षग्लेपनयोः। ॥५६॥
दै। प। मदयति। मदयित्नुः। घटादिषु पाठात् ह्रस्वः। मदयित्नुः कामदेवे पुमान् मद्ये नपुंसक ४५
मिति मेदिनी॥ तह निभ्यां। डुलच् करणे। ना। करोति। तत्नुः। हन हिंसागत्योः। आ। प। हन्ति। हन्तुः।

गमेः। गम्लृ गतौ। भ्वौ। प। गच्छति। जिगत्नुः। दाभाभ्यां। डुदाञ् दाने। जौ। ददाति। दात्नुः। भा दी
प्तौ। आ। प। भाति। भात्नुः। वचेः। वच परिभाषणे। आ। प। वक्ति। वक्त्नुर्वाचालः। धेटः। धेट्
पाने। भ्वौ। धीयते। धेनुः। कर्म। सुवः। षूङ् प्राणिप्रसवे गर्भविमोचने। आदादिः। सूयते।
सूत्नुः। पुत्रः। कर्म। सूते जगत् सूत्नुः। रविः। कर्त्ता। सूते। धातूनामनेकार्थत्वात् प्र[illegible]
यति। सूत्नुः। अनुजः। कर्त्ता। जहातेः। ओहाक् त्यागे। जौ। प। जहाति पापं जह्नुः। स्थो णुः।
ष्ठा गतिनिवृत्तौ। भ्वौ। अस्मात् णुः स्यात्। तिष्ठति। स्थाणुः। अजिरः। अज गतौ क्षेपणे च।
भ्वौ। प। वीयते हननार्थं क्षिप्यते। वेणुः। वंशः। कर्म। वृङ् संभक्तौ। कै। आ। व्रियते। वर्णुः।
कर्म। री गतौ। कै। रिणाति गच्छति। रेणुः। विषेः। विष्लृ व्याप्तौ। जौ। उ। वेवेष्टि। विष्णुः। कृ
दाधा। डुकृञ् करणे। ना। करोति पत्युरानन्दं। कर्कः। डुदाञ् दाने। जौ। ददाति। दाकः। डुधाञ्
धारणे। जौ। दधाति। धुरं धाकः। अनड्वान्। कर्त्ता। धीयते ऽनेन धाकः। आधारः। अधि
करणे प्रत्ययः। रा दाने। आ। प। रायते ऽस्यां देवताभ्यो हविरिति राका। पौर्णमासी। अ

धिकरणं ॥ अर्च पूजायां ॥ भ्वौ ॥ प ॥ अर्च्यते अर्कः ॥ कर्म ॥ कल शब्दसंख्यानयोः ॥ भ्वौ ॥ आ ॥ क
लते धातूनामनेकार्थत्वाद्गच्छति अस्मात्कल्कः ॥ अपादानं ॥ सृञ् ॥ सृ गतौ ॥ भ्वौ ॥
स्त्रियते प्राप्यते भ्रमरैः स्रक् ॥ उत्सर्गं ॥ कर्म ॥ सरति सरकोवातः ॥ कर्ता ॥ वृञ् वरणे ॥ स्वौ
वृणोति वृकः ॥ भू सत्तायां ॥ भ्वौ ॥ भवति तिष्ठति सर्पादिरस्मिन्निति भेकं ॥ छिद्रं ॥ अ
धिकरणं ॥ शुष शोषणे ॥ दि ॥ प ॥ शुष्यति शुष्कः ॥ मुष स्तेये ॥ क्र्यौ ॥ प ॥ मुष्यते धातूना
मनेकार्थत्वादाच्छाद्यते मुष्कौ वृषणः ॥ कर्म ॥ शुक वल्क ॥ शुभ दीप्तौ ॥ भ्वौ ॥ आ ॥ श
शोभते शुकः ॥ वल संवरणे ॥ भ्वौ ॥ आ ॥ वलते वल्कं ॥ उष दाहे ॥ भ्वौ ॥ प ॥ ओष ॥५७॥
ति उल्का ॥ ज्वाला विभावसोरिति सुभूतिचन्द्रः ॥ इण् भी ॥ इण् गतौ ॥ आ ॥ प ॥ ईय
ते संख्यायते अनेनेति एकं संख्यान्तरं ॥ करणं ॥ ईयते प्राप्यते एकः मुख्यः ॥ कर्म ॥ ततिधा
तूनामनेकार्थत्वाद्भिन्नः केवलश्च भवति एकः ॥ कर्ता ॥ एके मुख्यान्यकेवलाः एकं ८३
संख्यान्तरं श्रेष्ठे केवले ज्ञेयौ त्रिषु इति मेदिनी ॥ ञिभी भये ॥ ज्यौ ॥ बिभेति

भेको मण्डूकः ॥ बिभेति अस्मादिति भेको मेषः ॥ अपादानं ॥ कै शब्दे ॥ भ्वौ ॥ कायति का
कः ॥ पा पाने ॥ भ्वौ ॥ प ॥ पिबति दुग्धमिति पाकः शिशुः ॥ शल चलने ॥ भ्वौ ॥ आ ॥ शल्यते
शल्कं ॥ अत सातत्यगमने ॥ भ्वौ ॥ प ॥ अतति अत्कः ॥ मर्च शब्दे ॥ चौ ॥ मर्चयति केम
र्कः ॥ णीङ् ॥ ओहाक् त्यागे ॥ ज्वौ ॥ प ॥ निहीयते निहाका ॥ कर्म ॥ णौसदः ॥ षद्लृ विशर
पी.प रणगत्यवसादनेषु ॥ भ्वौ ॥ प ॥ निषीदति प्राप्नोति सुकृतिनं निष्कः ॥ निष्कमस्त्री
साष्टहेम्नि ताते हीनारकर्षयोः ॥ वक्षोलंकरणे हेममात्रे हेमपलेपि चेति मेदिनी ॥
स्यमेः ॥ स्यमु शब्दे ॥ भ्वौ ॥ प ॥ स्यमति भुजंगादिरत्रेति स्यमीको वल्मीकः ॥ अधिकरण ॥
स्यमति पाठिरणो अत्रेति स्यमीको वृक्षभेदः ॥ अजियु ॥ अज गतौ क्षेपणे च ॥ भ्वौ ॥ प ॥ अ
जति वीकः ॥ यु मिश्रणे ॥ आ ॥ प ॥ यौति यूका ॥ धूञ् कंपने ॥ स्वौ ॥ धूनोति धूकः ॥ णीञ्
प्रापणे ॥ भ्वौ ॥ नीयते प्राप्यते पक्षिभिरिति नीकः ॥ कर्म ॥ अजादीनां दीर्घविधिसामर्थ्या
द्गुणाभावः ॥ ह्रियः ॥ ह्री लज्जायां ॥ ज्वौ ॥ अस्मात्कन् धातोर्दीर्घत्वं च ॥ तत्सामर्थ्याद्गु

॥५७॥ गुणाभावः। हृयणं ह्रीका। भावे प्रत्ययः। शाके। शक्लृ शाको। भौ० पा०। शाक्नोतिभ
ज्ञ सिगवुं शाकुं तिपाद्धि शाकुनि शाकुं तत्र शाकुन द्विजा इत्यमरः। कन्नाभुवः। भूस
त्तायां। भवति भवंतिः। कृदिकारादक्तिनः इति ङीष्। भवंती। लट् संज्ञा। अस्ति भवंती परः
५८ प्रयोक्तव्य इति भाष्यं। वहेर्वाना अवरहुणादौ। भौ० पा०। अवतीति अवंतिः। वदव्य
क्तायां वाचि। भौ० पा०। वदनं वदंतिः। भावे प्रत्ययः। उ सितो वदंती। किंवदंती जनश्रुतिः।
कन्नुच। क्षिप प्रेरणे। तौ० उ०। क्षिपति। प्रेरयति। मानिनीकांतं प्रतिगंतुं। क्षिपणुर्वसंतः।
क्षिपति रिपुं क्षिपणुर्देहः। क्षिपति घ्राणेंद्रियं प्रेरयति क्षिपणुः सुरभिद्रव्यं। क्षिपणुः
स्तुमान्देहे सुरभौ वाच्यलिंगक इति मेदिनी। भू सत्तायां। भवति। समर्थो भवति। ॥५८॥
भुवन्युः स्वामिसूर्ययोः। भवति प्रभवति तमस्तापं व्यापने तु। भुवन्युः स्यात्प्रभान्
मानौ ज्वलने शशलांछने इति विश्वः। अनुङ्। णद अव्यक्ते शब्दे। भौ० पा०। नदति नदनुः।
क्षिप प्रेरणे। तौ० उ०। क्षिपति। क्षिपणुः। ऊरट। कृ विक्षेपे। तौ०। किरति पुष्पाणि करुणेः ट ४७

रुग्भेदः। किरति नैर्घृण्यं। करुणा। दृ अवदारणे। सौ०। दृणेति। वरुणः। दृ विदारणे। क्रै०।
दारयति। दारुणं। चोरयसोवा। तॄ प्लवनतरणयोः। भौ०। तरति। छुतनगतिं करोति।
तरुणः। क्षुधि पिशि। क्षुध बुभुक्षायां। दै० पा०। क्षुध्यति। क्षुधुनः। पिश अवयवे। अयं
दीपनायामपि। तौ० पा०। पिंशति। क्रोधं दीपयति। पिशुनः। मिथिः। सौत्रो धातुः। मेथति
मिश्रीभवति। मिथुनं युग्मं। फलेः। फल निष्पत्तौ। भौ० पा०। अस्माडुनन् गुगागमश्च
धातोः। फलति। फल्गुनः। अशेर्णित्। अश्नाद्वित्यात्पक्षेऽणित्यर्थः। फल्गुनः फाल्गुनोऽ
र्जुने इति द्विरूपकोशः। अशेः। अश भोजने। क्रै० पा०। अश्यते। रोगिभिः। लशुनं। कर्म।
अर्जेः। अर्ज प्रतियत्ने। अयमर्थांतरेऽपि। चौ०। अर्जयति यशः। अर्जुनः। इह णेरनिटीति
णिलोपेनैव सिद्धे णिलुक् च ये तु क्तेः फलं चिंत्यं। तृणाख्यायां। अर्जयति। धात्वनामने
कार्थत्वात् उत्पादयति दुग्धादिकं। अर्जुनं तृणं। चित्वात्। चितः। अंतोदात्तः स्यादिति
अंतोदात्तः। अर्तेश्च। ऋ गतौ। भौ०। अस्माडुनन् स्यात् स च चित्। ऋच्छति। सारथित्वं दया

चलंया। अरुणः। अनूरुः सूर्यसूतः। अजियमि। अज गतौ क्षेपणे च। भौ०पा०। वीयते ऽत्र। वहु
नो अधिकरणे। यम उपरमे। भौ०पा०। यच्छति। विरमयति पापं भक्तानां। यमुना। अंतर्भावित
ण्यर्थः। शीङ् स्वप्ने। आ०पा०। शेते ऽन्यर्थां। शकुनः। वृदृवदि। वृङ् वरणे। क्रै०। वृणीते। आवृणोति।
वसंति तु वेति नेदं। वत्वं तु न भवति। पत्येकर्तर्य्येवा हुलकेन प्रत्ययसंज्ञायां अप्रदन्नेः क
ल्पशब्देतु भवत्येव। एतच्च भाष्यकैयटादिपर्यालोचनयोक्तं। कथं तर्हि सर्वैरपुणादिवृत्ति
कारैः षत्वमिह उदाहृतमिति चेत्। आहुः। अस्त भाष्यप्रामाण्यात् वसंतसमितिदं ५८
त्य पाठेपि साधुः। पक्षे तु षत्वमस्तु। बाहुलकलभ्यषत्वाभावस्य पाक्षिकत्वेपि बाध
काभावात्। अज्जियोभयादीनामुपसंख्यानेन नपुंसके क्तादिनिष्ठत्वमित्यत्र वर्षाभि
त्या करेउदाहृतत्वात्। तस्मादिह द्विरूपता फलिता। वर्षो ऽस्त्री भारतादौ स्यात् संव
त्सरपावृष्ट्योः। प्रावृट्कालस्त्रियां भूम्नीति मेदिनी। तृप्लवनतरणयोः। नरति। नर्स ४०८
न्नवसमुद्रयोः। नरति लङ्कां अनेन तर्षः। त्रिषा। करणे। तरति गमनं करोत्यनेन। तर्षः।

पिपासा। करणे। तर्षो ऽभिलाषोदन्ययोरिति मेदिनी। वद व्यक्तायां वाचि। भौ०प। वदतीति सो
ति पित्राद्विकं वत्सः। पुत्रादिः। वदति शब्दं करोतीति वत्सः। सद्यो जातगोवत्सः। वदतीति धा
तूनामनेकार्थत्वाद्वृणोति मासादिकं वत्सः। वर्षः। वदति धातूनामनेकार्थ
त्वाद्वसति विशालतोयं। वत्सं वक्षः। अधिकरणे। पुत्रादौ तर्णके वर्षे वत्सः। क्लीबं
तु वक्षसीति त्रिकांडशेषः। सद्योजातस्तु तर्णकः। हन हिंसागत्योः। आ०प। हं
ति गच्छत्याकाशे हंसः। कमु कांतौ। कांतिरिच्छा। भौ०आ०। काम्यते पानकर्तृभि
रिति कंसः। कष हिंसायां। भौ०प। कषति तमः इति कहं न दंतं। प्लुषेः। प्लुषदा
हे। दि०प। प्लुष्यति तापमिति प्लक्षः। मनेः। मन ज्ञाने। दि०आ। मन्यते ऽनेनेति मांसं। ति४
कर्म। अशेः। अशू व्याप्तौ। स्वा०आ०। अश्नुते अनेन अंसः स्यात्। अश्नुते इति। अ
दंशः पाशकः। स्नुव्रश्चि। स्नु प्रस्रवणे। आ०प। स्नौति मधुरं वाणीमिति स्नुषा। पुत्र
वधूः। वृश्चू छेदने। तो०प। वृश्चति तापं वृक्षः। कृती छेदने। तो०प। कृंतति

कौ० ऋत्ति ३
टीका
उ०पा० ३

पिपासां कृसं । ऋषी गतौ । तौ । प । ऋषति स्यन्दनं करोत्वं । ऋषेर्जातौ । पूर्वस्त्रे ऐ
नार वमिद्धे ऋषेर्डौ वे वेति नियमार्थं सूत्रं । तेनान्येभ्यस्त्रिभ्यः केवलयौगिकत्वेपि
सप्रत्ययो भवति । ऋष्यते प्राप्यते तेन पाथिभिरिति । ऋष्यः पर्वतभेदः । ऋषति प
नायते स्मादिति । ऋष्यः । नद्युक्तः । अपार्दनं । उंद्रिगुधि । उरी दद्दने । रो । प । उन न
त्ति अनेनेति । उन्नः पक्ववर्णा वारी त्यमरः । करणं । गुध परिवेष्टने । दे । प । गुध्यते अ
मरैरिति गुन्सः स्तबकः । कर्म । कुष निष्कर्षे । निष्कर्षो निष्कोषणं । तत्रान्तर्गतस्य व ५०
हिर्निःसारणं । क्रे । प । कुष्णाति धर्न्यानन्तर्गतं रसं बहिर्निःसारयतीति कुष्ठोऽजठरं ।
गधि पर्यायोः । गधुः अभिकांक्षायां । दे । प । गध्यति कांक्षतां चंगः सः कामदेवः । करणं
पणस्तुतौ व्यवहारे च । भौ । आ । पणते व्यवहारं करोत्यत्र । पद्दः । मासाईकं । अ अधिकरणे
अशेः । अत्रव्याप्तौ । स्वौ । आ । अश्नुते अरुरं । वस निवासे । भौ । प । वसति मास ४९
मासादिरत्र वत्सरः । सः स्याईधातुके इति तः । अधिकरणं । सपूर्वा स्निग्ध । पूर्व सहिता

अनेन ४

द्वसतेः सरः स्यात्स च चित् । चित्त्वादन्तोदात्तः । संपूर्वादिति पाठान्तरं तच्चन्द्यविरो
धादुपेक्ष्यं । व्युत्पत्तिः पूर्वोक्तैव । कृधू । इ । हुकृञ् करणे । ना । करोति मिश्रीभावमिति कु
सरः । धन्वकंपने । स्वौ । धनोति धातूनामनेकार्थत्वान्निक्षेपको भवति । धन्वसरः । मद
हर्षे । दे । प । माद्यति धातूनामनेकार्थत्वात्संरोधो भवत्यनेन मत्सरः करणं । माद्यति
मधुं प्राप्य मत्सरा मक्षिका । पतेः । पत्लृ गतौ । भौ । प । पतति गच्छति अस्मिन्नापस्त
त्तः पंथाः । अधिकरणं । तन्यृषिभ्यां । तनु विस्तारे । ता । उ । तनोति स्तनयमत्वात् सरः । अ
धिकरणं । क्षणी गतौ । तौ । प । क्षणति । कार्यं कर्तुं गच्छति । कक्षरः । क्षत्विक् । पीयुक्षणिभ्यां ।
आभ्यां कालस्याद्यथाक्रमं ह्रस्वः संप्रसारणं । पीयुः सौत्रः । पीयति । प्रीतो भवत्यनेन
पियालः । करणं । राजादनं प्रियालः स्यादित्यमरः । प्रियालं स्यात्पियालवदिति द्विरूप
कोशः । प्रान्तेन भाषायां राजादनस्य चारोलीति नामधेयं । क्षणशब्दे । भौ । प । क्षणति जनाः
अत्र कुणप्सोदेशभेदः । अधिकरणं । कठिकुषिभ्यां । कठ कृच्छ्रजीवने । भौ । प । कठति । क

टकुः। कुषनिष्कर्षे। क्रै।पा। कुष्णाति। कुषाकुः। सर्तेः। सृगतौ। भौ। सरति। सृदाकुः। वृतेः। वृतुवर्त्तने। भौ। आ। वर्त्तनेकर्मणि। वार्त्ताकुरपि वार्त्ताकिरित्यपि दृश्यते इति द्विरूपो
विश्वः। वार्त्ताकं पिनलं किंचिदंगारपरिपाचितमिति वैद्यशास्त्रं। पर्देः। पर्दकुत्सितेशब्दे।
भौ। आ। अस्मात्काकुः स्यात् सयनितुथानोरेफस्य संप्रसारणमध्योपश्च। पर्दने। अस्मात् पृ
दाकुः। रेफस्य संप्रसारणेच नेनिमित्तापाये नैमित्तिकस्याप्यपाय इति द्वितीयदकारस्य
निवृत्तिः। अपादानं पृदाकुर्वृश्चिकेव्याघ्रेसर्पचित्रकयोः पुमानित्ति मेदिनी। सृयुः। सृगतौ।
भौ।प। सरति। सरण्युः। सरण्युस्तु पुमान्वारिवाहेस्यान्मातरिश्वनीति मेदिनी।
युमिश्रणे। आ।प। यौति। यवागूः। यवागूरुष्णिका श्राणा विलेपी तरला च सेत्य
मरः। वच परिभाषणे। आ।प। वक्ति। वचं कुस्तु पुमान्विप्रेवावदूकेभिधेय
वत्स्वति मेदिनी। आनकः। भीङ्भये। आदादिकः। शेते इति शयानकः। ञिभी।भ
ये। जौ। बिभेति। अस्माद्भयानकः। अपादानं। आणकः। धूञ्कंपने। क्रै। धुना
त्यनेनेति धवाणकः। करणे। धूञ्कंपने। सौ। धूनोति धवाणकः। शिंघि। आ

घ्राणे। शिंघति धातूनामनेकार्थत्वात् निः। सरति। शिंघाणकः। श्लेष्मा। डुधाञ्धा
रणपोषणयोः। जौ। धीयते धातूनामनेकार्थत्वान्नीयते अनेनेति धाणकः। परि
माणं करणं। उल्मुक। एते निपात्यंते। निपातनप्रकारमाह। उष दाहे इत्यस्मा
दिना। उषदाहे। भौ।प। ओषति उल्मुकं। दृविदारणे। क्रैप। दृणाति दर्विः। ओहाङ्
हाति। हो। मा। हूयः। ह्रीलज्जायां। जौ। जिह्रेति ह्रीकुः। हालिम गिरा इत्येह
सने। भौ।प। हसति। अनेनेति हसः। भङ्। ग्राणत्यागे। तुदादिः। म्रियते इति मर्त्याः
मर्त्यलोकः। तत्र भवो मर्त्यः। गृ निगरणे। तौ।प। गिरति गिरन्तः। इण्गतौ। आ।पा। ई
यते। ऐतं कर्म। वा गतिगंधनयोः। आ।प। वाति वातः। अम गत्यादिषु। भौ।पा। अ
मति। आज्ञो ति। अंतं स्वरूपं। अमति अनेनेति अंतः। नाशः। करणे। अमतिधा
तूनामनेकार्थत्वात् निष्पत्ति। अंतः शेषः। अम्यते प्राप्यते। अंतं। अंति कांति
मे। अंतं स्वरूपे नाशे नाने स्त्री शेषे ऽति केपि पुरित्ति मेदिनी। दमु उपशमे। दै।पा

कर्बुरः४

को॰ वृत्तिर टीका

द्राम्यति॥ अनेनेति दंतः॥ करणे॥ लूञ् छेदने॥ क्रै॥ लुनाति मंगलमिति लोतो ऽश्रु॥ लुनाति
धातूनामनेकार्थत्वात्संपृक्तं करोति लोतं चिह्नं॥ पूञ् पवने॥ पूक्रै॥ पुनाति पोतो बा
लः॥ पुनाति धातूनामनेकार्थत्वाच्चरति पोतः॥ नौकादिः॥ धुर्वी हिंसायां॥ औ॥ पा
धूर्वति धूर्त्तः॥ लोपो व्योरिति वलोपः॥ हलि चेति दीर्घः॥ बाहुलकात्॥ तुंकै राद्ये॥ औ॥ सू ४
पा॥ तो वसति॥ अनेनेति तूस्तं॥ पापं धूलिश्च॥ करणे॥ लुस्यते॥ अनेनेति लूस्तं जटा॥ कर स्नूयते ५
णे॥ नञ्याप॥ आप्लृ व्याप्तौ॥ औ॥ पा॥ अस्मान्नञ्युपपदे तन्स्यादिडागमश्च॥ बाहुलकान्नञो
नलोपाभावः॥ न आप्नोति व्याप्नोति॥ अज्ञायित्वात्॥ नापितः॥ तनिमृङ्भ्यां॥ तनु विस्तारे॥ ५२
ना उ॥ तनोति विस्ततं भवति॥ तन्तं वीणादिकं वाद्यमित्यमरः॥ मृङ् प्राणत्यागे॥ तौ॥ मरणं
~~धातूनामनेकार्थत्वाद्याचनं~~ मृतं॥ भावे प्रत्ययः॥ मृतं तु याचिते मृत्यौ इति मेदिनी॥ ४११
याचनस्य मरणतुल्यदुःखदत्वात् याचनमपि मरणमेव॥ अंजिघ्रा॥ अंजू व्यक्तिम्र
क्षणादौ॥ औ॥ पा॥ अज्यते॥ धातूनामनेकार्थत्वात्परिछिद्यते॥ अक्तं परिछिन्नं॥ कर्म॥

अक्तः परिमाणवाचक इति नाथकैयटेन व्याख्यातत्वात्॥ घृ क्षरणदीप्त्योः॥ औ॥ जि
घर्त्ति प्रदीप्तो भवत्यनेना घृतं॥ करणे॥ षिञ् बंधने॥ सौ॥ सिनोति॥ ऽयेतः॥ सितं धवलं॥
द्रुतनिभ्यां॥ द्रुगतौ॥ औ॥ पा॥ द्रवति द्रुतः॥ तनु विस्तारे॥ ना उ॥ तनोति सुखं॥ तानः॥ जेमूङ्
जिजये॥ औ॥ अस्मात्क्तप्रत्ययस्तस्योदात्तमूडागमः स्याद्दीर्घ इत्यजस्याधातोर्दीर्घश्च॥
ए तौ क्तांतौ निपात्येते॥ जयति जीमूतः॥ मेघः॥ लोष्टपलितौ॥ लूञ् छेदने॥ क्रै॥ लुनाति॥ लोष्टं॥ पलगतौ॥ औ॥ पा॥
पलति॥ अस्मात्क्तप्रत्ययः॥ पलितं॥ केशपाकः॥ अपादाने॥ हृश्याभ्यां॥ हृञ् हरणे॥ औ॥ हर
ति चित्तं॥ हरितः॥ नीलवर्णः॥ [redacted] श्यैङ्गतौ॥ औ॥ श्यायते चित्तमत्र॥ श्येतः॥ विशदश्वे
तपांडुरा इत्यमरः॥ अधिकरणे॥ रुहेः॥ रुह बीजजन्मनि प्रादुर्भावे च॥ औ॥ पा॥ रोहति
प्रादुर्भवति॥ रोहितो मृगमत्स्ययोः॥ रोहति धातूनामनेकार्थत्वाद्गच्छति येतो ऽत्रा
लोहितं॥ प्रकवस्त्रादि॥ अधिकरणे॥ पिशेः॥ पिश अवयवे॥ अयं दीपनार्थमपि॥ तौ॥
पा॥ पिंशति रूपं दीप्तं करोति॥ पिशितं मांसं॥ श्रुदक्षि॥ श्रु श्रवणे॥ औ॥ श्रूयते यत्तं ग

त्वेन। अवाच्यः। यज्ञपशुः। कर्म। स्तम्बह्यो शिभ्यार्थे च। भौ० आ० दशनेवर्द्धते दशाय्यः।
गरुडः। दशने मांसार्थं शीघ्रं गच्छति दशाय्यो गृध्रः। स्पृह ईप्सायां। चुरादिरदंतः। अ
स्पृहयति स्पृहयाय्यः। श्रयामंते निलीयंते यत्र। ग्रह ग्रहणे। चुरादिरदंतः। भ्वा। गृहयते
गृहयाय्यः। दिधिषाय्यः। दुधाञ् धारणपोषणयोः। जौ। मित्रइव यो दिधिषा
य्यो भूदिति वैदिकप्रयोगः। वृञः। वृञ् वरणे। सौ। व्रियते वरेण्यः श्रेष्ठः। कर्म। ६३
स्तुवः। ष्टुञ् स्तुतौ। आ० उ। स्तूयते इति स्तुषेय्यं। कर्म। स्तुषेय्यं स्तोतव्यं पुरुवर्पसं
बहुरूपमिति वेदभाष्यं। राजेः। राजृ दीप्तौ। भौ० उ। राजनि राजन्यः। शृरम्योश्च।
शृ हिंसायां। क्र्यै। शृणाति अर्थिनां भयमिति शरण्यं। अर्तिहरः। रमु क्रीडायां। भौ
आ० रमंते अस्मिन्निति रमण्यं शोभनं। अधिकरणे। अर्तेः। ऋ गतौ। भौ। अर्यते
मृगश्वापदादिभिरिति अरण्यं वनं। कर्म। पर्जन्यः। पृषु सेचने। भौ० प०। पर्ष ७१२
ति सिंचति पर्जन्यः। अंतर्भावितण्यर्थः। पर्षति सिंचति पर्जन्यो
मेघः। वदेः। वद व्यक्तायां वाचि। भौ० प०। गुरुस्तां वदति वदान्यः। त्यागी। वद

ति वदान्यो वाग्मी। अमिनक्षि यजि वधि पतिभ्योऽत्रन्। अम गत्यादिषु। भौ० प०। अम्यते भोजनार्थिभिरि
त्यमत्रं भाजनं। कर्म। णक्ष गतौ। भौ० प०। नक्षति नक्षत्रं। यज देवपूजादौ। भौ० उ।
इज्यते यजत्रो यष्टव्यो देवः। कर्म। वध हिंसायां। इदंतः। वधति अनेनेति वधत्रं आयुधं।
करणं। पत्लृ गतौ। भौ० प०। पतति पतत्रं। गडेः। गड सेचने। भौ० प०। गडति धातूना
मनेकार्थत्वादस्मादवयवाः स्थूलीभवंति कडत्रं श्रोणिः। गडति स्नेहेनेति क
मायी३ कडत्रं। कडत्रं श्रोणिर्भार्यायो हरिस्मरः। वृञः। वृञ् वरणे। स्वौ। वृणोति वरत्रा।
सुविदेः। विद ज्ञाने। आ० प०। सुविद्यते ज्ञायते स्वीयत्वेन सुविदत्रं कुटुंबं। कर्म। इह क
त्रान्निति केचिन्नितं पठंति तन्मते साम्यादिकं। इह स्वमते सुविदत्रं श्रोणिराद्ये स्यादौ नित्स्वरा
दस्तिमात्र। कृतेः। कृती छेदने। तौ० प०। कृंतति कृंतत्रं। भ्रमदशि। भृञ् भरणे। भौ
भरति नाट्यशास्त्रं निर्माणे कौशल्यं वेषधारणे च भरतो नाट्यशास्त्रमुनिर्नटश्च। भर
ति पालयति प्रजां भरतो रामानुजो दौष्यंतिश्च। भरतो नाट्यशास्त्रमुनौ नटे। रामानुजे

चद्दौर्घ्यतोद्‌इतिमेदिनी। मङ् प्राणत्यागे। ७ तौ। म्रियते अनेनेति मरतो मृत्युः। करणं।
दृशिर् प्रेक्षणे। भ्वौ। प। पश्यति अनेन। दर्शतः सोमसूर्ययोः। करणं। यज देवपूजा
दौ। भ्वौ। उ। यजति यजतः। पर्व पूरणे। भ्वौ। प। पर्वति पर्वतः। डुपचष् पाके। भ्वौ। उ। प
चति अनेनेति पचतो ऽग्निः। करणं। अम गत्यादिषु। भ्वौ। प। अमति पापिनां अम
नः। नमु कांक्षायां। दै। प। ताम्यति तमतः। णम प्रह्वत्वे शब्दे च। भ्वौ। प। नमति नमतः। ६४
हर्य गतिकांत्योः। भ्वौ। प। हर्यति हर्यतः। पृषिरंजिभ्यां। पृषु सेचने हिंसाक्लेशनयोश्च। साध्य
भ्वौ। प। पर्षति हिनस्ति तृणानि पृषतो मृगः। पर्षति सिंचति पृषतो बिंदुः। रंज रागे। प?
भ्वौ। उ। रजत्यस्मिन्निति रजतं। अधिकरणं। स्रवति। स्रवन संचलने। भ्वौ। प।। स्रव
ति केत्रा अस्मादिति स्रवति। निर्झरः। अपादानं। शीङ् शीपि। शीङः स्वप्ने
आ। शेते ऽस्मिन् शयथः। शप आक्रोशे। भ्वौ। उ। शपति अनेनेति शपथः। करणं। रु
शब्दे। आ। रौति रवथः। गम्लृ गतौ। भ्वौ। प। गच्छति गमथः पथिकः। गच्छति अस्मिन् ग ५२
मथः पंथाः। अधिकरणं। वंचु प्रलंभने। चुरादिः। आ। वंचयते वंचथः। वदि अभिवाद

नस्तुत्योः। भ्वौ। आ। जीव प्राणधारणे। भ्वौ। प। जीवति जीवथः। अन प्राणने। प्रपूर्वः। आ। प।
प्राणिति बलवान्‌ भवति प्राणथः। बलं। शमु उपशमे। दै। प। शमथः। भावे प्रत्ययः। श
दमु उपशमे। दै। प। दमनं दमथः। भावे प्रत्ययः। क्षम। डुभृञ् धारणपोषणयोः। जौ। बि शमनं
भर्ति। लोकान्‌ भरथः। रुदिविदिभ्यां। रुदिर् अश्रुविमोचने। आ। प। विद ज्ञाने। आ। प। वेत्ति
विदथो योगी सतिनो रिति मेदिनी। उपसर्गे वस निवासे। भ्वौ। प। अस्मादुपसर्गेऽनुपपदे अ
थः स्यात्। आवसत्यत्र आवसथः गृहं। अधिकरणं। संवसत्यत्र संवसथो ग्रामः। अधिक
रणं। अत्यविः। अत सातत्यगमने। भ्वौ। प। अतति। अतसः वायुः। अतति धातूनामनेकार्थ
त्वात्‌ व्याप्नोति। अतसः आत्मा। अव रक्षणे। दै। भ्वौ। प। यमु अदने। भ्वौ। प। तमु कांक्षायां।
दै। प। ताम्यति। इच्छति। दीपमत्र तमसो ऽंधकारः। अधिकरणं। णम प्रह्वत्वे शब्दे च। भ्वौ। प।
नमति। नमसः। रभ राभस्ये। भ्वौ। आ। रभणं। धातूनामनेकार्थत्वात्‌ हर्षणं। रभसो हर्षः।
भावे प्रत्ययः। रभणं जवनं। रभसो वेगः। भावे प्रत्ययः। डुलभष् प्राप्तौ। भ्वौ। आ। लभ्य
ते लुभ्यति लिंग। लभसो धनं। कर्म। लभते दैन्यं लभसो याचकः। कर्त्तरि। णभ हिंसायां।

ण्यादावयं आत्मनेपदी। क्र्यादौ परस्मैपदी। नमति नम्नाति वा दृग्गोचरत्वं। नभसः। आ
काशः। अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमित्युक्तेर्ण्यादावात्मनेपदिनोपि न मते
परस्मैपदी। तप संतापे। भ्वौ। प। तपति। धातूनामनेकार्थत्वाद्गच्छति। तपसः। पक्षी। तपति।
संतापयति विरहिणीं विरहिणां तपसः। पंदः। पत्त्व गतौ। भ्वौ। प। पतति। गच्छति। पतसः।
पक्षी। पनस्के तौ व्यवहारे च। भ्वौ। आ। आयादय आर्द्धधातुके वा इत्यायाभावपक्षे। पन्यते। ५१
स्तूयते जनैः। पनसः। कंटकिफलः। कर्म। पण व्यवहारे स्तुतौ च। भ्वौ। आ। पण्यते। विक्रीयते।
पणसः। पण्यद्रव्यं। कर्म। मह पूजायां। भ्वौ। प। मह्यते। सद्भिः। महसः। ज्ञानं। कर्म। वेञः। वेञ् तं
तु संताने। भ्वौ। वयति। धातूनामनेकार्थत्वान्निर्माणं वयति। वेतसः। वानीरः। वहियुभ्यां। वह प्रापणे।
भ्वौ। उ। वहति प्राप्नोति शयनं। वाहसः। युमिभ्यां णित्। मिश्रणे। भ्वौ। आ। प। यौति। मिश्री भवति।
यावसः। वय च। वय गतौ। भ्वौ। आ। वयते। वायसः। दिवः। दिवु क्रीडादिषु। दै। प। दीव्यंति व्यव ८४
हारं कुर्वंति जनाः अत्र। दिवसं। अधिकरणं। उद्दः। उर्द्द विक्षेपे। तौ। किरति। आम्रपल्लवं। क
रभः। उष्ट्रः। शृ हिंसायां। क्रै। शृणाति। शरभः। शल्ल गतौ। भ्वौ। प। शलति दीपं प्रति। शलभः।

कल गतौ। चुरादिरदंतः। कलयति हस्तिनी प्रति। कलभः। गर्द शब्दे। भ्वौ। प। गर्दति। ग
र्दभः। ऋषिवृषिभ्यां। ऋषी गतौ। तौ। प। ऋषति। शोभते गिरिः। ऋषभः। औषधांतरं। क
र्म। ऋषति। श्रोतनिः। ऋषभः। स्वरभेदः। कर्म। ऋषति गच्छति। ऋषभः। वृषः। कर्त्ता
ऋषति शब्दं प्राप्नोति। ऋषभः। कर्णरंध्रं। कर्त्ता ऋषति स्वरं प्राप्नोति। ऋषभः। ग
र्द्दभपुछं। कर्त्ता। ऋष्यते प्राप्यते जनैः। ऋषभः। श्रेष्ठः। कर्म। ऋषति नराकारं प्राप्नोति।
ऋषभा नराकृतियोषित्। ऋषभस्त्वौषधांतरे। स्वरभिदृषयोः कर्णरंध्रगर्द्दभ
पुछयोः। उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति। इति मेदिनी। वृषु सेचने।
हिंसासंक्लेशनयोश्च। भ्वौ। प। वर्षति। हिनस्ति मनुष्यादीन्। वृषभः। ऋषेः। ऋष हिंसा
यां। भ्वौ। प। रोषति। वृषभः। रासिवल्लिभ्यां च। रासृ शब्दे। भ्वौ। आ। रासते। रासभः।
वल्भ संवरणे संचरणे च। भ्वौ। आ। वल्भते चेतोऽत्र। वल्भभः। अधिकरणं। जृवि
शिभ्यां झच्। जृष् वयोहानौ। क्रै। जृणाति। अस्मात् जरंतः। अपादानं। विश प्रवेशने। तौ। प।
वि शंति जना अस्मिन् वेशंतः पल्वलं चाल्पसरः इत्यमरः। अधिकरणं। नदि नंदी।

बिभ्रंजन्मोचे = आशिषि गम्यमानायां रिभ्योऽऋचु स्यात् । स च षित् स्यात् । ऋह इषिंडेंन आनि बी१
प्रादुर्भावे च । भौ । प । ऋह्यात् । रोहंतौ । वृहु भेदः । कर्त्ता । ऋह्या । हीति = आशीर्वाद विषयी
भूत पदार्थो रोहंतः । एवमग्रेपि । टुनदि समृद्धौ । भौ । प । नंद्यात् । नंदंतः । जीव प्राण
धारणे । भौ । प । जीव्यात् । जीवंतः । = अन प्राणने । अ । प । प्र सर्वः । अन्यात् प्राण
तः । = आनितेरिति णत्वं । ऋह्यात् । रोहंती । विरुत् । [illegible] वहि । = आशिषि रिभ्योऽदश
भ्योऽऋचु स्यात् स च जित् । न हि प्रवर्तनं तरणयोः । भौ । प । तीर्यात् । तरंतः । तरंती । भू सत्ता ६६
यां । भूयात् । भवंतः । वह प्रापणे । भौ । उ । उह्यात् । वहंतः । वस निवासे । भौ । प । उष्यात् ।
वसंतः । भास दीप्तौ । भौ । आ । भासिषीष्ट । भासंतः । साध संसिद्धौ । सौ । प । साध्यात् । सं८
साधंतः । गड सेचने । भौ । प । गड्यात् । गडयंतः । णिरुत्तप्रेषणः । मडि भूषा
यां । चौ । मंड्यात् । मंडयंतः । जि जये । भौ । जीयात् । जयंतः । टुनदि समृद्धौ । भौ । प ।
णयंतः । नंद्यात् । नंदयंतः । नंदकः । कौ देवकीगरवद्धौ नंदकः । कौस्तुभो मणिः स्त्रियमरः । ४५
उत्सवे नंदत स्तु नंदं तत इत्युदाहृत्य पूर्वसूत्रेण गणनाथ नाम्नां का च = अनाशीरर्थं नांदि

गृहणामित्याह । तच्चिंत्यं । इहापि = आशिषीत्यस्य स्वयमेवानुवृत्तेः [illegible] नत्वा । नाइं
तः । इन हिंसागत्योः । = आ । प । अस्मात् ऋचु स्यात् तस्य भुडागमे धातोर्ह्रस्वश्च रेफश्च ।
हंति दुर्गतान् सत्वान् इहेमंतः । भंदः । भदि कल्याणे सुखे च । भौ । आ । भंदते सुखं प्राप्नो
ति भंदंतः । ऋछेः । ऋछ गत्यादिषु । तौ । प । ऋछति धनिकान् । ऋछरा । वाङ्गलकान् । उम्भ
ऊर्ज परस्मैभाषणा । हिंसा तर्जनेषु । भौ । दिवौ । परस्मैपदिनो । ऊर्जति हिनस्ति गतिं
ये६ ऊर्जर्ता शौचवर्त्तिं । ऊर्जति तर्जति रिपून् जर्जरं शत्रु क्रोधजः । ऊर्जति विभो । ति ऊर्जरो ऊर्जरन्
रः । ऊर्जरं रौचवच्छेत्राक्रोधजे [illegible] त्रिषु ऊर्जरश्चार इति मेदिनी । ऊर्जति नरान् तर्जति ये६
ऊर्जकरः कलियुगः । ऊर्जति शोषं करोति ऊर्जरः । वाद्यभेदो नदांतरं च । ऊर्जरः स्यात् कलि
युगे वाद्यभेदे नद्यांतरे इति मेदिनी । = आर्त्तिकमि । ऋ गतौ । भौ । प । ऋछति धातूना
मनेकार्थत्वात् निवारयति पव्यत्वारं = अररं कपाटं कमु कांतौ । भौ । आ । कामयते
कमरः । आयादय = आर्द्धधातुके वा इति विकल्पेन णिङभावः । अम गत्यादिषु चलने । भौ । प ।
अमति अमरः । चमु अदने । भौ । प । चमति भक्षिका इति चमरः । दिवु क्रीडादिषु ।

दे॥ भ्वा॰ पा॰ रायंतः॥ दीव्यति देवरः। वस निवासे। भ्वौ॰ पा॰ ण्यंतः। वासयति वासरः। कु
वः। कुश्शब्दे। भ्वा॰ प॰। कौति। कुररः। अंजि मर्दि अजि गतौ। भ्वौ॰ प॰ अंगति अस्मादंगारः।
अपादाने। मदी हर्षे। दै॰ प॰ माद्यति। पुष्टो भवति मदारो वराहः। मदि स्तुति मोदमद
स्वप्नकांतिगतिषु। भ्वौ॰ आ॰ मंदते कुष्ठत्यनेन मंदारः। सुरद्रुमः। करणे। गडेः। गड सेचने।
भ्वौ॰ प॰ गडति धातूनामनेकार्थत्वादुच्छति चित्तमत्र। कडारः कपिलः। अधिकरणे। गड
ति धातूनामनेकार्थत्वात्सेवति कडारो दासः। कडारः कपिले दासे इति मेदिनी॥ शृंगार
भृंगारौ। एतौ निपात्येते। शृ हिंसायां। क्यै॰ शीर्यते धातूनामनेकार्थत्वाद्दा। श्रीयते विलासि
भिः। शृंगारो रसः। कर्मणि। डुभृञ् धारणपोषणयोः। जौ॰ बिभर्ति। भृंगारः। भृंगारी झिल्लि
कायां स्यात्कनकालौ पुनः पुमानिति मेदिनी। कंजिमृजिभ्यां। कंजिः सौत्रः। कंजति।
नृत्यति। कंजारो मयूरः। मृजू शुद्धौ। भ्वा॰ आ॰ पा॰ मृज्यते। अपनीयते। मार्जारः। बिडालः। क
र्मणि कमेः। कमु कांतौ। कांतिरिच्छा। भ्वौ॰ आ॰ काम्यते। कुमारः। बालः। कर्मणि तुषारादयश्च।
१ प्रा॰ नौ॰। एते निपात्यंते। तुष तुष्टौ। दै॰ प॰। तुष्यत्यनेन तुषारः स्तुहिनं हिममित्यमरः। करणे। कास्

शब्दकुत्सायां। भ्वौ॰ आ॰ कासते। धातूनामनेकार्थत्वाच्छोभते कासारः। सरस्सरसि।
भ्वौ॰ आ॰ सह्यते धातूनामनेकार्थत्वाद्भ्राजते। सहारः आम्रभेदः। कर्मणि। दीङः। दी
ङ् क्षये। दै॰ आ॰ दीयते। नाशयति दुःखं। दीनारः सुवर्णाभरणं। अंतर्भावितण्यर्थः। कर्त्त
र्त्तरि। सृ गतौ। भ्वौ॰ धावति रवं स्य स्मात्। सर्षपः। अपादाने। शीङ्गतौ पा॰ प्राप्नो
ति शिति धौ शदेशः। उषिकुटिभ्यां। उष दाहे। भ्वौ॰ प॰ ओषति। उषपः। कुट कौटिल्ये। तौ॰
प॰। कुटति। मानकाले कुटिलो भवति। कुटपो मानभांडं। दल विशरणे। भ्वौ॰ प॰
दलति। विदारयति। अनेन। दलपः। प्रहरणं। अंतर्भावितण्यर्थः। करणे। कच बंध
ने। भ्वौ॰ आ॰ कचते। बध्नाति चित्तं। कचपं खजमंथे। भ्वौ॰ प॰ खज्यते। खजपं दधि।
कार्यकारणयोरभेदोपचारात् खजपं घृतमपि। कर्मणि। कणेः। कण शब्दे। भ्वौ॰ प॰ कणं
ति काकादयोऽत्र। कुणपः शवमस्त्रियामित्यमरः। भागत्यागलक्षणया। कुणपं शरीर
मपि। शयनासनयानानि कुणपं स्त्रीमुखं कुशाः। यत्पात्राणि सर्वाणि न दुष्यंति बुधाः॥

कपिदिति। स्कंदो के:। विटपपिष्टपौ। एते निपात्यंते। विट शब्दे। भौ० पा० वेटति स्तंबेरमत्वा
त् शब्दं करोति। करी। अत्र। विटप: स्तंब:। अधिकरणे। वेटति पक्षी अत्र। विटप: शाखा
विस्तार: पल्लवश्च। अधिकरणे। विटपो न स्त्रियां स्तंब शाखा विस्तार पल्लवे इति मेदि
नी। विश प्रवेशने। तौ० पा० विशंति प्राणिनोऽस्मिन्। पिष्टपं भुवनं। अधिकरणे। एतन्न उ
ज्वलदत्तरीत्योक्तं। अन्ये तु सूत्रे विष्टपेति दंत्योष्ठ्यादिमेव पठंति। युक्तं चैतत्। यत्र ब्रह्म ५८
स्य विष्टपमित्यादौ तथा दर्शनात्। अमरकोशे विष्टपं भुवनं जगदिति प्रचुर पाठश्च। वि
शंति जना: अत्र। विशिपं मंदिरं। अधिकरणे। वल संवरणे संचरणे च। भौ० आ० वलंते
संचरंति पशवोऽत्र। उलपं। बालतृणे। अधिकरणे। वृते:। वृतु वर्त्तने। भौ० आ० वर्त्तंते
वर्त्तिका। शकुनिर्वा। वर्त्तिका शकुनौ प्राच्यां। उदीच्यां तु वर्त्तिकेत्युक्ते:। कृतिभिदि। कृती
छेदने। तौ० पा० कृंतति दु:खं। कृत्तिका। नक्षत्रं। भिदिर् विदारणे। रौ० उ० भिनत्ति योरस्थ ४७
न्नं। भित्तिका। कृत सौत्रो धातु:। कृतति गच्छत्यस्या: कृत्तिका गोधा। अपादाने। इषशिभ्यां।

५६
४१

इष इच्छायां। तौ० प० इष्यते गृहस्थिभि:। इष्टका। कर्म। अश भोजने। क्रै० प० अश्नंति अस्यां देव
पितृभूतानीति। अष्टका। श्राद्धतिथि:। अधिकरणे। इण:। इण् गतौ। आ० प० एति वेदं।
एतश:। ब्राह्मण:। स एव एतशा:। अत्यसंतस्येति दीर्घ:। एतशसौ। एतशस:। वीपतिभ्यां।
वी गत्यादिषु। आ० प० वीयते प्राप्यते भृत्यै:। वेतनं। कर्मणि प्रत्यय:। पत्लृ गतौ। भौ० प० प
तंति जना अस्मिन्। पत्तनं पुटभेदनमिति पुरीपर्यायेष्वमर:। अधिकरणे। दृदलिभ्यां।
दृ विदारणे। क्रै० दृणाति पापं दर्भ:। दल विशरणे। भौ० प० दलति। अंतर्भावित ण्यर्थत्वा
त् दारयति पापं रिपूंश्च। दल्भ: स्याहृषि चक्रयो:। अर्त्तिगृभ्यां। ऋ गतौ। जौ० इयर्त्ति के।
अर्भ:। शिशु:। संज्ञायां कनि अर्भक:। गृ निगरणे। तौ० जीर्यते निष्कास्यते। गर्भ:। कर्मी
इण:। इण् गतौ। आ० प० एति करिणीं प्रति इभ:। अससंजिभ्यां। असु क्षेपणे। दै० पा० अ
स्यते। अस्थि। कर्म। षंज संगे। भौ० पा० सजति। ऊर्वंतरेण मिलति। सक्थि क्लीबे पुमानूरु
रित्यमर:। क्षुधिकुषि। क्षुध दाहो। दै० पा० क्षुध्यति। क्षुत्। कुष निष्कर्षे। क्रै० पा० कुष्णाति।

को०टी०२
टीका

उ०पा०३

अन्नांतर्गतंबहिर्निष्कासयति।कुक्षिः।पिचंडकुक्षीजठरोदरंतुंदं इत्यमरः।शुषशोषणे।
दैपा।शुष्यति।शोषयति।शुक्षिर्यातः।अंतर्भावितण्यर्थः।अशेः।अश्नूयामे।सौ।आ।
अश्नुतेरूपं।अक्षि।इषेः।इषइच्छायां।नौपा।इष्यतेजनैः।इक्षुः।रसालइक्षुरित्यमरो
क्तेरिक्षुः।पुंसि।कर्मा।अविन्द्रा।अवरक्षणादिषु।भौ।पा।अव्यतेजनैः।सा।अवीः।रजस्व
ला।कर्मा।तॄप्लवनतरणयोः।भौ।तरति।तीर्यतेनयावातरीः।स्त्रियांनौस्तरणिस्तरीरि ५४
त्यमरः।कर्त्ता।करणं।यास्तृञ्आच्छादने।कै।स्तृणातिस्तरीः।धूमः।तन्निकुटुंबधारणे।
यौ।आ।तंच्यते[कुटुंबपोषणंक्रियतेऽनयातंत्रीवीणादेर्गुणः।करणं।यापोः।याप्रा
पणे।आप।याति।ययीः।अश्वः।बाहुलकान्नपूर्वस्याभ्यासस्यान्नातेनह्रस्वत्वं।पारदणे।
आप।पाति।लोकमिति।पपीः।लक्षेः।लक्षदर्शनांकनयोः।यौ।लक्षयति।पुण्यकृतः।लक्ष्मीः।
पद्मालक्ष्यते।पुण्यकृद्भिः।लक्ष्मीः।विभूतिः।कर्म।लक्ष्मीः।पद्माविभूतिश्च।इत्युणा ५५
दौतृतीयःपादः।वातप्रमीः।वातशब्देऽउपपदेमाङ्माने इत्यस्माद्धातोरीप्रत्ययःस्या
त्सचकित्।कित्वादालोपः।वातंप्रमिमीते।वातप्रमीर्वातमृगः इत्यमरः।निपातोयं।अयमिति।

सुभूतिस्यंप्रादिल्निर्वातप्रमीशब्दस्यद्विलिंगतोक्तेरितिभावः।तत्रऋदिकारादितिपाद्
कोङीष्केश्चिदिष्यते।नहिकारग्रहणेकेवलग्रहणमितिहुनिश्चयेनपरिभाषितं।अत
एववातप्रमीश्रीलक्ष्मीतिपदेडूंनाःसुसाधवः इतिरक्षितः।लक्ष्मीर्लक्ष्मीः हरिस्त्रियां।
४६ इतिद्विरूपकोशः।सनन्यंजिः।सगतौ।भौ।सच्छति।बद्धमुष्टितांप्राप्नोति।रत्निः।बद्धमु
४१ ष्टिःकरः।हस्तोमुष्ट्याउबद्धयासरत्निःस्याररत्निस्तनिष्कनिष्ठेनमुष्टिना।इत्यमरः।तनुवि
स्तारे।ता।उ।तनोति।प्राणिनांविलासिनांचसुखं।तन्यतुर्वायूरात्रिश्च।अंजूव्य
क्तिम्रक्षणकांतिगतिषु।रौपा।अनक्तिकोमलोभवत्यनेन।अंजलिस्तुपुमान्
हस्तसंपुटे इतिमेदिनी।वनुयाचने।ता।आ।वनुते।धातूनामनेकार्थत्वात्तनच
सति।वनिष्ठुः।स्यविरं।तं।स्थिरांत्रं।वनिशेऽर्दयादधातिमंत्रस्यभाष्येतथैवो
क्तत्वात्।अंजूसएव।अनक्तिरीयते।अंजिष्ठः।भानुः।सगतौ।भौ।णंतः।अर्नि
ष्ठीनित्यादिनापुकुणोरनिश्ठरीतिणिलोपः।अर्पयति।पुष्टिं।अर्पिसोऽग्नमांसं।अ

ऽमांसं।मर्दिहर्षे।देप।माद्यति उदकं श्रा[illegible]मन्स्यः।अतेसातेस्य गमने।औप।
अतति।अतिथिः।ऊरोपुत्रेस्यात्पुमानागंतुकेत्रिषितिमेदिनी।अग्गिगतौ।
औ।प।अंग्यते प्राप्यतेऽनयेति।अंगुलिः।करणं।कुशाष्टा।आप।कौतिधात्गमने
कार्थत्वाद्दतिकवसः।मन्आदिः।युमिश्रणेऽमिश्रणेच।आप।योति।
धर्मासो।अमिश्रीभवतियवासः।दुरालभाचदुःस्पर्शायासोधन्वयवासकेइतिधन्वं ७०
तरिनिघंटुः।कृशानुःकरणेदे।प।कृशयतिकृशानुः।अः।करन।श्चहिंसा
यां।क्रे।प।शृणातितापं पादौ शर्करा खंड। विरुता बुधा कर्परं[illegible]यो रितिमे
दिनी।पुषः।पुष पुष्टौ।के।प।पुष्णाति दृशान्वपुष्करं खं।पुष्मा तिमा।गि
नोऽनुगं।अपुष्करं।अंबुपद्मंच।पुष्करं खे बुप[illegible]द्य योरितिमेदिनी।कलं
अ।पुष्णाति बहु लं भवति पुष्कलं।गमेः।गम्लृगतौ।औप।आङि।आ
गमिष्यति।आगामी।भुवश्च।भूसत्तायां।भविष्यति।भावी।प्रेस्थः।प्र ११९
गति निरुत्तो।मो।प्रस्थ।स्यातिप्रस्थायी।णित्वाद्वातोयुग्णितियुक्।परमे।

परमेशब्देउपपदे तिष्ठतेरिनिःस्यात्स च कित्।कित्त्वादातो लोपः।इलदंताद्द
लुक्।अंबांबेसत्रेस्थास्थिन्स्थूणामुपसंख्यानमिति षः।परमेतिष्ठतिप
रमेष्ठी पितामहइत्यमरः।मंथः।मंथ विलोडने।क्रै।प।मथ्नाति।अनेन मंथाः।
१ इति प्रत्ययः करणं।पतस्थ[illegible]।पत्लृ[illegible]गतौ।औ[illegible]प।पतति।अनेन पंथाः।करणं।खडेः।
४ थ प्रत्ययांत इराः खडमंथे।औद।खडति।आकरा।भ्रितिखडाकः।पठः।बलाकादयश्च।एते
आक प्रत्ययांतानि पात्यंते।बल प्राणने धान्यावरोधेच।औप।बलति धन्यास
रोधं करोति बलाका बक पंक्तिः स्यात्बलाकस्तु बकोमतस्नतिविश्वः।शल चलने।
१२५ औ।आ।शलनं।ने।ईंति।शलाकांडं न्ययाष्टिकेतिमेदिनी।पत्लृगतौ।औप।पताति।
चलतीतिपताका।पिनाकादयश्च।एते।आक प्रत्ययांतानि पात्यंते।पारक्षणे।आ
पापातिपिनाकः।तड आघाते।चौ।ताड्यते गवादिभिरितितडाकः।निपातनाद्दृ
स्वत्वं।धर्म।कषिदूषि।कषहिंसायां।औप।कषतिस्वं[illegible]इतिकषीका।पाढ्व ११२
आति।दुषवैकृत्ये।दे।प।एयौदीषो[illegible]पधायाः[illegible]ऊकारः।दूषयति नेत्रं

हृषीका। अनिहृषिभ्यां। अन प्राणने। आ। प। अनिति बलवान् भवति अनेने
करणे २ ति अनीकं। सैन्यं। हृष तुष्टौ। दि। प। हृष्यति विषयान् प्राप्य हृषीकं। विषयीन्द्रियं इति
अमरः। चंकणः। कण शब्दे। भ्वा। प। अस्माद् यङ्लुकि प्रत्ययलक्षणन्यायेन। सन्य
ङोरिति द्वित्वे कुहोश्चुरित्यभ्यासस्य चुत्वे नुगतो नुनासिकांतस्येति चंकण। ङ
सिङः लोपस्तु चंकणः। धातोरिति चंकणी सस्य। चंकणीति कंकणिका। घंटिका
ईका शृणाभ्यां ईकन्। एषां द्विर्वचनं अभ्यासस्य रुगागमश्च। शृ। क्र्यै। शृणाति शरीरं
फो हिंसायां। पृ पालनपूरणयोः। ङो। पिपर्ति पर्परीकः। वृञ् वरणे। स्वो। व्रियते वर्व ७१
रीकः। कुटिलकेशः। कर्म। पर्फरीकादयश्च। स्फुर स्फुरणे। तो। प। स्फुरति पर्फरीकं।
पर्फरादेश इति। एतच्चोज्ज्वलदत्तरीत्योक्तं। वस्तुतस्तु धातोर्द्वित्वं उकारस्याकारः सलोपः
रुक् चाभ्यासस्येति। दृश पाठादेवन्याय्यं। दृ विदारणे। क्र्यै। अस्मादीकन्
धातोर्दर्दरादेशः। दृणाति रागं हृदयं दर्दरीकं। ज्रृष् वयोहानौ। दि। प। अस्मादीकन् दैर
धातोर्जर्झरादेशश्च। जीर्यति झर्झरीकं। वस्तुतस्तु दर्दरीकझर्झरीकावपि पर्फरीकव ८०

धातोर्द्वित्वं रुक् चाभ्यासस्येति व्याख्येयौ। तिम आर्द्रीभावे। दि। प। तिमेर्मकारस्य डकारः।
अभ्यासस्य नुक् च। तिम्यति अनेन मुखं तिन्तिडीको वृक्षभेदः। अम्लिका। याम्लिका
चिंचा इति। डीका इति तिन्तिडीकं। करणं। चर गतौ। भ्वा। प। अस्मादीकन् द्विर्वचनं
अभ्यासस्य नुगागमश्च। चरति। चंचरीकः। चरेर्भृत्ये। तु न रंगं यथा तुरोधेन द्वे रुक् च
न्याद्यनुस्वारेण न्याय्यत्वात् न निवारणार्थं उक्तिः। भृङ् प्राणत्यागे। तौ। अस्मादीकन् धातो
द्वित्वं रुक् चाभ्यासस्य। म्रियते मर्मरीको हीनजनः। कर्ता। डुकृञ् करणे। ता। अस्मादीक
न् धातोर्द्वित्वं अभ्यासस्य रुक्। करोति जलस्रावं। कर्करीका। गलन्तिका। पुण कर्म
णि शुभे। तौ। प। अस्मादीकन् णस्य डः। प्रत्ययस्य रुडागमश्च। पुणति शुभं कर्म करो
त्यनेन पुण्डरीकं। सितांभोजं। पुण्डरीको अग्निः। करणं। पुणति शुभा धारणरूपं शु
भं कर्म करोति पुण्डरीको दिग्गजः। कर्ता। पुणति धातूनामनेकार्थत्वात् हिनस्ति पु मृगादीन्
पुण्डरीकं भेषजं १ ण्डरीको व्याघ्रः। पुणति धातूनामनेकार्थत्वात् शोभते अनेन पुण्डरीकं। सितच्छत्रं। करणं। रोगांश्चार

ईषगतिहिं सादर्शनेषु। भ्वा। आ।२

पुण्डरीकं सितांभोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रेऽग्निदिङ्नागे इति मेदिनी। ईषेः [illegible]
[illegible] अस्मादीकन् ह्रस्वश्च। किं त्वात् गुणाभावः ह्रस्वविधानसामर्थ्यादेव गुणाभावे
सिद्धे किं त्वमुत्तरार्थमित्याहुः। ईषते इति अल्पेन वायुना गच्छति। इषीका शलाका। ईषीकास्या
दिषीकापिवाना पुङ्खवनापुङ्खाविति द्विरूपकोशः। [illegible] गत्यादिषु। भ्वा। [illegible]
नेषा तूनामनेकार्थत्वात् त्वहन्यते। ऋजीकः। उपहतः। कर्म। सर्तेः। स्र गतौ। भ्वा। सरति। सृणी ९२
का। मृडः। मृड सुखने। तौ। प। मृडति। सुखी भवति। मृडीको मृगः। मृडति सुखयति। मृडीकः। णः
शिशुः। अंतर्भावितण्यर्थः। अलीकादयश्च। अल भूषणपर्याप्तिवारणेषु। भ्वा। प। अल
[illegible] ति धारयति सुखं। अलीकं। मिथ्या। अप्रियं च। अल्यते भूष्यते। अलीकं
२।४ ललाटं। कर्म। अलीकमप्रिये भाले वितथेऽपि इति हेमचंद्रः। तथा चाभियुक्तैः प्रयुज्यते। ४२१
तिदृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च। नी
चाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतां च न संत्यजंति। वल नितरा
स्यति सुखं। व्यलीकं विप्रियं खेदश्च। वल संवरणे। भ्वा। आ। वलीकं वलीकं च पटल
संचरणे च १

कनीध्रे पटलप्रांते इत्यमरः। आच्छादकं वंशपंजरादि नामाच्छादनं तृणादि पट
लं। तस्य प्रांते इत्यर्थः। कॄशॄभ्यां। कॄ विक्षेपे। तौ। प। कीर्यते ऽनेन। शृ [illegible] करीषः
कर्म। तॄ प्लवनतरणयोः। भ्वा। तरति। तरीषः। शॄ। शॄ हिंसायां। क्र्यै। स्वयमेव शीर्यते। शि
… रीषो वृक्षभेदः। कर्मकर्ता। पॄ पालनपूरणयोः। जौ। पूर्यते उत्सृज्यते। पुरीषं। गूथं पुरीष
[illegible] वर्चस्कमस्त्री विष्ठाविशौ इत्यमरः। कर्म। अर्जेः। अर्ज अर्जने। भ्वा। प। अर्जनं धातू धातूनामनेकार्थत्वात् २।४
नामनेकार्थत्वात् पिष्टपचनं। ऋजीषं। णौ वेप्रत्ययः। अंबरीषः। अबि शब्दे। भ्वा। आ।
आधिकरणे ५ अंबते गोधूमादयो अस्मिन्। अंबरीषः। कृपृट। कॄ विक्षेपे। तौ। किरति भुवं। करीरः।
शॄ हिंसायां। क्र्यै। शीर्यते इति शरीरं। कर्म। पॄ पालनपूरणयोः। जौ। पिपर्ति पालयति
परीरं। कट वर्षावरणयोः। भ्वा। प। कटति आवृणोति कटीरः। कुकुंदरः। कट्यते आध्रि
यते कटीरो जघनं दरः। कर्म। पट गतौ। भ्वा। प। पट्यते पटीरः श्वंदनवृक्षः कंदुकश्च। प
रति पटीरः कामः। कर्ता। शौट गर्वे। भ्वा। प। शौटति धातूनामनेकार्थत्वाद् दीप्यते शौ
टीरस्त्यागी। शौटति गर्वं करोति। शौटीरो वीरः। वशेः। वश कांतौ। [illegible] कांति रिछा। अ

पा उश्यते इति उशीरं। कर्म। करोः। करः सौत्रः। कराति मनं कश्मीरः। पृषोदरादि
त्वात् काश्मीरः। कृमेः। डुकृञ् करणे। तो क्रियते कुरीरं। मैथुनं कर्म। घसेः। घस्ल
२ अदने। सौ। प। अघसीरं। घसिवाङ् मदने युपधालोपे कथं घस्त्वं च। कर्मगंभीरे।
रतौ निपात्येते। गम्लृ गतौ। सौ। प। अस्माद् ईरन् भकारोंतादेशः। गच्छति निम्नत्वं
निम्नत्वं गभीरं गंभीरं निम्नगभीरः। विषाविहा। षोंतकर्मणि। दे। ओहाक् त्यागे। सौ। आ
भ्यां विपूर्वाभ्यां आप्रत्ययो निपात्यते। विष्यति अज्ञानं विषा। विजहाति दुःख
मत्र विहा। स्वर्गः। अधिकरणं। पचः। डुपचष् पाके। सौ। उ। अस्मात् दे लिमच्। पाच ७३
लिपचे लिमः। कर्त्तरि अर्थः। कृत्यप्रत्ययेषु केलिमर उपसंख्यानः। शीङो धुक्।
शीङ् स्वप्ने। आ। शी रने अनेनेति शी धुर्मध्याविशेषः। अर्द्धर्चादिपाठात् कीवं च।
शेते निश्चसत्र शालं स्य भावः अधिकरणं शेते पतति अनेनेति शेवधिः। जलनी ४२२
लिका। करणं वाजप्रत्ययेशेधाजं। मृकणिभ्यां। मृङ् प्राणत्यागे। सौ। म्रियते अंत
र्विलत्यर्थत्वात् मार्यते याथैः मरूको मृगः। कर्म। कणशब्दे। सौ। प। कणति। कालकः।

वलेः। वल संवरणे संचरणे च। सौ। आ। वलते गच्छति वलूकः पक्षी। वलंते
निर्गच्छंत्यस्मात् उत्पलानि वलूकः उत्पलमूलं। अपादानं। उलूकादयश्च।
वलपूर्वेक्त एव। वलते च तोः उलूकः इंद्रः। अधिकरणं वलते दिवाका
कात्पलायते उलूकः काकारिः। वलते गच्छति शत्रुं प्रति उलूको भारतयोधी।
उलूकः पुंसि काकारौ वैडे भारतयोधिनीति मेदिनी। वदयत्कायां वाचि। सौ।
प। अस्मादूकङ् गंताद् ऊकः। वावदीति। वावदूकः यव वक्तरीत्यमरः। मध्यपरि ६
भाषणे हिंसा दानेषु। सौ। आ। मध्यते हिनस्ति मध्रूकः। कदंगः शंबुः उपशमे।
दैप। शाम्यति तिष्ठति जलादिरत्र शंबूको जलशुक्तिः। अधिकरणं शल्मिं
डिभ्यां। शलचलनादौ। सौ। आ। शलंते निर्गच्छंत्यस्मात् कल्हारादीनि। शालूकं। मे
सौगंधिकं तु कल्हारमित्यादुपक्रम्य शालूकमेषां कंदः स्यादित्यमरः। एषां सौ
गंधिकादीनां कैरवांतानां कंदो मूलमित्यर्थः। मडिभूषायां हर्षे च। सौ। मंडयति

जलं प्राप्य कूर्दति मंडूकः। नियोमिः। णीञ् प्रापणे। भ्वौ नयति चक्रमिति नेमिः रथ
चक्रधारा। नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः। अर्तेः। ऋ गतौ। भ्वौ। ऋच्छति। ऊर्मिः स्त्री
पुंसयोः वीच्यामिति मेदिनी। भुवः। भू सत्तायां। भ्वौ। भवंति भूतान्यस्यां भूमिः। अधिकरणे।
अश्नोतेः। अशू व्याप्तौ। स्वौ। अश्नुते रश्मिः पुमान्दीधितौ स्यात्पक्ष्मप्रग्रहयो
रपीति मेदिनी। दल्मिः। अयं निपात्यते। दल विशरणे। भ्वौ प॰ दलति। विदारयति। अ ७४
नेन दल्मिः। इंद्रायुधं। अंतर्भावितण्यर्थः। करणे। वीज्या। [illegible] वीगत्यादिषु। अ
पा॰ वेति। शोभां प्राप्नोति। वेणिः। ज्या वयोहानौ। क्र्यै॰। ज्यानं। ज्यानिः। हानिः। भावे प्र
त्ययः। जिनातिधातूनामनेकार्थत्वात् दहति। ज्यानिः। स्रवंती। कर्त्री। ज्यानिर्हानौ
स्रवंत्यां चेति विश्वः। ज्वर रोगे। भ्वौ प॰ ज्वरत्वरेत्युपधावकारयोरूठ्। ज्वरति। रो ४२३
गं करोति। जूर्णिः। स्त्री रोगः। सृघृभ्यां। सृ गतौ। भ्वौ। सरत्यनया नेन वा [illegible] अंकु
शः। स्त्री सृणिः स्त्रियामित्यमरः। सृणिः स्यादंकुशे पुमानिति कोशांतरं। करणे। घ

कु४

घृ सेचने। हिंसासंक्लेशनयोश्च। भ्वौ प॰ घर्षणिः। दीप्तिः दुष्टानां जनानां च्यावयति। क्षत्रियमे
षयोः। अंगेः। अगि गतौ। भ्वौ प॰ अंगत्यूर्ध्वं गच्छति। अग्निः। वहिश्रि। वह प्रापणे। भ्वौ
उ॰ वहति हव्यं वह्निः। श्रिञ् सेवायां। भ्वौ उ॰ श्रीयते श्रेणिः स्त्री पुंसयोः पंक्तावित्यमरः
पुंभिः४ कर्मणि। श्रु श्रवणे। भ्वौ। श्रूयते श्रोणिः। कटिः श्रोणिः ककुद्मतीत्यमरः। कर्मण्युपमिश्रणे
आप। योनिः। मिश्रीभवति योनिराकरः। यौति जायते अस्यां योनिः। स्मरमंदिरं यो
दा५ निः स्त्रीपुंसयोः स्यात् [illegible] आकारे स्मरमंदिरे इति [illegible] द्रु गतौ। भ्वौ। द्रवति अस्मि निमेदिनी
न्नस्याः द्रोणिः। इकारादि तिङ। षिद्रोणी। द्रोणिः काष्ठांबुवाहिनीत्यवि
तनो गे अमरः। काष्ठपाषाणशंकाबुसेचन्याद्रोणी नाम्नीति व्याख्यासुधायां। अपादाने। ग्ला ग्लेर्हर्षक्षये
नं ग्लानिः। भावे प्रत्ययः। ओहाक् त्यागे। जौ। हानं हानिः। भावे प्रत्ययः। ञित्वरा चौ॰८
संभ्रमे। भ्वौ। आ॰। त्वरते तूर्णिः। मानः। अंतर्भावितण्यर्थः। बाहुलकात्। ग्लेर्हर्ष एयर
क्षये। भ्वौ। ग्लानं ग्लानिः। भावे प्रत्ययः। घृणिपृश्नि। घृ सेचने। भ्वौ प॰ निपात्य

मनी४

योगुणाभावश्च निपात्यते। घरति घृणिः। किरणोस्त्रमयूखांशुगभस्तिघृणि
धृष्णयइत्यमरः। स्पृशसंस्पर्शने। तौ०प। स्पृशति-अस्मात्। नंपश्चिरस्य शरी
रः। सलोपोगुणाभावश्च। पृश्निरल्पतनौ। प्रोणपंगावित्यमरः। पृषुसेचने। प
र्षति धातूनामनेकार्थत्वाद्भूमिं स्पृशति पृश्निः। पृश्नं घ्रिश्चरणौ। स्त्रियांतदग्रं ह्नि४
त्वाघुटिके गुल्फो पुमान्पाष्णिरधस्तयोरित्यमरः। चरगतौ। भ्वौ०प। चरति धातू
नामनेकार्थत्वाद् व्यवहारायेति चूर्णिः। अंतभाविर्तणयर्थः। डुभृञ्धारणपोषणयो रा५
ञ्जो। बिभर्ति भूर्णिः। वृङ् स्यां। वृञ्वरणे। भ्वौ। वृणोति वर्विः। हङ्आदरे। तो। द्रि ५
यते पाचके रितिदर्विः। खरद्दकारादित्विञ्। पिदर्वी। ... ड्वयो। हानो।
क्रै। ऊणाति। ऊर्णि... हिंसायां। क्रै। स्तृणाति स्तरीविः। स्तृञ्आच्छादने। क्रै। स्त
स्तृणाति दर्भैर्भूमिमिति-अध्वर्युः। जागृनिद्राक्षये। अ०प। जागर्ति। ... ४२४
... जागविः। दिवोद। दिवुक्रीडादौ। दे। प। अस्मात् किन्। कित्वाद्गुणाभावः।

स्त्री वि० २

एते क्विन्नंतानि पात्यंते। ३

दीव्यति शोभते दीदिविः स्वर्गो बृहस्पतिश्चाकर्णा। दीव्यति द्युषति-अनेनेति दीदि
विः। अन्नं। अकरणं। लोपोव्योरिति वलोपः। दीदिविर्नाधिषणोऽन्नेतद्
स्त्रियामिति मेदिनी। धिषणो बृहस्पतिः। ञिधृषा। ईदुरुमेकरणे। ता। करो
ति परं दीधिविः। उराचेमादि। घृषुसंघर्षे। भौ०प। घर्षति घृषिर्वराहः। उग्रस्य पृ
न्संस्थविरस्याघृषेरिति मन्त्रेतु घृषेः कामानां वर्षकस्येति व्याख्यातं। छोछेद
ने। दे। छ्यतित मइति छविः। ह्रीः। छ्यति धातूनामनेकार्थत्वाच्छोभते-अनयेति
छविः। शोभाकरणांक्छविः शोभारूचायोषितइति मेदिनी। छागति निश्च नौ
ञो। तिष्ठति स्थविः। दिवुक्रीडादि। दुदे। प। किकिर्विद्वान्। किकिर्विदीव्यति।
शोभते। किकीदिविः। निपातनात्किकिशब्दस्यांत्यस्य दीर्घत्वे किकीन्द्रविर्दीव्यते।
क्विन्। लोपोव्योरिति वकारलोपः। कित्वाद्गुणाभावः। अथवा वः। किकीदिवि रित्यम
रः। विनिमयइति। किकिदीविः किकीदिवाविति द्विरूपकोशः। पातेः। पारणे। भ्वा०प।

पाति। पतिः। पतिर्धवेनाथे धीशे इति मेदिनी। शकेः। शक्कृ शक्तौ। सौ॰पा॰ शक्नोति। धातू
नामनेकार्थत्वान्निःसरति। शक्तं नु विभा मतं शक्रदित्यमरः। भ्रमेः। भ्रमगत्यादिषु।
भौ॰पा॰ भ्रमति। भ्रथा मतिः। डुंसि हिमदीधितिकालयोरिति मेदिनी। वहि। वह प्रापणे।
भौ॰उ॰ वहति। गच्छति। वहतिः। वस निवासे। भौ॰प॰ वसनं। वसतिः। भावे प्रत्ययः। व
संत्यस्यां वसतिर्गृह यामिन्योः। अधिकरणं। वसतिः स्यात् स्त्रियां वासे यामिन्यां य
ञाप्नोति। निकेतने इति मेदिनी। ऋ गतौ। भौ॰ ऋच्छति। अरतिः। अंचेः। अंचु गतौ। भौ॰प॰ अंच ७५
ति। अंकतिः। अंयतिः। धातः। हंतेः। हन हिंसागत्योः। आ॰प॰ रमेः। रम क्रीडायां। भौ॰
आ॰ रमते क्रीडति। रमतिः। कालः। कालः क्रीडति गच्छत्यायुरित्याचार्यस्वामी। रम
ते ऽनेन। रमतिः कामः। करणं। रमते। रमतिर्नायकः। कर्त्ता। रमंते ऽत्र। रमतिः स्वर्गः।
अधिकरणं। रमतिर्नायके नाके पुंसि स्यान्। इति मेदिनी। ऋः। ऋ आणि ~~ग्रन्थे~~ ४२५
गर्भविमोचने। आदादिः। ऋतेनयानान्यर्थान् ऋतिः। धीमान् सूरिः सतीत्यमरः।

अदिशदिः। अदंति फलादीन्यस्मिन् पक्षिणः। अडिः। अधिकरणं। शद्लृ शातने। शीयने। ता॰पं॰ भौ॰पा॰१
शडिः। शर्करा। शदेः शितः। इति तङ्। पाघ्राध्मेति शीयादेशः। शितिः। भू सत्तायां। भवति। प्र
भवति। भूरिर्ब्रह्मि विष्णुरुद्राः। भवति सुखमनेन। भूरिः सुवर्णं करणं। भवति प्रचुरं। भू
रि बहु। कर्त्ता। भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि। नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्य
लिंगकं इति मेदिनी। शुभ दीप्तौ। भौ॰ आ॰ शोभते। शुभ्रिः। वंच्यादयश्च। वकि कौटिल्ये। भौ॰
आ॰ वंकते। वंक्रिः। डुवप् बीजसंताने। भौ॰उ॰ उप्यते ऽत्र। वप्रिः। क्षेत्रं। अधिकरणं। निपात
नात् संप्रसारणाभावः। अधिगत्याक्षेपे। गतौ गत्यार्थे भ्येयेत्यन्ये। भौ॰ आ॰ अंधते ऽनेन। अं
घ्रिः। करणं। अङ्घि माणार्थः। भौ॰ अंहयति। धातूनामनेकार्थत्वाद् गच्छत्यनेन। अंघ्रिः पादः।
करणं। पदं घ्रिश्चरणो ऽस्त्रियामित्यमरः। नदिः। सौत्रः। इदित्। नंदत्यनया। तं डिः। कृदिकारा तिकुद्धृ।
दिति ङीष्। नंदी। नितम्ब भीरुयोरिति मेदिनी। भिभी भये। जौ॰ बिभेत्यस्याः। शत्रवः। भेरिः।
भौमादित्वान्नं अपादानं ङीषि भेरी। स्त्री दुंदुभिः पुमानित्यमरः। राशदिभ्यां। रा दाने। आ॰पा॰ राति सुखं। रात्रिः।

कृदिकारादिति१

कौ०टीका

उ०पा०४

शङ्कु शातने । णौ प० शीयते । नाशयति रणे शत्रून् । शश्चिः । कुञ्जरः । शत्रिमस्त्र उपमां के तु मैवं इ
ति मंत्रस्य वेदभाष्ये तु उपमां उपमाभूतं के तु प्रख्यातं शत्रिं एतन्नामकं राजर्षिमिति व्याख्यातं ।
अदे । अदभक्षणे । आ० प० अत्ति । अत्त्रीभक्षकः । अत्तिपापं । अत्त्रिर्मुनिभेदः । पत्ते । पत्त्ल
गतौ । णौ प० पतति । पतत्त्रिः पक्षी । पतत्त्रशब्दात्तद्वाच्यकाम्न्यत्यर्थे इनि तु नांतः पतत्री ।
पतत्रिणौ । मृ कलिभ्यां मृङ् प्राणत्यागे । तौ । म्रियते अंतर्भावितण्यर्थत्वान्मारयति पापं ११
न मत्रा मरीचिः । मुनिर्गभस्तिश्च मरीचिर्मुनिभेदे ना गभस्तावनपुंसकमिति मेदिनी ।
कणशब्दार्थः । णौ प० कणन्ति अप्सरा अस्यामिति । कणीचिः पुष्पितलता । अधिकरणे । कण
नं कणीचिः । निनादः । भावे प्रत्ययः । कण रण गतौ । णौ प० कणति प्राप्नोति सुखं कणीचिः ।
वद्ध्वथी । जोपी । कण्यन्ते शीतापनयनार्थं प्राप्यन्ते कपिभिः कणीचिः । गुंजा । कण्यते प्राप्य कर्मा८
ते त्वचीवलैः । कणीचिः शकटं । कर्म । कणीचिः पुष्पितलता गुंजयोः शकटे स्त्रियामिति ४२५
मेदिनी । श्वयतेः । टुओश्वि गतिवृद्ध्योः । णौ प० श्वयति प्राप्नोति पापिनं । श्वयीचिः व्याधिः ।

वेञः वेञ् तंतुसंताने । णौ । वयति धातूनामनेकार्थत्वाद्गच्छति वीचिस्तरंगः । वय
ति अनेकार्थत्वात्प्राप्नोति सुखं तिनं वीचिः सुखं । वयति गच्छत्यत्र वीचिरवकाशः ।
अधिकरणे । वीचिः स्वल्पे तरंगे स्यादवकाशे सुखे द्वयोरिति विश्वः । नञ् समास इति
वीचिः सुखं तदभावो ऽवीचिः । ग्रह निभ्यां । ग्रगतौ । णौ । ग्रच्छति । अरूषः । हन हिंसा
गत्योः । आ० प० हंति । हनूषः । पुरः । पुर अग्रगमने । णौ प० पुरति । पुरुषः । हन हिंसा पाल
न पूरणयोः । जौ । पिपर्त्ति धातूनामनेकार्थत्वान्निष्ठुरं भवति । परुषं । णह बंधने । दै । ग
धानह्यते स्वर्गादिभिः पात्यते नहुषः । राजविशेषः । कर्म । कल्मषशब्दः संख्यानयोः ।
णौ । आ । कल्मते ऽस्वच्छं भवति कलुषः । प्राविलं । कलते ऽस्मात्कलुषमेनः । अपाहा पाद्धं करोति
नां कल्मषं त्वाविलेन सोऽरिति विश्वः । पीयोः । पीयः सौत्रः । पीयान दृवेऽरिति पीयू
षं । कर्म । मस्जेः । मैं टुमस्जो शुद्धौ । तौ । प० मज्जति तिष्ठति वस्त्रादीनि अस्यां मंजू
षा । अधिकरणे । पिटकः पेटकः पेटी मंजूषेत्यमरः । गंडेरू । गडि वदनैकदेशे ।

ओौ।प। अं इति धातूनामनेकार्थत्वान्मुखं पूरयति गंडूषो मुखपूरकः । अरणः अ
ति । रूगतौ । ओौ।प। अरणति प्राप्नोति युद्धार्थी । अरलुः । कांचीवृक्षः । वीररहः श्यूरम
र्त्यः । कुटः । कुट कौटिल्ये । तौ।प। कुटति कुटरूः । चिं संमिति । गाडुरादिभ्यश्च इति
उच्चेनेव गुणाभावसिद्धेः । शकादिभ्यः । शकटः शाकटो । सौ।प। शक्नोति भारं वोढुं श
कटः । कं किगतौ । भौ। आ। कंच्यते योधृभिः कंकटः । सन्नाहः । कमरेद्रे देवनो । भौ १८
नोऽ आ। देवटः । शिल्पी । कृ विक्षेपे । नौ।प। किरति मुदो दर्क करटः । गजगंडः
दुरुरूपकरणे । ता। करोति वस्त्रं रक्तं कुत्सितं कर्म च करटः । कुसुंभं । निघंडौवीर
करटो गजगंडे स्यात्कुसुंभे निघंडीविनिद्र इति मेदिनी । दृककादौ दुरुपकरणे । ता।
करोति मिश्रतां कृ खंबच्या मिश्रं । कुदि कडी सोत्रौ । कदति शोभते कदंबः । कडति
अगोतिष्ठति कडंबः । करे वर्षावरणा यः । भौ।प। कटति च्राष्टं तरभाव रोपति [illegible] ४२७
कटं बो वादित्रं । कटेः । कादः । भौ।आ। कदाति रोगातेकांदंबः । कालिकद्योः । कल गतिसं नौ१

ख्याने च । चौ। अदंतः । कलयति संख्यां करोति अनेनेति कलमः । लेखिनी । करणं
प्रायेनेर कल्यते मृगादिभिः कलमः शालिः । कलयति शब्दं गच्छति कलमश्चौरः । कलमः पु
सि लेखिन्यां शालौ पाटच्चरेपि चेति मेदिनी । कर्द कुत्सिते शब्दे । भौ।प। कर्दति
अ स्मादिति कर्दमः । अपादाने । कुणिपुल्योः । कुण शब्दे । तौ।प। कुणनं कुणिः
रसालो शब्दः । भावे । पुल महत्वे । भौ।प। पोलति [illegible] नीचैर्भवति पुलिं
दः । जातिविशेषः । कुपेः । कुप क्रोधे । दौ।प। कुप्यति कुविंदः । कुपिंदः । तुंतुवायः । नौ
पंजेः । पंज संगे । भौ।प। निषिद्धदस्मा [illegible] धाधि उपसर्गात्सुनोतौ [illegible] चकारो ति१
रिति अलं । आसुरस्य निषंगाधिः । रथकूबरः इत्यर्थः । कूबरस्तु युगंधरः इत्यमरः । उ २८
धन्नेः । रुगतौ । भौ । उद्दछति । उद्राथिः । सर्तेः । सृगतौ । भौ । सरति अस्मात्सा
रथिः । अंतर्भावितण्यर्थः । सूतः क्षत्ता च सारथिरित्यमरः । खजिपिंजादिभ्यः । ख
यथनेय१ ज प्रजनें । भौ।प। खजति व्यथयति खजूरः । अंतर्भावितण्यर्थः । [illegible] सामर्थ्यो
खर्जादिभ्यः । पिंजादिभ्यश्च [illegible] यथाक्रमं ऊर ऊल चौ सतः । २

कौ० द्वित्रि
टीका

उ०पा०४

जौ।(…)ञा।कल्पते तापं नाशयितुं कर्पूरः।बाहुलकात् पोरोपः इति खत्वाभावः।अ
थ कर्पूरमस्त्रियामित्यमरः।वध संवरणे संचरणे च।औ।=आ।वध्नेन गाढं (?) ति अस्मा
त्।वल्लूरं शुष्कमांसं।अपार्दनं।पिजि हिंसादिषु।चौ।पिंजयति पिंजूलं कुशचर्तिः।
आगिगतौ।औ।प।संगतिं च नातिलांगूलं।बाहुलकात् उर इत्त्वं।कुस संश्लेषणे।दै।प।
ति ५ कुस्यति तिष्ठति धान्यादिकमस्मिन् कुसूलः।अधिकरणे।कुवः।कुशले।आ।प। कोठि इति
कौति।कूपी।समीरणः।इण्गतौ।आ।प।समुपपदे अस्मात् ईरन्।ईरयति।यथा तौः।समेति। भाषानाम
समीरणः।सिवेः।षिवु तंतुसंताने।दै।प।सीव्यति।सूच्यः।शमेः।शमु उपशमे।दै।प।शाम्यति १८
अनेन।शं वा मुसलं करणे।उल्वादयश्च।उच समवाये।दै।प।उच्यति संधी भवति।ऊक्ष शे
ते ऽस्मिन्।उल्वं।गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियामित्यमरः।अधिकरणे।
शुच शोके।भौ।प।शोचत्यस्मिन् गते।शुल्वं।ताम्रं।अधिकरणे।निपातनात् अस्य लत्वं गुणा ४२८
भावश्च।वी गत्यादिषु।आ।प।अस्य नुमागमो ह्रस्वत्वं च।वेति प्राप्नोति प्रतिबिंबतां।

बिंबं।प्रतिबिंबं वेति प्राप्नोति वर्तुलत्वं।बिंबं मंडलं।बिंबस्तु प्रतिबिंबे स्यान्मंडले
पुंनपुंसकमिति मेदिनी।स्थस्तः।ष्ठा गतिनिवृत्तौ।भौ।तिष्ठति।स्तंबः।तिष्ठति स्तबकः।
शाशपिभ्यां।शाम्यां यथासंख्यं ददनौ स्तः।शो तनूकरणे।दै।प।स्यति।रादः।बादः।
५ पञ्चभिः।४ कर्ता।श्यति।रादः।बालदर्णं।शाषां बालवदर्णं घासः।इति अमरः।कर्म ईप आक्रो
शे।भौ।प।शपनं।शब्दः।भावे प्रत्ययः।अथादयश्च।एते दद्ननंता निपात्यंते।अवर
हणगतिकांत्यादिषु।भौ।प।अवति गच्छति।अथः।विस्यवः।कु शब्दे।आ।प।कुवंति इ निपातनात
अमरा अस्मिन् कुंदः।निपातनात् नुमागमः।कुंदो माघ्ये ऽस्त्री ति मेदिनी।व
५ औ।=आ। लिमद्भिः।वल संवरणे संचरणे च।वलते इति वलयं।मल धारणे।औ।=आ।म
४५ लते धारयति चंदनादिकं स्थानं मलयः।पर्वतभेदः।तनु विस्तारे।ता।उ।तनोति
सुखं तनयः।ईर्षो।ईर्ष्य।[illegible]।इति [illegible] आश्रयः।कर्म [illegible] कुम्रः
रणे।भौ।[illegible] ह्रियते विषयैः।हृदयं मनः।कर्म[illegible]।[illegible]।
मिनोति [illegible]।पीङ् पाने।दै।पीयते [illegible]।[illegible]।कर्ता।[illegible]

५ मिर

सौ० कौ०५ नि०२
टी० टीका

कुलकार। पा पाने भ्वौ। पिबति रसान् पात्रः। ज्ञोत्यादयस्त्वेत्वर्। त्रप्रत्ययांतानिपा
त्यंते। जनी प्रादुर्भावे दै० आ। जायते इति जत्रु स्कंधसंधिः। निपातनात्तनस्य
तः। संधी तस्येव जत्रुणी। इत्यमरः। तस्य ग्रीवाकस्य स्कंधस्य [struck] संधाइत्यर्थः
अश्रु व्याप्तौ स्वौ आ। अश्नुते अश्रु। हस्राति भ्यां तरष्टं। आप्नोतीति कृतः।
कृष्णसारस्कन्यं कुरंकुरंगौ वरौ हिषाः इति अमरः। शदु शातने भ्वौ प। शयंत
जनिदाच्यु। एभ्यो नवन्यो यथासंख्यं नवस्युः। जनी प्रादुर्भावे। दै० आ। अ ५
उत् स्मादित्वन्। जायते अभिषिक्तं यथार्थं वा जनयतः। तौ जनित्वौ मातापितरौ।
कर्त्ता। डुदाञ् दाने जौ। अस्मात् त्वन्। ददाति दात्वः। दाता। च्युङ् गतौ भ्वौ। अस्मात्
त्न त्नए। त्वणो णित्वात् वृद्धिः। च्यवते गच्छति च्यौत्नः। गंता। च्यवते भ्रा
प्नोति दुःखं च्यौत्नः। हीरापुराणः। सृ गतौ भ्वौ। अस्मात् क्तिन्। सरति अनेन ये ८२६
तिसरणिः। अंकुशोऽस्त्री सृणिः स्त्रियामित्यमरः। कमणां क्तिनः निः स्वरे
णाद्युदात्तौ भार्यं। सृष्टिभ्यां कित्। इति निप्रत्ययेत्वं तोदात्तः सापि॥

करणौ सरति सृणिः चंद्रः सूर्यो वायुश्च। कर्त्ता वृञ् वरणे। स्वौ। अस्मात् शक्
व्रियते वरा। आउकं मूलकं च। कर्मशकः कित्। नडुणा। मह हिंसायां दै प। अस्मा
त्स्य। माद्यति उदकं प्राप्य मत्स्यः। अं तोदा चौर्यं स्तत्स्यं जीति मत्स्येवु आद्युदात्तता
अ ५ धितः। षम्ब वैकल्ये। भौ प। अस्मात् ठः। मन समाप्तौ। स्त्रियं ... विठ्ठलो न भाति ६६४
षंठः। बाकुल काल धात्वादेः षस्य सकारो न प्रत्यया देठ स्य इत्संज्ञा रायन्नादेशश्च
न। धामेठ इति सूत्रे गालव्यादि साधितः। राम मह प्रत्ये राष्ट्रे च। भौ प। अस्मात्
उटः। नमति नटः। डुभृञ् धारणपोषणयोः। जौ। अस्मात् अटच्। विभर्ति मिसिं
डुस्सेवां च। भरटः। कुलालो भृतकश्च। अण्वेष्योप। इत्यजादयोनुवर्त्तंते। पा प
अस्मादित्व त्र ने। भौ। पीयते देवैरिति पेत्वं। अमृतं। कर्म। डुभृञ् धारणपोषणयोः। जौ। विभ अस्मात् राके
र्त्ति विद्धुलभावं भर्मं। कुस संश्लेषणे। भौ प। कुस्यते जनैः कुसुंभं हेमा कर्म।
कुस्यातिवश्चा कुसुंभं माहारजतं। कुस्याति धातूनामनेकार्थत्वात् तिष्ठति जल
मस्मिन्। कुसुंभं कमंडलुः। कुसुंभं हेमनि मधाइ जाने नाकमंडलौ इति मेदिनी। कुसं

तिरश्दं कुसुमं पुष्पं कुस्यते जनैः कुसीदं ऽऽवनेद्ध्याऽऽ बमिति मेदिनी कर्मा इह स्त्वे
रतीयो ह्रस्वादि दीर्घादिश्चातं त्रेणोपान्तः प्रेषाकप्यान्नि इति स्त्ते ह्रस्वादिरेवेति रत्ति
कारइरदत्तादिग्रंथोपष्टंभेन निर्णीतं पारलौकिक कुसीदमसीदं दितिश्रीहर्षप्रयोगा
धाकू नामनेफ र्थ्यात् ४ तुद्दीर्घादिरित्यपि कुस्यतीति षंतिऊनात्रस्मिन् कुसितोऽन पदः सानसिव
र्णसि षणु दाने ना ऊ सन्यते दीयते सानसि हिरण्यं कर्मा हृष्य वरणे सौ वृियते प्राणि
निर्वर्णसि ज ल कर्मा दशपाद्यां तु सानसिर्वर्णसीति पठित्वा धृञो तु कर्ययध र्णसि लौकिपा
सइतिव्याख्यातं युक्तं च तत्र धर्णसिं भ्रियायसमित्यादिमंत्रानुगुणत्वात् दृपालनपू
रणयोः जौ अस्माद सिः प्रत्ययो तु कत्या पिपर्त्तिपालयति पर्णसि ज लग्रहं तउ आ घाते
यौ अु अस्मादुलच् नुमागमश्च यथा तो ग बेधा तं दुलान् विभज्ये दिहस्विरग तद्यं तो तंदुलाः
धान्यादिनिकरा ग कर्मा त ऽति तंदुलो विहंग ग कर्मा क्षुरादिभ्य एव बहुलं णि जिष्णु रुक्षे णि
जभाव ग तंदुलः स्याद्विहंगेऽन्धधान्यादिनिकरे पुमानितिमेदिनी अ किलदाणे मौ आ

अस्मादुशन्द्यचंकते अंकुशः अयमपि पि स्वरेणां तो दात्त ग वृष भक्षणे मौ उन्यय ति पा
पं यषा लोमूपकटक ग इलस्व भप्र त्ये प्रत्ययो ग तौ पा अस्माद्दलच् गुणाभावश्चाइलति नामसत्याद
सपिति इल्वलो दैत्यभेदः पा पाने भौ अस्माद्दलच् लुगागमो ह्रस्वत्वं च पिबंत्यस्मिन् जलं पल्व
लो अल्पसर ग अधिकरणे निष्ठषा प्रागल्भ्ये सौ पा त्रकारस्य इकारः रपरत्वाभा
वो एय प्रत्ययश्च धृष्ण्वेति धिष्ण्ये अग्निः धृष्णोति ग्रां धिष्ण्यं भं धृष्णोत्यस्मिन्
धिष्ण्यं गृहं स्थानं च अधिकरणे शल गतौ मौ पा [illegible] अस्मात् यः शलति भूम्या
दिषु शल्ये तु न स्त्रियां शंकौ इति मेदिनी मृ शकि मू ऽ बंधने मौ मयते बध्यात्यस्मि
न् मूलं अधिकरणे शक्लृ शक्तौ सौ शक्रो ति स्पितं इन्द्रं शक्रः प्रियंवदे इति विशे
ष्यनिघ्नोऽमरः अबि शब्दे मौ आ अंबते ऽनेन अंबोरसः करणे वाहुलका त्रे
म गत्यादिषु अमति गच्छति च्ये तो ऽत्रा अमत्रः अधिकरणे माछा मामाने आ पा

करणं।
माति निर्माति अनस्य पदार्थान् अनयेति। मया शांबरी माति अनयेति माया। बु
द्धि। माया स्यात् शांबरी बुद्धो। रितिमेदिनी। छो छेदने दै। छ्यति तापं छाया। आ
तपाभावः। छ्यति नश्यति छाया। प्रतिबिंबं। छ्यति धातूनामनेकार्थत्वात् संज्ञाया
सादृश्यं प्राप्नोति छाया। अर्कयोषित्। छाया स्यादातपाभावे प्रतिबिंबार्कयो
षितोरिति विश्वः। षसूस्वप्ने। आ। प। सं तुष्यति अनेनेति संस्वंधान्यं। कर
णांबाद्व्यकात्। षुञ् अभिषवे। अभिषः स्नपनं स्नानं पीडनं सुरासंधानं च।
स्नुनोति संश्लिष्यति सव्यं दक्षिणं। स्नुनोति संश्लिष्यति दक्षिणं सव्यं वा मांसव्यं
दक्षिणवामयोः। अनेः। ऊनक ऊनने। औ। प। ऊनंतिऊन्यते वीराणां उत्साहो अज
न्यं युद्धं। अधिकरणं। ऊजंति अपत्यं अस्यामिति जाया। अधिकरणार्थकः। क्तिन्
उत्तरार्थे। अघ्यादयश्च। हन। हिंसागत्योः। आप। हंति पापमिति। अघ्यः। अघ्न
ति अघ्ना माहेयी। माहेयी सौरभेयी गौ रुस्रा माता च शृंगिणी। अर्जुन्य घ्यारोहि

णी स्यादित्यमरः। कनी दीप्त्यादिषु। औ। प। कनति कन्या। बंध बंधने। क्रै। प। बध्ना
ति धारयति कर्मभिः कर्म पश्यो वंध्या। स्नामदिः श्माशौचे। आ।
स्नाति स्नेमऊति स्ना वा। मदी हर्षे। दै। प। माद्यति हृष्यति मद्या पदगतो
दै। आ। पद्या गच्छति अस्मिन् पद्या। अधिकरणे। गतो। भौ। संछति प्र
र्वा लुरगः। रूक्छति अस्मात् ग्यां गह्वं। अपादानं। पृ पालनपूरणयोः। औ।
यः पिपर्ति पालनं तिपर्व ग्रंथिः। पिपर्ति पूरयति कामान् पर्वी प्रस्तावः। राक्षरा
तौ। रो। प। रा क्रोतिरा का दस्ती। शाक्रोत्यनया शाकरी अंगुलिः। करणं।
वृ रो। ४ यनोरस्चेति ङीषू। स्पे। वीडकुत्सा। क्रीड्स्वप्ने। आ। शेते चेति वा। कुश आह्वाने
रोदने च। भौ। प। क्रोशति कुश्या। कर्दवीडाऊत्मनि प्रादुर्भावेच। रोहति क
क्ष। डिड्ये। भौ। प। डयति डला। हि निवासगत्योः। भौ। प। क्षियति गच्छति
क्षिला। स्वगतौ। भौ। प। स्त्रियते स्त्रवा। भ्रश्यापातिः। कर्म। ध्य अधारणे। भौ। प।

धा ऌप्ताम नेको र्थत्वात् ३
वाम ५ मत्स्यपर्णं
बृ ५ बिनोरि २ २३१ औप ३

धरति धत्वा। ध्याप्योः। ध्यै चिंतायां। भौ। ध्यायति ध्याधा। संप्रसारणे कृते हलइ ले १

ति दीर्घः। प्येङ् वृद्धौ। प्यायते पावा। अदेः। अद भक्षणे। आप। आप्ति बंधी। अ सं २

ध्या। प्रईरशाद्। ईङ् गतौ। आ। आ। शद्लृ शातने। भौ। प। प्रस्भ्याममाभ्यां ध्वनि

प्रस्यात्तस्य लुङागमश्च। प्रेत्वरी इति प्रेत्वरी। सागरः। बाहुलकात् ईङ् भाव। ग्म ४

प्रसागरः प्रत्यायते प्रशत्वा। शदेः शितइति तङ्। पा। प्रेति शीयादेशः। अंतभावित ३

एयर्थः। वनो नङ् राङ् इति पक्ष व्यस्त्यन्यासकारमतेनाप्यायिकत्वात् तन्मते नाड्

प्रेत्वरी प्रशात्वरीति। प्रेते। प्रेत्वरी। प्रशीयते। प्रशत्वरी। नदी। वनोरचेत्यनेन ङीब्रौ।

ननु वनो न हश इति वक्तव्य आगरूकत्वात्कथं वनोरचेत्यनेन ङीब्रौ विति चेत्। वनो न हश

इति वक्तव्यस्य न्यासकारेणाप्यायिकत्वस्वीकारादिति गरुडाणां। सर्वधातुभ्य इन्। डुपचष्

पाके। पचति। पचिः। तुडितोऽने। भौ। आ। तुंडते। तुंडिः। वल संवरणे संचरणे च। भौ। आ। ४३२

सा वलते। वलिः। जरया व्याप्य चर्म। वट वेष्टने। भौ। प। वटति। वटिः। यज देवपूजादौ। भौ। उ। य

जति। यजिः। देवान् यजति देवयजिः। काशृ दीप्तौ। भौ। आ। काशते। काशिः। यती प्रयत्ने।

भौ। आ। यतनं यतिः। पाठविच्छेदः। भावे प्रत्ययः। यतने धातूनामनेकार्थत्वान्निरस्करणं।

यतिः। निकारः। भावे प्रत्ययः। यतते मुक्त्यर्थं यतिः सन्यासी। कर्त्ता। यतिः स्त्री पाठविच्छेदे

निकारयतिनोः पुमानिति मेदिनी। मल्ल धारणे। भौ। आ। मल्लते रधाति। भ्रमरान्मल्

लिः। किलश्वैत्यक्रीडनयोः। तौ। प। केलनं। केलिः। क्रीडा। भावे प्रत्ययः। मसी प

रिणामे। परिणामो विकारः। दै। प। मस्यति। मसिः। कुट कौटिल्ये। तौ। प। कुटति।

कोटिः स्त्री धनुषोऽग्रे इति मेदिनी। गाङ् कुटादिभ्य इति ङित्वाद्गुणाभाव नाशं

क्याह। बाहुलकादिति। हिल भावकरणे। तौ। प। हिलति। धातूनामने

कार्थत्वाद् गच्छति। हेलिः। सूर्यः। बुध अवगमने। दै। आ। बुध्यते। प्राप्नोतीश्व

रमनेन बोधिः। समाधिभेदः। करणं। बुध्यते। विष्णुरूपत्वात् सर्वं जा

नाति। बोधिरश्वत्थः। बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपः इति मेदिनी।

टुणदि समृद्धौ। भौ। प। नंदंत्यनया द्युतकाराः। नंदिर्द्यूतांगं। करणं। नंदनं।

नंदिः। आनंदिः। भावे प्रत्ययः। नंदति। नंदिः। नंदिकेश्वरः। नंदिर्द्यूतांगत्रा
नंदे स्त्री नंदिकेश्वरे पुमानिति मेदिनी। कलशब्दसंख्यानयोः। भौ॰आ॰क
लते। भ्रमराः शब्दं कुर्वंत्यस्यां। कलिः। कलिका। अधिकरणं। कलते शब्
दं करोति जनोऽत्र कलिः कलहः। अधिकरणं। कलते। एकोऽहमेवेति
शब्दं करोति। कलिर्युगभेदः। कर्त्ता। कलते। निर्नयास्ति सं तु। इत्यादि
शब्दं करोति। कलिः। शूराद्। कर्त्ता। कलिः स्त्री कलिकायां नाशूराजिक
लहे युग इति मेदिनी। इह इन्नित्येव सूत्रं अधिकं प्रकिप्तं व्यर्थं च। एवं स
र्वधातुभ्यः इन्नित्यादावपि बोध्यमित्याहुः। हृपिषि। हरतेः कीर्त्तयतेश्च ८४
अच इरिति प्राप्ते इतरेषां तु इगुपधात् इति कित्वे प्राप्ते वचनं। हृञ् हर
णे। भौ॰। हरति पापं चित्तं रसान्वा तापं सुखं फलादीनि कृष्माणं च। हरिः।
विष्णुयमहरविचंद्रकोलप्लवंगवाताः। कर्त्ता। हरति देवानां भयं। हरिरिंद्रः। ४३२
कर्त्ता। हरति प्राणान् हरिः। अहिसिंहयमाः। कर्त्ता। हरति दंशान् हरिर्भेकः।

कर्त्ता। पिशृ संचूर्णने। रौ॰प॰। पिनष्टि। दैत्यान् पेषिर्वज्रं। रुह बीजजन्मनि
प्रादुर्भावे च। भौ॰प॰। रोहति। आरोहति स्वर्गादिलोकान् रोहिव्रती। वलु वर्त्तने।
भौ॰आ॰। वर्त्तनं। धातूनामनेकार्थत्वाद्देवपज्ञनिर्माणं। वर्त्तिः। भावे प्रत्ययः। व
र्त्तते। नेत्रे। वर्त्तिर्नयनांजनं। कर्त्ता। वर्त्तनं। धातूनामनेकार्थत्वाल्लेखनं। व
र्त्तिः लेखः। भावे प्रत्ययः। वर्त्तते गात्रे। वर्त्तिर्गात्रानुलेपनं। कर्त्ता। वर्त्तते दीपोऽन
या वर्त्तिर्दीपदशा। करणं। वर्त्तते। वर्त्तिर्दीपः। कर्त्ता। वर्त्तिर्भेषज निर्माणनयनां
जनलेखयोः। गात्रानुलेपनी दीपदशा दीपेष्वयोषितीति मेदिनी। विद सत्तायाम्।
दै॰आ॰। विद्यते पुण्यमस्यां। वेदिः परिष्कृतान्तर्भूमिः। अधिकरणं। छिदिर् द्वैधीकर
णे। रौ॰उ॰। छिनत्ति छेदिः। स्तूनसंशब्दे। कीर्त्तयति धातूनामनेकार्थत्वात् व्याप्नो
ति। कीर्त्तिः। यशः। कर्त्तरि प्रत्ययः। कार्यकारणयोरभेदोपचारात् प्रसादेऽपि
कीर्त्तिः। कीर्त्तिः प्रसादयशसोरिति विश्वः। इगुपधात्। इनः कित्वं विधीयते।
कृष विलेखने। भौ॰प॰। कर्षणं कृषिः। भावे प्रत्ययः। रुष गतौ। तो॰प॰। रु
षति प्राप्नोति परमं पदं ऋषिः। शुच शोके। भौ॰प॰। शोचति। दुष्कर्म। शुचिः। जिपउप

देहे। नौ॰ उ॰। लिंपति। लिपिः। लिपिर्लिविशब्दोपपर्यायौ। तल निष्कर्षे। नौ॰ प॰। तलति
आकर्षति मनः। तलिः। कूर्चिका। कूर्चिका स्त्री रविरुतिरिति वैश्यवर्गेऽमरः। अमेः।
अमु अनवस्थाने। दे॰ प॰। अस्मादिन् स्यात् स च कित् तस्य प्रसारणं च। आम्यति भू
मिर्वर्तिः। अर्मिर्विघयावसवो लुप्यते तिमत्रेऽर्मिरमलशीतं दृशिरुजनमिति वेदनाथ्य।
क्रमितमि। क्रमु पादविक्षेपे। नौ॰ प॰। क्रामति क्रिमिः। कृमिर्नाक्रिमिवत् कीटे इति विश्वः। तनु
कोरुपायामु। दे॰ प॰। ताम्यति लुवेंति मिः। मन ज्ञाने। दि॰। अपो ग्रहा॥ रोहितो मद्गुरः शालो राजीवः
शकुलस्तिमिरित्यमरः। शतिः सौत्रः। शलति गच्छति मनोऽत्र शितिः। शितिर्नरे जैन सिता सितयो
क्विपुलिमे दिनी। अधिकरणं। स्तनः सौत्रो रोधनार्थः। स्तन्यानि वे जाया मात्मान स्तिन्तिः समु
द्रः। स्तं च स्तुं चितिपद्धेऽभ्या। मनेः। मन ज्ञाने दे॰। आ। अस्मादिन् स च कित्। मन्यते जानाति
मुनिः पुमान् वसिष्ठादाविति मेदिनी। बलेः। बल्पते दीयते रणे। दे॰ वा॰ प॰। बलिः। करः। उपहा
रश्च। बलति वसते चामस्या जन समये बलिः श्यामरं दं ड॰। कर्ता। बलति हरति हानं। बलि
दैत्यभेदः। कर्ता। बलति यलते बलिः। जरया श्लथचर्म। कर्ता। बलिर्दैत्य मन्त्रे देच कर
चामरदंडयोः। उपहारे पुमान् स्त्री तु जरया श्लथचर्मणीति॥ हिरल्पेतु। वर्ण
तिगच्छति मनोऽत्र वर्णिः सुवर्णं। अधिकरणम्॥ वसिवपि॥ ॥श्री॥ ८३४

इति स्वर्गादिलोकान् रोहिर्व्रती। वृतु वर्तने। भौ॰ आ। वर्तनं। धातूनामनेकार्थत्वाद् द्वेषजनि
र्माणि। वर्त्तिः। भावे प्रत्ययः। वर्तते नेत्रे। वर्त्तिर्नयनांजने। कर्ता। वर्तनं। धातूनामनेकार्थ
त्वाद्धेरवनं। वर्त्तिः। लेखः। भावे प्रत्ययः। वर्तते गात्रे। वर्त्तिर्गात्रानुलेपनं। कर्ता। वर्तते
दीपोऽनया वर्त्तिर्दीपदशा। करणं। वर्तते। वर्त्तिर्दीपः। कर्ता। वर्त्तिर्भैषजनिर्माणे नयनांज
नलेखयोः। गात्रानुलेपनी दीपदशा दीपेषु योषिती ति मेदिनी। विद सत्तायां। दै॰ आ॰। विद्यते
पुण्यमस्यामिति। वेदिः परिष्कृता भूमिः। अधिकरणे। छिदिर् द्वैधीकरणे। रौ॰ उ॰। छिनत्ति
छेदिः। कृत संशब्दने। चौ॰। कीर्तनं कीर्त्तिः। यशः। कर्मणि प्रत्ययः। कार्यकारणयोरभेदोपचा
रात् प्रसादोपि कीर्त्तिः। कीर्त्तिः प्रसादयशसोरिति विश्वः। इगुपधात्। खष विलेखने।
भौ॰ प॰। कर्षणं कृषिः। भावे प्रत्ययः। कृषी गतौ। तौ॰ प॰। कृषति प्राप्नोति परमं पदं। कृषिः।
ऊर्ध्व शोके। भौ॰ प॰। शोच्यति दुष्कर्मा शुचिः। लिप उपदेहे। तौ॰ उ॰। लिंपति। लिपिः। लिपिर्लिवि
शब्दौ पर्यायौ। तल निष्कर्षे। भौ॰ प॰। तलति आकर्षति मनः। तलिः। कूर्चिका। कूर्चिका स्त्री
रविरुतिरिति वैश्यवर्गेऽमरः। अमेः। अमु अनवस्थाने। दै॰ पा॰। अस्मादिन् स्यात् स च कित्

यतिधातूना मनेकार्थत्वा त्तथा प्रोक्तं ७

इनः कित्वं विधीयते ८

संप्रसारणं। यान्त्यतिः। कमिवर्तिः। ऊर्मिः। यिद्यथा वसवो जुषंते तिमंत्रे ऊर्मिः। अमणशीलंद
रिद्रं जनमितिवेदभाष्ये। क्रमितमिः क्रमु पादविक्षेपे। भौ॰प॰। क्रामति। क्रिमिः। कृमि। नाक्रि
मिवत्कीटइतिविश्वः। तमु कांक्षायां। दै॰प॰। ताम्यति। जलं। तिमिः। मत्स्यभेदः। अथो झषाः। रोहि
तो मद्गुरः शालो राजीवः शकुलस्तिमिरित्यमरः। शतिः। सौत्रः। शतति गच्छति मनोऽत्र। शितिः।
शितिर्भूर्जे ना सितासितयोस्त्रिष्विति मेदिनी। अधिकरणे। स्तनः। सौत्रो रोधनार्थः। स्तन्याति
वेलायामात्मानं स्तिमिः समुद्रः। स्तनु स्तनु विचिति पदे श्मा। मनेः। मन ज्ञाने। दै॰आ॰। अस्मादि ५
त्यर्थं कित्। मन्यते जानाति। मुनिः पुमान् वसिष्ठादौ इति मेदिनी। वर्णेः। वर्ण[redacted]र्या। तो दीयते
राज्ञे देवाय वा बलिः। करः उपहारश्च। कर्म। वर्णति वलते। [redacted] चामरस्यासनः समये।
बलिश्चामरदंडः। कर्त्ता। वर्णति ददाति। दानो बलिर्दैत्यभेदः। कर्त्ता। वर्णति वलते। बलिः।
जरया श्लथचर्म। कर्त्ता। बलिर्दैत्यप्रभेदे च करश्चामरदंडयोः। उपहारे पुमान् स्त्री तु जरया ४३४
श्लथचर्मणीति। हिरण्ये तु वर्णति गच्छति मनोऽत्र वर्णिः। सुवर्णं। अधिकरणे। वसिवपि।

वस निवासे। भौ॰प॰। वसति धान्यनाम नेकार्थत्वात् छिनत्ति वा। वस्तिः। दुवपूर्वी ज संताने। भौ॰उ॰ वाँसलो १
उप्यंतेऽस्यां कमलादिबीजानि। वापिः। अधिकरणे। यज देवपूजादिषु। भौ॰उ॰। यजति। या
जिः। राज्र दीप्तौ। भौ॰उ॰। राजति। राजिः पंक्तिः। व्रज गतौ। भौ॰प॰। व्रजति। व्राजिः। षद्लृ विशरण
गत्यादिषु। भौ॰प॰। सीदति। अंतर्भावितण्यर्थत्वात् गमयत्यश्वान्। सादिः सारथिः। हन हिंसादौ।
आ॰प॰। निहंति। नियतिः। हो हंते रिति कुत्वं। हनस्तोऽचिण्णलोरिति तत्वं। वाश्ट शब्दे। दै॰आ॰।
वाश्यते। वाशिरग्निः। कर्मणि वदव्यक्तायां वाचि। भौ॰प॰। एयेतः। वादयति। वादिः विद्वान्। इह
वादीति ण्यंतो निर्दिष्टः। बाहुलकात् ण्यंतादपि तथा च भृवादिसूत्रे वदंतीति वादयो वाचकाः
इति न्यासकारादयः। वृञ् वरणे। सौ॰। ण्यंतः। वारयति। वारिः। ङी बि वारीस्यात् गजबंध
न्यां कलश्यामपि यो बिनीति। वारयति तापं नाशयति वा। रिजलं। बाहुलकात्। हृञ् हरणे।
भौ॰। हरति। जयो हारिः पथिकसंहतिः। हरति दुःखं। हारिर्द्यूतादिभंगः। हारिः पथिकसंता
नद्यूतादिभंगयोः स्त्रियामिति मेदिनी। नहः। णह बंधने। दै॰उ॰। नह्यति बध्नाति। [redacted]ना। ताकारि
नपान् दुष्टान् अश्वान् जनमनश्च नाभिः। सुरथान्य पः। क्षत्रियश्चक्रमध्यं कस्तूरिकामदश्च।

नश्यति। पुंसस्त्रियोर्नाभिः। प्रमदांगविशेषः। पुंसोऽङ्गविशेषे तुल्यलक्षण्यां नाभिशब्दः प्रवर्त्तते।
केचिदिति। तथा च मेदिनी। नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रती
के स्यात्स्त्रियां कस्तूरिकामदे इति। भारविः। अथ पुंसि प्राक्कुम्भसत्पुन्नस्य कच्छकोशको म
लैरुपाहितश्रीरुपनीविनाभिभिः। इति। लवः। लवविलेखने। भौ। प। कर्षणं। काविः। भावे
प्रत्ययः। भाषायां तु इस्य धात्वित्वात्। अस्मादिन्स्यात्स च किदिति इन्प्रत्यये। लविरित्येव। अः। इति ५
सायां कै। अस्मात् छकुनौ वाच्ये इन्स्यात्। शृणाति शारिः कीत रो शारिः। अस्त्रोपकरणं। शृण
ति मनो हरैः शब्दैर्दुःखं इति शारिः। शकुनिभेदः। शारिर्नाक्षोपकरणे स्त्रियां शकुनिकान्तरे इति
मेदिनी। लभः। डुलभष् करणे। ता। अस्मादिन्स्याद् दुरीयां मते कारुश्चवाच्ये। पुं। करोति। कारुः शिल्पी।
करणं कारिः। क्रिया। भावे प्रत्ययः। कारिः स्त्रियां क्रियायां स्याद् वाच्यलिंगस्तु शिल्पिनीति मे
दिनी। जनिघसिभ्यां। जनी प्रादुर्भावे। दै। आ। जननं जनिरुत्पत्तिरुद्भव इत्यमरः। भावे प्रत्य ७५
यः। जनिवध्योश्चेति वृद्धिप्रतिषेधः। घस्लृ अदने। अद्यते। घासिर्भक्ष्यं। कर्मणि घसति। घासि
रग्निः। कर्त्ता। अज्यतिभ्यां च। अज गतिक्षेपणयोः। भौ। प। अजं तिगच्छति वीरः। अत्र आजिः।

अधिकरणे। स्त्रियः संयत्समित्याजिसमिद्युधः इत्यमरः। बाहुलकाद् अजेर्वीभावो न। अतसातत्
त्यगमने। भौ। प। अतति। आतिः पक्षी। पादे च। पादशब्दे उपपदे अज्यतिभ्यां मिणि। पादस्य पदा
ज्यातिगोपहतेष्विति अदंतपदादेशः। पादाभ्यां अजति गच्छति पदाजिः। पादाभ्यां अतति प
दातिः। पदातिपत्तिपदगपदातिकपदाजय इत्यमरः। अशिपण्योः। आभ्यां मिणस्यादन्
योर्यथाक्रमं रुडायप्रत्ययश्चकौ च भवतः। अशूङ् व्याप्तौ। सौ। आ। अश्नुते। राशिः पुंजः। अ
श्नुते भुंक्ते चंद्रोन क्षत्राण्यस्मिन्। राशिः। मेषादिः। अधिकरणे। राशिर्मेषादिपुंजयोरिति मे
दिनी। राशीनामुदयो लग्नं ते तु मेषवृषादय इत्यमरोक्तेः। राशिः पुंसि। पण व्यवहारे स्तुतौ च। आयप्रत्ययान्तः
णौ। आपनिसाहचर्यात्पणेरपि स्तुत्यर्थ एवायप्रत्ययः। अनुबंधस्य केवलेऽपरिनार्थत्वादाय
प्रत्ययान्तात् आत्मनेपदं। पणायते स्तूयते पाणिः करः। कर्म। वातेः। वा गत्यादौ। आदादिः। वाति
गच्छति। विः पक्षी। स्त्रियां तु विकारादिकामेति। वीत्यपि। प्रेहरनेः। हृञ् हरणे। भौ। प्रहरंति
जना उदकं अस्मात् प्रहिः। अपादाने पुंस्ये वा धुप्रहीकूपे इत्यमरः। नौ थः। थञ् संवरणे। भौ।

इणो डित्वाट्टिलोपे यलोपो नेदीर्घः। नियच्छति संवरणे इति नीविः। वस्त्रग्रंथिः। निवीयते नि... ङीषि नीवी

नीवी। मूलधने। कर्मणि त्यानो ... नामने का ... परिपणने नि ... इति ङीषि नीवी।

... स्त्रीकटीवस्त्रबंधेपि नीवी परिपणेपि येत्यमरः। परिपणे मूलधने। समाने ख्याः।

ख्या प्रकथने। आ०प०। अयं सार्वधातुकमात्र विषय इति पूर्वमुक्तं। तस्मान्न्यदिङ् यक्तायो वा सि।

आद्यादौ अस्या। आर्द्धधातुके। यः क्सि ङः ख्याञ इति आर्द्धधातुक विवक्षायां ख्याञादेशे ततो

इण्प्रत्ययः। समानं ख्यायते जनैः सखा। मित्रे। कर्मणि आङि। श्रिञ्सेवायां। भौ०। आश्रीयते। आ। १७

श्रिः। कोणः। कर्मणि हनहिंसादौ। आ०प०। आहंति लोके। अङ्गिः। अयइः। रुशब्दे। आ०प०। रौति।

अंतर्भावितण्यर्थत्वान्नशब्दं कारयति। रविः। पूञ्पवने। क्र्यै०। पुनाति। दुष्टान् हननेन पविः।

यज्ञे। कर्त्ता। कुलिशं भिदुरं पविः। शतकोटिः स्वरुः शंबो दंभोलिरशनि र्द्वयो रित्यमरः। तृप्लव

नतरणयोः। भौ०। तरति। स्त्रियां नौस्तरणिस्तरिरित्यमरः। कुशब्दे। आ०प०। कौति। कविर्वाल्मी ७३

किशुक्रयोः। स्तुरौ काव्यकर्त्तरी इति मेदिनी। अगतौ। भौ०। अगच्छति कुत्सार्थे आगच्छति। अरिः।

रिपु वैरि सपत्नारि द्विषद्वेषण दुर्हृद इत्यमरः। पृषोदरादित्वादैकस्मिकसत्वे अलिः। अच्छति

प्राप्नोति पुष्पे। अलिर्भ्रमरः। अलिः पुंसि। खनि कषि। खनु अवदारणे। भौ०। उ०। खन्यते। खनिः। स्त्रि

यामाकरः स्यादित्यमरः। कष हिंसार्थः। भौ०प०। कषति। कषिः। अज गत्यादौ। भौ०प०। अजति। अ जिः।

अजु क्षेपणे। दै०प०। अस्यत्यनेनासिः। खड्गः। करणे। वस आच्छादने। आ०। आ। वस्ते आच्छाद

यति शरीरं। वासिर्वस्त्रं। वनसंभक्तौ। भौ०प०। वन्यते सेव्यते शीतार्त्तैः। वह्निरग्निः। कर्मणि। षणु

दाने। ता०उ०। सननं। सनिर्दानं। भावे प्रत्ययः। सनोति ददाति सुखं। सनिर्भक्तिः। कर्त्ता। ध्वन

शब्दे। भौ०प०। ध्वननं। ध्वनिः शब्दः। भावे प्रत्ययः। शब्दे निनाद निनद ध्वनि ध्वानरव स्वना इत्यम

रः। ग्रंथ संदर्भे। क्र्यै०प०। ग्रथ्नाति बध्नाति। ग्रंथिर्ना पर्वपरुषी इत्यमरः। चल कंपने। भौ०प०। चलति

गच्छतीति। चलिः पशुः। रनेः। रतु वचने। भौ०। आ०। अस्मात् इः स्यात्। छंदसि। व्युत्पत्तिः। पूर्वोक्तैव।

स्वरे भेदः। बाहुलकाल्लोकेपि इप्रत्ययांतस्य वर्त्तिशब्दस्य प्रयोगः। वर्त्तिर्भेषज निर्माणे नय

नांजन लेखयोः। गात्रानुलेपनी दीपदशा दीपेषु यो षितीति मेदिनी। भुजेः। भुज पालनाभ्यव

हारयोः। रौ०उ०। भुनक्ति हव्यं। भुजिरग्निः। कृगृशॄद्दृ। कॄविक्षेपे। तौ०। किरति। किरिः। कोलः।

पोत्री किरि किटिरित्यमरः। गॄ निगरणे। तौ। गिरत्यनेनेत्रं। गिरिरक्षिरोगः। गॄ शब्दे। क्रै। गीयते
स्तूयतेऽनेनेरिति गिरिः पर्वतः कर्म। गिरिर्ना नेत्ररुग्भिदि। अद्रौ इति मेदिनी। गिरिणा क्षिरो
गेण काणः। गिरिकाणः। शॄ हिंसायां। क्रै। शृणाति। शिरिर्हिंस्रः। शृणाति। दीपे निपत्य आत्मानं हि
नस्ति। शिरिः शलभः। पॄ पालनादौ। जौ। पिपर्ति पालयति। पुरिर्नगरं राजा नदी च। कुट कौटि
ल्ये। तौ। पा। कुटति। जरया कुटिलं भवति। कुटिः शरीरं। कुट्यते धातूनामनेकार्थत्वाद् रच्यते। कुटि ८८
शाला कर्म। कुटनं। कोटिः कौटः। भावे प्रत्ययः। कुटति वक्रीभवति। कुटिर्घटो गृहं च। कुटिः कोटे
पुमान् स्त्री घटे स्त्री पुंसयोर्गृहे। इति मेदिनी। भिदिर् विदारणे। रौ। उ। भिनत्ति भिदिर्वज्रं। छिदिर्
द्वैधीकरणे। रौ। उ। छिनत्ति। छिदिः परशुः। कुडि कंपे। कुडि दाहे। भौ। आ। कुंड्यते ज्वरादिना। कु
ण्डिर्देहः कर्म। कपि चलने। भौ। आ। कंपते। इनस्तत् चलति। कपिः। कपिः प्लवंग प्लवग शाखा
मृगवलीमुखाः इत्यमरः। सर्वधातुभ्य इन्। डुकृञ् करणे। ता। चर गतौ। भौ। पा। चरितं प्राप्तं शरी ४३
रेण चर्म। भूतकाले कर्मणि प्रत्ययः। भस भर्त्सनदीप्त्योः। भौ। पा। भसितं दीपितं अग्निना भस्म।

भूतकाले कर्मणि प्रत्ययः। जनी प्रादुर्भावे। दै। आ। जननं जन्म। भावे प्रत्ययः। शॄ हिंसायां। क्रै।
शृणाति दुःखं शर्म सुखं। छाग तिनिरन्नौ। भौ। तिष्ठत्यनेन युद्धे स्थाम बलं करणे। छद अ
पवारणे। चौ। छादयति। आवृणोति। छद्म कपटं। त्रैङ् पालने। भौ। सुष्ठु त्रायते सुत्रामा इंद्रः।
इंद्रः। बृहि वृद्धौ। भौ। पा। बृंहति ब्रह्म परमात्मा विप्रः प्रजापतिश्च। बृंहत्यनेन ब्रह्म तपो वेदश्च।
करणे। नकारस्य अकारे ऋकारस्य यणादेशः। अशिशकिभ्यां छंदसि। अशू व्याप्तौ। सौ। आ सौ।
आ। अश्नुते। अश्मा। शक्लृ शक्तौ। सौ। पा। शक्नोति। शक्मा इंद्रः। छंदसीत्यस्य शकिनैव
संबंधो न त्वशिना। अत एव अश्मानमारोपयतः स्मरारेरिति प्रयोगः। हृञ् हरणे। हृञ् हरणे
भौ। हरति हरिमा कालः। डुभृञ् धारणपोषणयोः। जौ। भ्रियते भरिमा कुटुंबं कर्म। धृञ्
धारणे। भौ। ध्रियते धरिमा रूपं कर्म। सृ गतौ। भौ। सरति सरिमा वायुः। स्तृञ् आच्छा
दने। क्रै। स्तीर्यते स्तरिमा तल्पं कर्म। शॄ हिंसायां। क्रै। शृणाति दुःखं शरिमा प्रसवः। कौ० उ
एतयोश्चवसदत्तरीत्योक्तं दशपाद्यां तु शृणाति निर्नश्यते तेन स्थाने सृधातुं प्रकल्प्य प्रत्ययं दी

निपात्यंतइतिमनिन्नंता इतिशेषः।५

र्थादिंनितं च सत्यास्तदस्त्यस्मिन्निति पद्यते छंदो ग्रहणं चानुवर्त्तितं कुर्त्तंचैतत्। पिट्टनाम्नो मरी
मभिः। वातस्य सर्गो ऽमनवन्सरीमणि। स्त्रीलिंग हिंसु शरीमानुषाणाः। ॐ धायिस्यामतिर्भाग्य ऋदि
धुन सवीमनिहिरण्यपाणिरित्यादि मंत्राणां त। द्रा घस्य यानुरुणत्वात् उक्तप्रयोगानां भाषा
यामदर्शनेन छंदोऽनुवर्त्तनेन ज्ञायित्याद्य। अतएव वेमः सर्वत्रेतिसूत्रे। सर्वत्रग्रहणं करिष्यति।
जनिमृड्भ्यां जनीजादुर्भावे दैश्। आजननं जनिमा। जन्मभावे प्रत्ययः। ~~इमन्प्रत्यये~~ भौ। हृञ्निम्रि
मरिमा मृत्युः। वेञः। वेञ्तंतुसंताने। भौ। वयत्यनेन। वेमा। वायदंडः। नामन्सीमन्। म्ना। अभ्यासे। ॥ ७८
भौ। पा। म्नायते ~~आह्न~~ धातूनामनेकार्थत्वात् आहूयतेऽनेन। नाम। आख्या। करणं। म्नाधातोर्म
लोपो नाभावो वा निपात्यते। षिञ्बंधने। सौ। सिनोति। सीमा। मनः। मन्नं तात् स्त्रियां ऽपून्।
इतिडीबभावः। सीमसीमे स्त्रियामुभे इत्यमरः। व्येञ्संवरणे। भौ। व्ययति। व्योम। नभः। स्फुशब्दे।
आदादिः। स्फूयते धातूनामनेकार्थत्वात् छिद्यते। रोम। गात्रकेशः। कर्म। लूञ्छेदने। कै। लूय ॥ ७८
ते लोम। सहवाकर्म। पाॅ ~~पानेभौ~~ पुगागमः। पांत्यस्मादात्मानं। पाप्मा। पापं। अपादानं। द्यैचिं

रक्षणे। आदादिः।१

मा १ मा १

नायां। भौ। ध्यायति जानाति अनेन ध्याम। परिमाणं। करणं। ध्यायते। चिंत्यते। ध्याम। तेजः। कर्म।
मिथुने। श्रु हिंसायां। कैः सुषुश्रुणाति। सुशर्मा राजविशेषः। तद्दुत्तरपदप्रकृतिस्वरेणां तोदा
त्तं पदं। मनिनित्नुमथ्योदात्तं स्यात्। सातिभ्यां। षोऽन्तकर्मणि। दैः स्यति दुःखं। साम। अत सातत्य
गमने। भौ। पा। अतति। धातूनामनेकार्थत्वात् व्याप्नोति। आत्मा। हृनिमविभ्यां हन हिंसागत्योः।
आ। पा। हंति। आकाशे गच्छति। हंसिका। मशशब्दे रोषकृते च। भौ। पा। मशति। मक्षिका। कोः।
कु शब्दे। आ। पा। कौति। कवरः। पाठकः। गिरः। गॄ निगरणे। तौ। गिरति। सपत्निगरुडः। इंदेः।
इदि परमैश्वर्ये। भौ। प। इंदति। धातूनामनेकार्थत्वात् समीपं प्राप्नोति। इदं। इति सर्वनाम
शब्दो यं सन्निहितपरामर्शी। कायतेः कै शब्दे। भौ। कायति। रक्ष्यते। किम्। प्रश्नविषयोऽर्थः।
कर्म। किमिति सर्वनाम। सर्वधातुभ्यः। वस निवासे। भौ। पा। वसति देहे। वस्त्रं। असु क्षे
पणे। दै। पा। अस्यते ऽनेन। अस्त्रं। करणं। छद अपवारणे। चौ। छादयति। छत्रं। अत्तिगमि॥ अत्तपाकेनौ ३।
भ्यां त्रन्। आङ्। गम्लृ गतौ। भौ। पा। गम्यते। ज्ञायते। बलीवर्दः। गोत्रं। शकटं। ~~अतुनामि~~

तो। अक्रां। क। मीञ्। शसु हिंसायां। भौ। पा। श सा २

~~कस्यकीतिदीर्घश्चकर्म~~णिमन् कृत्येशच्छन्द्य। भौ।पा। नमत्यनेन। नांत्रं स्तोत्रं करणं। विश प्र
वेशने। तौ।पा। विशत्यत्रावेष्टुं। विश्पं। विष्टपं भुवनं जगदित्यमरः। अधिकरणे। अश व्याप्तौ।
सौ।आ। अश्नुते। आष्ट्रं। आकाशं। दिवेः। दिवु क्रीडादौ। दै।पा। अस्मात् ष्ट्रन् स्यात् द्युदादेशः।
इदि च्यथा तोगः दीव्यति। द्योतते। द्यौत्रं ज्योतिः। उषिखनिभ्यां। उष दाहे। भौ।पा। ओषति प्रति
गृहीतारं। उष्ट्रः। खनु अवदारणे। भौ।उ। खनत्यनेन। खात्रं। खनित्रं करणं। खन्यते जनैः।
खात्रं जलाधारः। कर्म। जनसनखनां सन्झलोरित्याकारो नादेशः। सिविमुच्योः। षिवु
तंतुसंताने। दै।पा। सीव्यति। सूत्रं। मुच्लृ मोक्षणे। तौ।उ। मुच्यते। मूत्रं कर्म। स्तुतिमूत्रिभ्यां कु
रादिएकेनाभ्यां एरन्यारूपसिद्धे रा द्युदात्वार्थमिदं सूत्रं। अमिचिमि। अम गत्यादिषु। भौ।पा।
अमति प्राप्नोत्युदरं। आंत्रं। अनुनासिकस्य क्वी निदीर्घः। चिञ् चयने। सौ। चिनोति। जनान्
राशीकरोति। चित्रं आलेख्यं। चिनोति। ~~विस्मापयत~~ धातूनामनेकार्थत्वात् विस्मापयते। चित्रं ७९
चित्रमाश्चर्यं आलेख्याश्चर्ययोश्चित्रमित्यमरः। ञिमिदा स्नेहने। दै।पा। मेद्यति। मित्रं। शत्रु

४ हन हिंसागत्योः। आ।पा। हननं धातूनामनेकार्थत्वान्मरणं। हंत्रं। आये प्रत्ययः। १

८

हिंसायां। भौ।पा। शसत्यनेन। शस्त्रं। करणं। पुवः। पूञ् पवने। क्रै। पुनाति। पुत्रः। पुन्नरकस्तस्मात्
त्रायत इत्यर्थे आतोऽनुपसर्गे क इति क प्रत्यये पुत्र इति पुत्रस्त्वंतरं। स्त्यायतेः। स्त्यै शब्दसं
घातयोः। भौ। स्त्यायतः। संघीभवतः शुक्रशोणिते अस्यां। स्त्री। अधिकरणे। गुधृवीपचि। गुङ्
अव्यक्ते शब्दे। भौ। गूयते आकार्यतेऽनेन। गोत्रं नाम। वंशस्य करणं। गवंते जना अस्यां। गोत्रा।
पृथिवी। अधिकरणं। धृञ् धारणे। भौ। धरति। धर्त्रं गृहं। वी गतिव्याप्तिप्रजनकांत्यसनखा
दनेषु। आ।पा। वीयते अस्यतेऽनेन। वेत्रं। करणं। डुपचष् पाके। भौ।उ।पा। पच्यत्यनेन पक्त्रं। तेजः।
करणं। वच परिभाषणे। आ।पा। उच्यतेऽनेन। वक्त्रं करणं। यम उपरमे। भौ।पा। यच्छति स्व
वनिमद्यादिकं अस्मात्। यंत्रं। अपादानं। षद्लृ विशरणगत्यवसादनेषु। भौ।पा। सीदति प्राप्नो
४ यजेः। ति स्वर्गादिलोकमनेन। सत्रं करणं। हद इति सौत्रः। हदति। हिनस्ति दुष्टान्। हत्रं। क्षत्रियः।
हुयामा श्रु। हु दानादनयोः। जौ। हूयते। होत्रं। आहुतिः कर्म। या प्रापणे। आ।पा। यानं यात्रा। ग
४ धातूनामनेकार्थत्वात्। १ मनं भावे प्रत्ययः। माङ् माने। आ।पा। मीयते। मान्यते जनैः मात्रा। कर्णविभूषा वित्तं परिच्छदश्च। कर्म।

मानं मात्रा। मानं। भावे प्रत्ययः। माति धातूनामनेकार्थत्वात् जानाति। अनया मात्रा। अक्षरावयवः।
करणे मीयते। मात्रा स्वल्पं। कर्म मीयते। धातूनामनेकार्थत्वान्निश्चीयतेऽनेन। मात्रं। अव
धारणे करणे। मीयते धातूनामनेकार्थत्वात् ज्ञायते। मात्रं कार्त्स्न्ये। कर्म। मात्रा कर्णविभूषायां
वित्ते माने परिच्छदे। अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे इति मेदिनी। श्रु श्रवणे। भौ।
श्रूयतेऽनेन श्रोत्रं। कर्णः। करणे। भस भर्त्सनदीप्त्योः। भौ। पा। बभस्ति धातूनामनेकार्थत्वात् सिं ५१
पत्यनया। भस्त्रा। दृतिः। भस्त्रा चर्मप्रसेविके त्यमरः। करणे। गमेः। गम्लृ गतौ। भौ। पा। गच्छ
ति। गात्रं। दाप्लिभ्यः। दाप् लवने। भ्वा। प। दात्यनेन। दात्रं। करणे। पा पाने। भौ। पिबत्यनेन। पात्रं।
करणे। भूवादि। भू सत्तायां। भवंत्यत्र जनाः। भावित्रं। त्रैलोक्यं। अधिकरणे। वदयत्कायां वापि।
भौ। पा। एधेतः। वाद्यते। वादित्रं। कर्म। गृ निगरणे। तौ। जीर्यते गारित्रमोदनं। कर्म। चरेः। चर गतौ।
भौ। पा। अस्मात् इत्रन्स्यात् हृन्ने वाच्ये। इष्टं पद्येऽपि चरित्रे चेत्यमरः। चर्यते। क्रियते जनैः। चरित्रं। ४८
चरितं। कर्म। आशिनादिभ्यः। अश्रु व्याप्तौ। सौ। आ। एवमादिभ्य इत्रः। चैङ् पालने। भौ। एव

मादिभ्य इत्रः स्यात्। अशूङ्ते ऽनेन। अशित्रं। अन्नपात्रं। वह प्रापणे। भौ। उ। वहति। वहित्रं। पोतः।
धृञ् धारणे। भौ। धरति। धरित्री। त्रैङ् त्रायतेऽनेन तोत्रं प्रहरणे। वृञ् वरणे। सौ। वृणोति।
वरुत्रं प्रावरणं। अमेः। अम गत्यादौ। अमति। आगच्छति युद्धार्थी। अमित्रः। आः समिणा।
इण् गतौ। आ। पा। कष हिंसार्थः। भौ। प। समेति। समया। निकषति। हिनस्ति दूरत्वं। निकषा।
समया निकषा शब्दौ समीपवाचकौ। चितेः। चिती संज्ञाने। भौ। पा। चेतन्ति धातूनामनेकार्थत्वा
त् स्निग्धं करोति चिक्कणं। सूपेः। सूप पैशुन्ये। चौ। अदंतः। सूपयति। सूपनामात्रं करोति
सूक्ष्मं। पानेः। पार कर्मणे। आ। पा। पाति। पुमान्। रुचिभुजिभ्यां। रुच दीप्तावभिप्रीतौ च। भौ। आ।
रोच्यते। रुचिष्यः। भुज पालनादौ। रौ। उ। भुज्यते। पाल्यते। भुजिष्यो दासः। वसेः। वस आच्छा
दने। आ। आ। वस्यते। आच्छाद्यते। वस्तिर्नाभेरधः। कर्म। ~~[illegible]~~ वस्तयः।
दशा सूत्रे। बहुलं सकान्त। शासु अनुशिष्टौ। आ। पा। शासनं शास्तिः। भावे प्रत्ययः। अक्षुक्षेपणे।
दे। प। विंध्यारण्यमगं अस्यति धातूनामनेकार्थत्वात् प्रदत्तं करोति। अगस्तिः। शकंध्वादिः।।

ध्येय स्य अं त्य भा गोदशा वस्तिर्द्वयोर्निरूढे नाभ्यधो मूत्रदशासु चेति मेदिनी २ वस्यंते। आच्छाद्यंते २

स्त्रीपुंसयोर्वितस्तिः स्यादित्यमर मालाव[illegible]

सावसेः। अस्तु वित्। आ। पा। कुशु। अस्तनं। शोभनास्थितिः। स्वस्ति। कल्याणं। बहुलवचनात् स्तो भू
भावेन। भावे प्रत्ययः। वीतस्तेः। तसु उपक्षये। दै। पा। वितस्यति। धातूनामनेकार्थत्वाद्विस्त
तां भवति। वितस्तिः। अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः इत्यमरः। पदिप्रापिभ्यां।
पदज्तौ। दै। प॰। आ। पद्यते। गच्छति। पत्तिः। पदातिपत्तिपदगपादातिकपदाजयः इत्यमरः। प्रथप्र
ख्याने। भौ। आ। प्रथनं। प्रथितिः। प्रख्यातिः। भावे प्रत्ययः। हृणतेः। हृ विदारणे। कै। दीर्यते। दृतिः। ४२
चर्मपुटे। कर्मणि हृणाति। हिनस्ति। स्वतः कुशन्य स्यान्। दृतिश्चर्मपुटे मत्स्ये ना इति मेदिनी। [illegible]
ह्न विक्षेपे। तौ। किरति तेजः। किरीटं। मुकुटे नस्त्री तिर्यग्गो स्वामी। न्द्रह्वनतरणयोः। भौ।
नरति। धातूनामनेकार्थत्वात् शोभते। नेन। तिरीटं। करणे प्रत्ययः। तप सामर्थ्ये। भौ। आ। [illegible]
कल्पते। अन्नादिदधातुं शक्नोति। तपीटं। कुक्षिः। कल्पते। तापं नाशयितुं। तपीटं। वारि। रुचि बाहुलका
वर्णो। रुच दीप्तावभिप्रीतौ च। भौ। आ। रोचते। रुचितं। वच परिभाषणे। भौ। आ। प। उच्यते त्संपोरोल
स्तूयते। उचितं। कुंच कौटिल्याल्पीभावयोः। भौ। प। कुंचति। अल्पं भवति। कुंचितं। कुटकौ इति ना॰

टिल्ये। तौ। प। कुटति। कुटिलं। कुटिः कुटिभ्यां। कुट पूर्वोक्तः। कुमि। कु धातूनामनेकार्थ
त्वात् कुत्स्यते अत्र। कुड्मलं। नरकभेदः। अधिकरणं। कुटति। कुड्मलः। मुकुलः।
कुड्मलो कुड्मले पुंसि नद्योर्नरकांतरे इति मेदिनी। कुष निष्कर्षे। कै। प। कोषणं। धा
तूनामनेकार्थत्वात् छादनं। कुष्मलं। भावे प्रत्ययः। कुष्मलं छादनं। विकासितमि
त्यर्थः। कुषेः। कुष्णाति पीडयति कुल्मलं। पापं। सर्वधातुभ्यः। चिती संज्ञाने। भौ।
प। चेतति। जानात्यनेन चेतः। हृदयं। करणं। सृ गतौ। भौ। सरंति कूर्ममत्स्यादयोऽत्र। सरः।
अधिकरणं। पीङ् पाने। दै। पीयते। पयः। कर्मणि। षद्लृ विशरणगत्यवसादनेषु। भौ। प। सीदंति
तिष्ठंति जना अत्र। सदः। सभा। अधिकरणं। रपेः। रप व्यक्तायां वाचि। भौ। प। रप्यते। निंद्यते।
रेपः। अवद्यं। कर्मणि। अशेः। अशू व्याप्तौ संघाते च। सौ। आ। अश्नुते। व्याप्नोति। यशः। उब्जेः। उब्ज आ
र्जवे। तौ। प। अस्मात् असुन् तस्य हलेवाच्ये बकारलोपश्च। उब्जति। प्रकृष्टीभवत्यनेन। रिघादयः।
ओजः। बलं। करणं। ओजः। टुओश्वि गतिवृद्ध्योः। भौ। प। श्वयति वर्द्धतेऽनेन। शवः। बलं। करणं॥

अयतेः। शिरस् सेवायां। भौ। अस्मात् स्वांगे वाच्ये असुन् स्यात् स्य कित् धातोः शिरादेशश्च। अयति देहं
शिरः उत्तमांगं। अर्त्तेः। ऋ गतौ। भौ। अस्मादसुन् स्यात् कित् तथा नोरुत्वं रपरत्वं च। अर्यते प्रा
उरः।६ प्यते रहः। पुंसा स्त्रिया च। स्त्रीपुंसयो हृदये। कर्म्म। व्याधौ। अर्त्ते रेव व्याधौ वाच्ये असुन्
स्यात्तस्य हुडागमश्च। ऋच्छति प्राप्नोति पापिनं। अर्शः। गुदव्याधिः। उदके। अर्यते नुट् चा नैः।
अर्णः। पानीयं। कर्म्म। इणः। इण् गतौ। भाप। अस्मादसुन् स्यात् पापे वाच्ये तस्य नुडागमश्च।
एति दुःखमनेन। एनः। पापं। करणं। रिचेः। रिचिर् विरेचने। रौ। उ। रिच्यते दीयते वा रेक्णः।
यजो रिति कुत्वं अट्कुप्वाङ् नुम्व्यवायेऽपि इति णत्वं। कर्म। वैदिक निघंटौ सुवर्णपर्यायेषु रेक्ण इति शब्दः ७
पठितः। चायतेः। चायृ पूजा निशामनयोः। भौ। उ। अस्मादन्ने वाच्ये असुन् स्यात्तस्य हुद्धातो
ई स्यत्वं च। लोपो व्योर्वलि इति यलोपः। चायते पूज्यते जनैः। चनः। अन्नं। कर्म। वृङ्शीङ्भ्यां।
वृङ्। संभक्तौ। क्यै। शीङ् स्वप्ने। आ। आ। आभ्यां यथाक्रमं रूपे स्वांगे च वाच्ये असुन् तस्य पुडा
गमश्च। व्रियते चक्षुषा वर्पो रूपं। कर्म। शेते। शि अ समीपे तिष्ठति शेपः। शेपः स्यात् वृषणे पेलमिति ४४२
शुभ्रूतिर्यदः।

स्रुरीभ्यां। स्रु गतौ। भौ। री गतौ। क्रश्यादि। क्यै। प। आभ्यामसुन् तस्य तुडागमश्च स्यात्। स्रव
ति। स्रोतः। रिणाति। गच्छति। रेतः। शुक्रे पारदे च इति मेदिनी। पातेः। पा रक्षणे। आ। प। अ
स्मात् हसे वाच्ये असुन् तस्य जुडागमश्च। पात्यनेन। पाजः। बलं। करणं। उदके। पातेरसुन्
स्यात् उदके वाच्ये तस्य थुडागमश्च। पाति [illegible] लोकान्। पाथः। उदकं। अन्ने च। पाति
प्राणिनः पाथः। अन्नं। अदेः। अद भक्षणे। आ। प। अद्यते प्राणिभिः। अंधः। भक्तमंधो ५नं
इत्यमरः। कर्म। स्कंदेः। स्कंदिर् गति शोषणयोः। भौ। प। अस्मात् स्वांगे वाच्ये असुन् ध
श्चांतादेशः। स्कंदति शोषयति द्रिपूननेन। स्कंधः। प्राण्यंगं। करणं। आपः। आप्लृ व्याप्तौ।
सौ। प। अस्मात् कर्मणि वाच्ये असुन् ह्रस्वश्च धातोर्नुडागमस्तु वा स्यात्। नहि कश्चित् क्षणम
पि अकृति तिष्ठत्य कर्मकृदिति भगवद्वचनात्। आप्नोति जगद्व्याप्नोति। अप्नः। अपः। बाहु
लकात्। आपः। अप्नः। अप्नतयः कर्मवाचकाः। रूपे जुट् च। रूपे वाच्ये आप्नोतेरसुन् ह्रस्वत्वं
धातोः प्रत्ययस्य जुडागमश्च स्यात्। आप्यते चक्षुषा। प्राप्यते। अप्सः। रूपं। कर्म। उदके।

उदके वाच्ये आप्नोतेर सुन् रूस्वत्वं नुमागमो भन्धांता देशः। आप्नोति सर्वमंभः। नदेः। एहबं
धने। दै। उ। अस्मात् गने वाच्ये सुन् भन्धांता देशः। नह्यते धातूनामनेकार्थत्वात् मेघैः स्त्री यते
अवानभः। आकाशं। अधिकरणं। रणः। रणगतौ। आ। प। अस्माद सुन् स्यादपराधे वाच्ये धा
तोरागा देशश्च। एति दुःखमनेन। आगः। पापमपराधश्चा करणं। अमेः। अमगत्यादिषु। भौ। ५४
प। अस्माद सुन् हुगागमश्च धातोः। अमंति गच्छंत्यनेनाधस्तादित्यं हो दुरितं। करणं। रमे अ
रमक्रीडयां। भौ। आ। अस्मात्पूर्ववत्। रमंते ऽनेन। रंहः। वेगः। करणं। देशे ह्य। देशे वाच्ये
रमेर सुन् हकार श्चांता देशः। रमंते ऽत्र रहः। विजनप्रदेशः। अधिकरणं। अंच्यंजि। अं
जुगतिपूजनयोः। भौ। प। अंच्यते। धातूनामनेकार्थत्वात् ज्ञायते ऽनेन। अंकश्चिह्नं। करणं। ४८२
अंच्यति। प्राप्नोति। सुखं दुःखं चानेन। अंकः। शरीरं। करणं। अंकसी। अंकांसि। अंजूव्य
क्तिम्रक्षणकांतिगतिषु। रौ। प। अनक्ति। गच्छति। अंगः। पक्षी। अंगसी। अंगांसि। युज
समाधौ। दै। आ। योजनं। योगः। समाधिः। भावेप्रत्ययः। योगसी। योगांसि। भ्रजीभर्जने।

भौ। आ। भर्जते। कर्मबीजानि। भर्गः। ब्रह्मारव्यं तेजः। हरः। हरिश्च। हरः। स्मरहरो भर्ग इत्यत्र
तु भर्गशब्दोऽदंतः। तु हिनं गइतिबोध्यं। भूरंजिभ्यां। भूसत्तायां। भवंतिति ष्ठंति ~~म~~ सूर्याद
यो ऽत्र। भुवः। अंतरिक्षं। षष्ठ्यंतप्रतिरूपकमव्ययमिदम्। अधिकरणं। रंजरागे। भौ। उ।
भोगे४ रजति। ~~लिप्यते~~ घासक्तं भवति चित्तमनेन। रजः। गुणभेदः। करणं। रजति। रजः। स्त्री
कुसुमं पराग रेणुश्च। रजः क्लीबं गुणांतरे। आर्तवे च परागे ऽपरे णुमात्रे पिदृश्यते इति
मेदिनी। वसेः। वसनिवासे। भौ। प। वसति शरीरे वासो वस्त्रं। चंदेः। चदि आह्लादे। भौ।
प। चंदत्यनेन। छंदः। पद्यभेदः। करणं। चंदत्यनेन स्वैरी। छंदः। स्वैराचारः। करणं। चंदनं।
धातूनामनेकार्थत्वादभिलषणं। छंदः। भावे प्रत्ययः। छंदः पद्यप्रभेदे ऽपि स्वैराचाराभि
लाषयोरिति मेदिनी। पचिवचिभ्यां। पच्यति। दृढं भवत्यनेन। पक्षः। ध्वनी का धि का रैः स्तू करणे२
वे स्त्रिरेहे पक्षसी इति शवरस्वाम्यादयः पच्यति। धातूनामनेकार्थत्वाज्जछत्यनेन पक्षः।
गरुत्। करणं। वच परिभाषणे। आ। प। उच्यते। धातूनामनेकार्थत्वात्त्राच्यते। रहसि। स्त्रीपुंभिः।

वक्षः। ऋदयो वहिहाधाञ्भ्यः। वह प्रापणे। औ। उ। वहति वक्षाः। अनड्वान्। ओहाक् त्यागे। जौ।
जहाति तापमनेन। हासाः। व्येङः। करणे। डुधाञ् धारणपोषणयोः। जौ। दधाति रत्नादीनि।
धासाः। पर्वतः। अत्र पूर्वसूत्रात् सुडनुवर्त्यतामुज्ज्वलदत्तादीनां मते नोदाहरणं वक्षाः।
हासाः। धासाः। इति। प्रांच इति। सकलवृत्तिकृतः प्रासादकारादयश्चेत्यर्थः। एतच्चायुक्तं।
उक्तोदाहरणानि हि लोके तु न दृश्यंते न चासं भवंति। छन्दस्यस्मिन् छंदसीत्युक्तत्वात्। वेदे
तु विपरीतान्येवोदाहरणानि दृश्यंत इत्याह। वक्षांसि त्वेति। वेदभाष्यकारास्त्वेहानुवृ ८५
त्तादित्यवधेयं। इणः। इण् गतौ। आप्। ईयते प्राप्यते शीतार्तैः। अयाः। वह्निः। स्वरा
दिपाठादव्ययं। कर्मि। मिथुनेऽसिः। पूर्ववच्च सर्वं उपसर्गविशिष्टो धातुर्मिथुनं तत्रासुनोऽप
वादोऽसिः। स्वरार्थः। पीङ् पाने। दी। सुष्ठु पीयते जनैः। सुपयाः। उत्तमं पयः। सुष्ठु अनुते। सु अनुस्यातौ
यशाः। उत्तमं यशः। स्रु गतौ। औ। सुष्ठु स्रवति। सुस्रोताः। उत्तमं स्रोतः। इत्याद्युदाहार्यम्। सौ०अ०।८
प्रासादश्चंथे। अशेर्देवने युट् च। अशोरसुन् प्रत्ययः स्यात् रुक् तौ धातोर्युडागमश्च। अनुतेऽकं ४४४

यशाः। मिथुनेऽसिः। पूर्ववच्च सर्वं। धातूपसर्गसंबंधो मिथुनं तत्रासुनोऽपवादोऽसिः पूर्ववच्च सर्वं
कार्यं। सुष्ठु अनुते। सुयशाः। सुष्ठु स्रवति। सुस्रोताः। इत्यादि। मनोरमायां। सर्वधातुभ्योऽसुन्। पीङ्
पाने। पयः। मिथुनेऽसिः। पूर्ववच्च सर्वं उपसर्गविशिष्टो धातुर्मिथुनं तत्रासुनोऽपवादोऽसिः। सुपयाः।
सुस्रोताः। इत्याद्युदाहरणं। इत्यंशः सादे मनोरमायां च सुयशः सुपयः प्रभृतीनां पुंस्त्वं दर्शनात्
उपसर्गक्रियासंबंधे सति असिप्रत्ययांताः सुयशाः सुपयः प्रभृतयः पुंसीत्युत्सर्गः। सुपयः
प्रभृतीनां च क्लीबत्वं दृश्यते तत्र सुष्ठु पयः सुपयः। इत्यादि व्युत्पत्तिर्बोध्या। उपसर्गक्रिया
संबंधाभावात् असिप्रत्ययाभावेन असुन्प्रत्ययांतास्ते सुपयः प्रभृतयः क्लीबे वर्तंत इत्य
वधेयं। नञि हनः। हंतेर्नञ्युपपदेऽसिः स्यात् धातोरेहादेशश्च। सहुशानः पुरुदंसेत्यादिना साधनञ्। स्
न हंति। अनेहा। कालोऽदिष्टोऽप्यनेहापि समय इत्यमरः। विधाञः। डुधाञ् धारणदौ। जौ। विपूर्वा
दस्मादसिः स्याद्वेधादेशश्च। सोपसर्गधातोः। विदधाति वेधाः। ब्रह्मा। नुवो धुट् च। णु स्तुतौ।
आप्। अस्मादसिः स्यात् तस्य धुडागमश्च। नौति देवान् नूयते जनैरिति वा नोधाः। रुस बिः।

सद्योऽभवद्वीर्यवतो यथा इति मंत्रे नोधा ऋषिर्भवतीति निरुक्तं । कर्तृकर्मण्योः । गतिकार-
कयोः । गतौ कारके चोपपदे असिः स्यात् पूर्वपदप्रकृतिस्वरत्वं च । तप संतापे ।
नौ । पा । क्षुतपति । क्षुतपाः । विद ज्ञाने । आप । जातं वेत्ति जातवेदाः । अग्निः । चंद्रे मा इः
माने शब्दे च । जौ । चंद्रं रंजनममृतं यत्र दिव मीयते असौ चंद्रमाः । इति हरदत्तः । कर्म-
णि प्रत्ययः । वयसि । डुधाञ् धारणपोषणयोः । जौ । अस्माद्वयस्युपपदे सिः स्यात्स ९३
च डित् । वयो दधाति । यौवनं वयो धारयति । वयोधाः । तरुणः । पयसि च । पयःशब्दे
उपपदे डुधाञः पूर्ववत् । पयो दधाति । पयोधाः । पुरसि च । पुरःशब्दे उपपदे पूर्ववत् ।
पुरो धीयते । अग्रे क्रियते । पुरोधास्तु पुरोहित इत्यमरः । कर्म । पुरूरवाः । रुशब्दे । आ ।
प । पुरुभिर्बहुभिः रूयते स्तूयते । पुरूरवाः । पुरूरवा बुधसुतो राजर्षिः पुरूरवा ४५
इत्यमरः । चक्षेः । चक्षिङ् व्यक्तायां वाचि । आ । आ । अस्मादसिः स्यात्स च बहुलं शित् ।
शित्वात् सार्वधातुकसंज्ञायां ख्याञ् न । नृन्चष्टे नरान्प्रति भीषणं वाचं वक्ति । नृचक्षाः ।

राक्षसः । शित्त्वाभावपक्षे तु ख्याञादेशः । प्रचष्टे धर्मं प्रख्याः । प्रजापतिः । उषः । उष दाहे ।
नौ । पा । अस्माद् असिः स्यात् स च कित् । ओषति चक्रवाकानां विरहं । उषः प्रभातम् । दमेः ।
दमु उपशमे । दीप । दाम्यति पापं दमुनाः । अग्निः । अंगिराः । अगि गतौ । भौ । प । अंगति
धर्मं प्रति गच्छति । अंगिराः । ऋषिभेदः । अप्सराः । सृ गतौ । भौ । अद्भ्यः सृता । निःसृता ।
अप्सराः । भूतकाले कर्त्तरि प्रत्ययः । प्रायेणेति । स्त्रियां बहुष्वप्सरस इत्यमरः । स्त्रियां
बहुष्वप्सरसः स्यादेकत्वेऽप्सरा इति शब्दार्णवः । अप्सरः स्वप्सराः प्रोक्ताः सुमनाः सुम-
नसश्चेति द्विरूपकोशः । एकाप्सरः प्रार्थितयोर्विवाद इति रघुः । विदिभुजिभ्यां ।
विद ज्ञाने । आप । भुज पालनादौ । रौ । ऊ । आभ्यां विश्वशब्दे उपपदेऽसिः स्यात् । शब्द-
स्वरूपपरत्वाद्विश्वे इत्यत्र स्मिन्नादेशो न तत्र । विश्वं वेत्ति । विश्ववेदाः । विश्वं भुंक्ते ।
विश्वभोजाः । यत्तु तत्पुरुषे कृति ति सप्तम्या अलुक् । विश्वेवेदाः । अग्निः । विश्वेभोजाः ।
इंद्र इत्युज्ज्वलदत्तेनोक्तं तन्न । तथा सति स्मिन्नादेशस्य दुर्वारत्वापत्तेः । सुश्लीकोभव

उविश्ववेदाः। पूषा भगः प्रभृथे विश्वभोजा इत्यादिषु मंत्रेषु सुपो लुक एव दर्शनात्। वशेः। वश
कांतौ। कांतिरिक्षा। आ॰ पा॰ वष्टि मृतसंजीविनीं विद्यां उशना भार्गवः कविरित्यमरः। इत्युण
दिषु चतुर्थः पादः॥ अदिभुवः। अत् इत्यव्ययं आकस्मिकार्थे तस्मिन्नुपपदे भूधातोर्डुतच्
स्यात् डित्वात् टिलोपः। अद्भवनं। अकस्माद्भवनं। अद्भुतं। आश्चर्यं। भावे प्रत्ययः। गुधेः।
गुध परिवेष्टने। दि॰ पा॰ गुध्यते। परिवेष्ट्यते प्राणिभिः। गोधूमः। कर्मणि प्रत्ययः। मसेः। मसी ७
परिणामे परिणामो विकारः। दि॰ पा॰ मसूरः प्रथमपादे व्याख्यातः। स्थः किच्च। ष्ठा गतिनि
वृत्तौ। भ्वा॰ तिष्ठति। स्थूरो मनुष्यः। कित्वादालोपः। पातेः। पा रक्षणे। अ॰ प॰ पाति। पातिः।
स्वामी। संपाति। संपातिः पक्षिराजः। वातेः। वा गतिगंधनयोः। अ॰ प॰ वाति। गच्छति। वाति
रादित्यसोमयोः। अर्तेश्च। ऋ गतौ। भ्वा॰ अस्मादतिः स्यात् स च नित्। ऋच्छति। गच्छति। सुखं ४४
अनयेति। अरतिः उद्वेगः करणं। रहेः। रह हिंसायां। रौ॰ पा॰ रह्यते। हन्यते मृगादिभिः

रणं। कर्मणि प्रत्ययः। खुरतुरि॰। हम्म वरणे। भ्वा॰। खुर विलोडने। भ्वा॰ पा॰ तनु विस्तारे। ता॰ उ॰
तड आघाते। चु॰ एभ्य उलच् स्यात् अदेशश्च धातोः। ब्रियंते। खुद्यंते। तन्यंते। ताड्यंते वा।
तंडुलाः। कर्मणि प्रत्ययः। यद्यपि सामान्येन धर्मश्लीतिसूत्रे तंडुलशब्दो निपातितस्तथापि प्र
त्ययस्वरेण मध्योदात्तः सः। अयं तु चित्स्वरेणांतोदात्त इति विवेकः। दंसेः। दसि दंशनदर्शन
योः। चौ॰ आ॰। अस्मात् टटनौ स्यातां नकारस्याकारः। दंसयते। पश्यति। स्वामिनं। आ॰ णं च
दासः सेवकशूद्रयोः। दंशेश्च। दशि दंशने। चौ॰ आ॰। अस्मादपि टटनौ स्तो नकारस्य आत्वं
स्यात्। दंशयते। मत्स्यान्। दाशः। कैवर्ते दाशधीवरावित्यमरः। उदि चेः। चिञ् चयने। सौ॰।
उदः परस्मादस्मात् डैसिः स्यात् डैसोडित्वात् टिलोपः। उच्चयनं। धातूनामनेकार्थत्वात् ऊ र्ध्व
भवनं। उच्चैः। स्वरादिपाठादव्ययत्वं। भावे प्रत्ययः। नौ दीर्घश्च। नौ उपपदे चिनोतेर्डैसिः स्यात्
नेर्दीर्घश्च। निचयनं। धातूनामनेकार्थत्वात् न्यग्भवनं। नीचैः। स्वरादिपाठादव्ययत्वं। भावे
प्रत्ययः। सौ रमेः। रम क्रीडायां। भ्वा॰ आ॰। सुरमते। सूरतः उपशांतो दयालुश्च। प्रमोयलुक।

पूञ् पवने। कै। पुनाति। पुण्यं। त्रसेः। त्रसं। सु। अध्वंसने। भौ। आत्रंसते। त्रस्यति। शिक्यं। परि
पुष्पार्थे २ आइ्निवासाजने। अतेः। अगतौ। भौ। अच्छति। अक्षुरणोमेषः। हिंसेः। हि सि हिंसायां। रौ। पा। हि मेढ्र २
नस्ति। हिंसीरः। उदि हणातेः। हृ विदारणे। कै। उद्युपपदे हणातेर ञ सोस्तः पूर्वपदांत्य लोपश्च।
उदीर्यते। स्यूसंक्रियते। वायुना। उदरं। कर्मणिप्रत्ययः। डित् खनेः। खनु अवदारणे। भौ। उ।
खन्यते। सुरताधिजिः। मुखं। कर्मणिप्रत्ययः। अमेः सन्। अम गत्यादिषु। भौ। प। अमति। मुह्याय ४८
अस्मात् मूर्खः अपादानं ५ गच्छत्यनेन। अंसः स्कंधः। करणे। मुहेः। मुह वैचित्ये। दै। प। मुह्यति। मूर्खः। नहेः। णह बंधने।
दै। उ। नह्यति। नह्यत द्वारा कामिनां प्रीतिमुत्पादयति। नखः। शीङः। शीङ् स्वप्ने। आ। आ। शेते
शिरस्ति तिष्ठति। शिखा। माङः। माङ् माने शब्दे च। जौ। मिमीते। धातूनां अनेकार्थत्वात् प्रकाश
यति पदार्थान्। मयूखः किरणः। कलिगलिभ्यां। कल शब्दसंख्यानयोः। भौ। आ। गल अदने। ४७
जौ। प। आभ्यां फक् स्यात् धातोरकारस्योत्वं च। कल्यते गल्यते। कुल्फः। जंघा। कर्मीकल
तिशब्दं करोत्यनेन। कुल्फो रोगः। कर्त्ता। गल्यते। मांसैः। गुल्फः। तद् ग्रंथी घुटिके गुल्फाविति अमरः।

नयोः पादयोः ग्रंथी इत्यर्थः। स्पृशेः। स्पृश संस्पर्शने। तौ। प। स्पृशति। तल्पो। पार्श्वः। स्पृशति रिपु
शरीरं। पर्शुः। आयुधं। श्मनि। श्रि अ से वायां। भौ। अस्मात् अन्युपपदे डुन् स्यात् डित्वात् टिलोपः।
मुखमाश्रयते। श्मश्रु। तद्वयौ श्मश्रुपुंमुखे। पुरुषस्य मुखे तेषां रोमाणां द्वे हो श्मश्रु शब्दो वर्त्तते
इत्यमरः। अश्वादयश्च। अश्रू व्याप्तौ। सौ। आ। अस्मात् क्रुन् प्रत्ययो नञ् पूर्वादिश्रयते डुन् वा।
अश्रुतेनेत्रं। नश्रयति नेत्रं किंतु अधः पततीति वा। अश्रु। जनेः। जनी प्रादुर्भावे। दै। आ। अ
स्मात् टन् धातोरंत्य लोपश्च। जायते। जटा। अघ्न्यस्या। जायते। जंघा। अजादतइति टाप्। हंतेः।
हन हिंसागत्योः। आ। प। देहावयवे वाच्ये हंतेरय प्रत्ययः स्यात् द्वित्वं च धातोः। अभ्या
सकार्यं। अभ्यासाच्चेति कुत्वं। हन्यते जघनं। कर्मणिप्रत्ययः। क्लिशेरन्। क्लिश विबाधने।
कै। प। क्लिश्नाति। केशः। फलेः। फल निष्पत्तौ। भौ। प। फलति परिपक्वो भवति। अनेन प
लितं। पलितं जरसा शौक्ल्यं इत्यमरः। करणं। नञादिभ्यः। डुकृञ् करणे। ता। करोति। ज
लधारणं। करकः कमंडलुः। करोति शीनलत्वं करकः। दृष्टिपाषाणः। करके वर्षावरणयोः।

कौ०रतिर्
टीका

उ०पा०५

भौ।पा। करटिति। आवृणोति हस्तं। करटको वलयं। कर्मणि कि द्यते आव्रियते मेयैः करकः सा कु।
कर्मा करटको वलये सा नौ। कुन्दशिल्पि संज्ञयोरिति कुनाप्ययं सिद्धः। गुणभाज इहैवार्था
र्यः। गुणनिषेधभाजस्तु कुनि। उदासीनास्तु यत्र कुत्रापि दिति भावः। नृ नये। कौ। नृणाति
दुःखं प्रापयति नरकः। नरकः पुंसि निरये देवात् यातिप्रभेदयोरिति मेदिनी। उदयनाप्या यक्ति
नयनरका एवे वसंतीति स्त्रीबं प्रयुंजते। तत्र मूलं मृग्यं। स्त्र गतौ। भौ। सरं तिप क्विणोऽत्रा ४८
सरकं। गगनं। अधिकरणे। कुरशब्दे। नौ। कुरंति मधुकरा अत्र। कोरकोऽस्त्री कुड्मलेस्या
दिति मेदिनी। अधिकरणे। चीकयतेः। शीक आमर्षणे। चीक्यात्। यौ। चीकयति। धातूनां
अनेकार्थत्वात् शब्दं करोति। कीचकः। सच्छिद्रवंशः। पचिमच्योः। डुपचष् पाके। भौ। उ। ४८
पचति अमंगलशब्दत्वात् आयुः परिपूर्णं भवत्यनेन। पेचकः। उलूकः। करणे। पचति
धातूनामनेकार्थत्वात् पश्चाद्भागे तिष्ठति। पेचकः करिपुच्छ॥ ~~पचति फलमनेन पेचकः~~ मूलोपांतं।
~~मूलोपांतं। कर्त्तरि~~। उलूके करिणः पुच्छमूलोपांते च पेचक इत्यमरः। मच्यमुचिकल्कने। कर्त्तरि

भौ। आ। मच्यते धातूनां अनेकार्थत्वात् चित्तं हरति। मेचकः स्तम मूरस्य यं इके श्यामके
पुमानिति मेदिनी। जनेः। जनी प्रादुर्भावे। दै। आ। दुर्भरत्वात् जायते दुःखमनेन। जठरं।
करणे। वचिमनिभ्यां। वच परिभाषणे। आ। प। मन ज्ञाने। दै। आ। आभ्यामरः प्रत्ययः स्या
त्स्यचित् ठश्चांतादेशः। वक्ति। वठरो मूर्खः। मन्यते जनैः श्रेष्ठत्वेन ज्ञायते। मठरो मुनि
शौंड्योः। शौंड आतुरः। कर्म। बिदादित्वादिति। अनृष्यानंतर्ये बिदादिभ्योऽञ्। एभ्योऽनृ
त्रा३ गोत्रे ये त्वनृषयस्तेभ्य आनंतर्ये। मठरस्य गोत्रं माठरः। गर्गादित्वादिति। गर्गादिभ्यो
यञ्। गोत्र इत्येव। मठरस्य गोत्रं माठर्यः। ऊर्जिदृणातेः। दृ विदारणे। कै। अस्माद् ऊर्जुपपदे
अलचौ प्रत्ययौ स्तः पूर्वपदांत्यलोपश्च। ऊर्जं बलप्राणनयोः। चौ। ऊर्जयति। बलवान्
भवति। ऊर्क्। भ्राज भासेति क्विपि णिलोपः। ऊर्जं बलवंतं दृणाति। ऊर्दरः शूरः राक्षसः।
तदराश्च। तस्य एतदव्ययपूर्वक दृणाति प्रभृतिकांजंतानि पात्यंते। तदृणाति। धातू
कोठी१ नामनेकार्थत्वात् धान्यं दधाति। तदरः कुसूलः। मदुःखं दृणाति। मदरं बिलसत्। रुखं

दृणाति। त्वदरः सर्पः। हंतेर्घुट् च। हन हिंसागत्योः। आ। प। हंति। घ्यतनः। क्रमिगमि। क्रमु पादवि
क्षेपे। भौ। प। क्रामति। आकाशे गच्छति। क्रांतुः पक्षी। गम्लृ गतौ। भौ। प। गच्छति। गांतुः पथिकः।
क्षमूष् सहने। भौ। आ। क्षमते। क्षांतुः मशकः। हर्यतेः। हर्य गतिकांत्योः। भौ। प। हर्यति। दीप्यते।
हिरण्यं। तनः। डु कृञ् करणे। त। करोति वस्त्रमनेन। कर्पासः। करणे प्रत्ययः। बिल्वादित्वा
दिति। तस्य विकारः। बिल्वादिभ्योऽण्। कर्पासस्य विकारः। कार्पासं वस्त्रं। जनेः। जनी प्रा १००
दुर्भावे। दै। आ। तु इत्यविभक्तिको। जनेः क्तप्रत्ययो रेफश्चांतादेशः। जायते जर्तुः हस्ती।
कर्ता। जायतेऽत्र जर्तुः योनिः। अधिकरणे। ऊर्णोतेर्डः। ऊर्णुञ् आच्छादने। आ। उ। ऊर्णोति
ऊर्णं मेषादिलोम। दधातेः। डु धाञ् धारणपोषणयोः। जौ। दधाति। पोषयति। धान्यं। जीर्यतेः।
जॄष् वयोहानौ। दै। प। अस्मात् क्विन् स्यात्। रॄतइद्धातोः। रपरत्वं। रेफस्य वकारः। जीर्यति। ४४९
अंतर्भावितण्यर्थत्वात् जीर्णं करोति। जिव्रिः कालः। जीर्यति जीर्णो भवति जिव्रिः पक्षी।
मन्थतेः। मन्थ बंधने। भौ। प। अंत्यस्येति। वकारस्येत्यर्थः। मथ्यति। समापना लोविषये।

ऋजेः। ऋज गतिस्थानार्जनोपार्जनेषु। भौ। आ। ऋंजते। नंदनवनं। ऋजीक इंद्रः। अर्जति गच्छ
ति। ऋजीको धूमः। तनोतेरुः सन्वच्च। तनु विस्तारे। ता। उ। अस्मात् उः प्रत्ययस्तस्य सन्व
द्भावात् द्वित्वं अभ्यासस्येत्वं च। डित्त्वात् टिलोपः। एषु उच्चारणसामर्थ्यात् गुणो न। तनोति पादि
त्यं विस्तारयति। तितउः। चालनी तितउः पुमानित्यमरः। चालनं तितउ न्युक्तमिति कोशांतरे।
अर्भकः। एते निपात्यंते। निपातप्रकारमेवाह। ऋधु रद्धावित्यादिना। ऋधु रद्धौ। दै। प। ऋध्य
ति। अर्भकः। प्रथ प्रख्याने। भौ। आ। प्रथते। पृथुकः। पा पाने। भौ। पिबति स्तन्यादिकं। पाकः।
पोतः पाको अर्भको डिंभः पृथुकः शावकः शिशुरित्यमरः। अवद्यादयः कुत्सिते निपात्यंते।
वद व्यक्तायां वाचि। भौ। प। नञुपपदे। अवद्यं। गर्ह्यकर्मणि प्रत्ययः। अव रक्षणादिषु। भौ। प।
अवति। हिनस्ति। अवमः। वस्यधपद्ये। अधमः। ऋ गतौ। भौ। ऋच्छत्यस्मात्। अर्वा गर्ह्यः।
अपादाने। रिफ कत्थनयुद्धनिंदाहिंसादानेषु। तौ। प। रिफति। हिनस्ति। रेफः। निकृष्टः। नि
कृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः इत्यमरः। कूयकुत्सितावद्यखेटगर्ह्याणकाः समाः इति च।

सीरीकेः। सीङ् स्रेषणे दैः। रीङ् श्रवणे दैः। क्रमादिति। स्रेषणे वाच्ये नप्रत्ययः। कुत्सने वाच्ये रप्रत्य
यइत्यर्थः। अद्भुतेशालि संस्तिरं। भूतकालेक तरिप्रत्ययः। शीयते। ...दुष्टत्वेन श्रूयते जनैः।
रिप्रं कुत्सितं। कर्मणि प्रत्ययः। क्लिशेः। क्लिशू विबाधने। क्रै। पा नामागम श्चेति। प्रत्ययस्य तिशेषः।
चिंत्यमिति। इत्वविधान सामर्थ्यादेव गुणाभावसिद्धेरिति भावः। क्लिश्नाति। कीनाशः। अशेः।
अशूङ्व्याप्तौ। सौ। आ। अस्मादरदूस्यात्। आशुशीघ्रं कर्मवरदानादि क्रिया यस्य तस्मिन्वाच्ये। १०९
शीघ्रदातरीत्यर्थः। अश्नुते ईश्वरः। चतेरुरन्। चतेयाचने। भौ। उ। अस्मादुरन्स्यात्। अका
रउच्चारणार्थः। चतंते। धातूनामनेकार्थत्वात्। एकः। द्वितीयः। तृतीयः। चतुर्थः। इत्थं बुद्धिं विस्तारयंति।
चत्वारः। प्रातेररन्। अतसातत्यगमने। भौ। प। अस्मादरन्स्यात्। रेफादकार उच्चारणार्थः।
प्रातति। उदयाच्चल्समूहनं प्राप्नोति रविरत्र। प्रातः। प्रभातम्। स्वरादिपाठादव्ययत्वं। अधिकरणं।
अमेः। अमगत्यादिषु। भौ। प। अस्मादरन्स्यात्तस्य तुडागमश्च। अमति गच्छति। अत्र। अंतर्मध्यं। ४५०
अंतः शब्दोपि प्रातः शब्दवदव्ययम्। अधिकरणं। दहेः। दह भस्मीकरणे। भौ। प। दह्यते दावाग्निना।

नगः। नगो महीरुहे शैलेइति मेदिनी। कर्म। सिचेः। षिच क्षरणे। तौ। उ। हकारादेशो धातोरंत्यस्य। सिंचति।
प्राद्रकालेघन रवं कृत्वा ऊर्ध्वं घनात् क्षरति। सिंहः। व्याङि। घ्राङ्गंधोपादाने। भौ। व्याङ्पूर्वा दि
स्मात् घ्रो नौ वाच्ये कः स्यात् किस्वाद्यौलोपः। व्याजिघ्रति। व्याघ्रः। हंतेः। हन हिंसागत्योः। आ। प।
अस्माद्रस्यात् धातोर्घुरादेशश्च। हंति सुखं। घोरं। भीमे। हंति प्रलयकाले जगदिति। घोरोहरः।
घोरं भीमे हरे घोर इति विश्वः। क्षमेः। क्षमूष् सहने। भौ। आ। क्षमते। क्ष्मा। अवनिर्मेदिनी मही त्यमरः।
तरतेर्डिः। तॄ प्लवनतरणयोः। भौ। अस्मात् ड्रिः स्यात्। डित्वात् टिलोपः। तरंति धातूनामनेकार्थ
त्वात्। एकः। द्वितीयः। तृतीयः। इति बुद्धिं विस्तारयंति। त्रयः। ग्रहेः। ग्रह उपादाने। क्रै। प। गृह्णाति।
पुरीषमिति। ग्रहणिः। व्याधिभेदः। ङीबिति। कृदिकारादित्यनेन। ग्रहणी रुक् प्रवाहिकेत्यमरः।
प्रथेः। प्रथ प्रख्याने। भौ। आ। प्रथते। प्रथमः। चरेश्च। चर गतिभक्षणयोः। भौ। प। चरति। अधः
स्थानं प्राप्नोति। चरमः। मंगेरलच्। मगि गत्यर्थः। भौ। प। मंगति। प्राप्नोत्यानंदमनेन। मंगलम्।
कल्याणं मंगलं शुभम्। इति मेदिनी। करणं। इत्युणादिषु पंचमः पादः। उणादयो बहुलम्।

वर्त्तमाने लडित्यतो वर्त्तमानग्रहणं ध्रुवः संज्ञायामित्यतः संज्ञाग्रहणं चानुवर्त्तते। तदाह एत इति।
एते वर्त्तमाने संज्ञायां च बहुलं स्युः। बाहुलकादसंज्ञायामपि। अत्र हि सूत्रे धातोः प्रत्ययः।
लटदिति ङिति चानुवर्त्तते। तथा पाजिमीत्यादिना विहितानामष्टाध्यायीबहिर्भूतानामप्युणादीनां
प्रत्ययसंज्ञा तत्संज्ञा च सिध्यति। तथा च उणादिप्रत्ययाः सर्वे धातोः परश्च कर्त्तरि कृदिति कर्त्रर्थे
भवंति। उणादिप्रत्ययांतस्य कृत्तद्धितेति प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिरित्यादि सर्वम १०२
पीष्टं सिध्यति। अपरिपूर्णानामुणादीनां परिपूर्णार्थं बहुलग्रहणं तस्य फलमाह। केचिदविहि
ता अपीति। ऋषेरुलच् विहितः सन्तु शंकेरपि भवति। शंकुलेति प्रयोगदर्शनात्। किंच।
फिड्फिड्डुप्रत्ययौ क्वचिदपि न विहितौ अथ च दृश्येते। ऋफिड ऋफिड्डु इति। तयोः कित्त्वं च कल्प्य ८५१
ते। संज्ञासु चेति। अनादिसंज्ञास्वेव न तु सर्वासु इत्याहुः। ऋषेरुलजिति प्रत्ययं दृष्ट्वा शंकिः
प्रकृतिरूह्यते। तेन शंकुलेति सिद्धम्। ऋगतावित्यादिभ्यः फिड्फिड्डादिप्रत्यया ऊह्यंते।
कार्याद्विद्यादिति। ऋफिड इत्यादौ गुणप्रतिषेधादिकार्यविरोधादनुबंधककारादिकं विद्यात्।

अनुबंधमित्यत्र उपसर्गे घञि इति दीर्घः। एतच्चुणादिषु शास्त्रं शासितव्यमित्यर्थः। शासनं शासितव्यं।
अनुबंधमित्युपलक्षणं। आगमादेशविकाराणामपि। एतदूहात्मकं शास्त्रमुणादिषु उक्तलक्ष
णेष्वपि ज्ञेयमित्यर्थः। भूतेपि दृश्यंते। नन्वेवं वर्त्तमानग्रहणमेवोणादयो बहुलमित्यत्र नानुवर्त्य
तां। एतच्चोत्तरसूत्रद्वयं त्यज्यतां। अविशेषेण कालत्रयेपि प्रत्ययलाभादिति चेदत्राहुः। बाहुल्येन व
र्त्तमाने भवंति भूतभविष्यतोस्तु क्वचिदेवेति विवेकप्रदर्शनायेदं सूत्रद्वयमिति। भविष्यति गम्यादयः।
गमिष्यति इति गमी ग्रामम्। आगमिष्यति इत्यागामी। गमेरिनिः आङि णिदित्याङ् पूर्वस्य
णित्वादुपधावृद्धिः। दाशगोघ्नौ संप्रदाने। दाश दाने। औ। उ। हन हिंसागत्योः। आप भीमा
भियः षुग्वा ३५ दयोऽपादाने। ञिभी भये। औ। [illegible]मिति मप्रत्ययसन्नियोगेन वैकल्पिकः षुक्। बि
भेत्यस्मादिति। भीमः। भीष्मः। स्कंदिर्गतिशोषणयोः। औ। पा। प्रस्कंदत्यस्मादिति प्रस्कंदनः।
अपादाने स्पुद्रक्ष पालने। औ। पा। प्ररक्षत्यस्मादिति प्ररक्षः। पचाद्यच्। मुह वैचित्ये। औ। पा
मुह्यत्यस्मादिति मूर्खः। मुहेः खो मूर् च। खल संचलने। खलत्यस्मादिति खलति। नि
ष्कशिरा इति प्रागुक्तम्। नाभ्यामन्यत्रोणादयः। नाभ्यामिनीति। नाभ्यामित्युक्तौ तु सन्निहिता

कौ०वृत्ति २
का

पादानस्यैव परामर्शादपादानादन्यत्रेत्यर्थः स्यादिति भावः। ततो णाविति। तनोतेः कर्तरि क्तः॥
अनुदात्तोपदेशेत्यनुनासिकलोपः। असौ ततो भवति विस्तृतो भवतीत्यर्थे तनोतेः क्तान्नाकर्तरि
ततमिति। वृतु वर्तने। भौ०आ०। जनैर्गमनादिना। एतं निष्पन्नं धातूनामनेकार्थत्वात् ततमिति
यावत्। वर्त्म मार्गः। इतेः कर्मणि मनिन्। चर गतिभक्षणयोः। भौ०पा०। शरीरेण चरितं प्राप्तं।
चर्मेत्यर्थः। भूतकाले कर्मणि मनिन्। इति दिङ्मात्रप्रदर्शनं। उणादिवृत्तौ यत्र लिंगनिर्देशो
न तत्र तत्र उपस्थितं परित्यज्यानुपस्थितकल्पनाया अन्याय्यत्वात् पुल्लिंगत्वे तु उत्सर्गः॥ तुमुन्
ण्वुलौ। क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था तस्यां। अत्रेदं बोध्यं तुमुन्ण्वुलोः सत्त्वाविशेषेपि
अव्ययकृतो भावे इति वचनाद्भावे तुमुन्। ण्वुल्तु कर्तरि। क्रियायामिति सप्तमीनिर्देशात्सद्वाचकस्य
यातीत्यादेः तत्रोपपदे सप्तमीस्थमित्युपपदत्वं। कृष्णं द्रष्टुमिति। कृष्णकर्मकं यद्विषयदर्शनं
तत्प्रयोजनं यानमित्यर्थः। क्रियायां किं। भिक्षिष्ये इत्यस्य जटाः। इह भिक्षार्था जटाः। ताश्च द्रव्यं
न तु क्रिया। भिक्षितुं जटा इति प्रयोगस्तु धारयतीत्यध्याहारेण समर्थनीयः। क्रियार्थायां किम्।
धावतस्ते पतति दंडः। अत्र धावत इति क्रिया न त्वसौ दंडपतनार्था। धावनं तु दंडपतने
कृष्णं दर्शको यातीति। अकेनोरिति न षष्ठी। नु विषयदर्शनकर्तृकं कर्तृकं तद्दृश्यकं य
यानमित्यर्थः॥२

उणादि ९३

यरितम
ति ४

१०२

४५२

इच्छार्थे ११

हेतुर्भवति। ननु द्रष्टव्यमिति दिक्। समानकर्तृकेषु। अक्रियार्थेति। भोक्तुमिच्छतीत्यत्र भो
जनविषयिणीच्छेति प्रतीयते। न तु भोजनार्थेच्छेति। अतः पूर्वेणाप्राप्तिरिति भावः। एके
ति किं। पुत्रस्य पठनमिच्छति। पुत्रस्येति कर्तरि षष्ठी। पुत्रकर्तृकपठनमित्यर्थः। इह सूत्रे
समानकर्तृकेति पदाभावे पुत्रस्य पठितुमिच्छतीति प्रयोगः स्यात्। शकधृष। अयमपि
क्रियार्थेपि पदार्थमारंभः। भोक्तुं शक्नोति धृष्णोति जानाति इत्यत्र हि तुमुन्नर्थो विषयत
या संबध्यते नैव पुण्यं च गम्यते। ग्लायति भोक्तुमित्यत्र भोजनविषयिण्यशक्तिर्गम्यते॥
भोक्तुं घटते इत्यत्र भोक्तुमर्हतीति योग्यता। आरभते प्रक्रमते उत्सहते। भोक्तुमिति भुजे
राद्यावस्था। लभते इत्यत्राप्यत्याख्यानम्। अस्ति भोक्तुमित्यादौ तु संभवमात्रम्। पर्याप्ति
कालसमय भोक्तुमिति। भोक्तुं समर्थ इत्यर्थः। उपलक्षणार्थमिति। तस्य फलमाह। अनेहा इति। कालो
दिष्टोप्यनेहापीत्यमरः। भाववचनाश्च। क्रियार्थोपपदे विशेषविहितेन तुमुना स्वविषये
घञादीनां बाधे प्राप्ते वचनं। यागायेति। यष्टुमित्यर्थः। वासरूपविधिना यष्टुं यातीति। याज
को यातीत्यपि। तुमर्थाच्च भाववचनादिति यागायेत्यत्र चतुर्थी॥ अण् कर्मणि च। ण्वुलोऽप

पर्याप्ति
वचनेष्व

वादइति। अथयन्तो भावे इति भावे विहितत्वात्तुमुनः प्राप्तिरेव नास्तीति भावः। अथ ति
कर्त्तरि। कांडलावो व्रजति। वासरूप॰विधिना कांडलावको व्रजति इत्यपि। भावे तुमुनि
कांडं लवितुं व्रजति। कंबलदायो व्रजति। वासरूपविधिना कंबलंदायको व्रजति।
भावे तुमुनि कंबलं दातुं व्रजति। पदरुज [illegible] ऽन्यः कर्त्तरि घञ्। पदगतौ दै॰ आ॰ पद्य
ते। सोपादः। करणस्य कर्तृविवक्षात्र बोध्या। पद्यते गच्छतीयेनेति फलितोऽर्थः। रुजादिभ्यः १०४
इगुपधलक्षणे के कर्त्तरि प्राप्ते पदरुजेति घञ्। रुजो भंगे। तौ॰प॰ रुजति। पीड्यति। रोगः।
विश प्रवेशने। तौ॰प॰ विशतीति वेशः। वेशः। स्पृश संस्पर्शने। तौ॰प॰ स्पृशतीति। स्पर्शः। स्पृश
उपतापइति वक्तव्यो उपतापो रोगः। तत्र यन्निम्नितीत्या द्युरातं स्पर्शशब्दो भवति। अन्य
त्र पच्याद्यचि पि स्यादंतो दास एव। सृ स्थिरे। सृ गतौ भौ॰ धाधीत्यादि। अस्थिरार्थमिदं व
चनं। सारो बलमिति। सरति। सारो बलं। अत्रापि स्थाधातुरंतर्भावितण्यर्थः। सारय ८५३
ति वेष्टयतीत्यर्थानुरोधात्। बलवान् एव हि वेष्टते। भावे। क्रियांतरापेक्षो धात्वर्थः सि
द्धावस्थापन्नः। कारकापेक्षो धात्वर्थोऽसिद्धावस्थापन्नः। असत्वभूतो धात्वर्थस्तिङ्

नेनाभिधीयते। इति वचनात्। तिङ्न्तवाच्यो धात्वर्थोऽद्रव्यत्वान्न लिंगसंख्याका
रकान्वयी। घञादिवाच्यो धात्वर्थस्तु द्रव्यत्वात् लिंगसंख्याकारकान्वयी॥
यद्यपि धातुरेव धात्वर्थमाह तथापि यस्तस्य सिद्धता नाम धर्मः स घञादि
भिरुच्यते। अत एव द्रव्यधर्म लिंगसंख्याशक्तिसंबंधमुपादत्ते न त्वाख्या
ताभिहितः। तदुक्तं। क्रियायाः सिद्धावस्था साध्यावस्था च कीर्त्तिता। सिद्धतां
द्रव्यमिच्छंति तत्रैवेच्छंति घञ्विधिमिति। पचनं। पाकः। स्फुरति स्फुलत्योः
स्फुर स्फुल संचलने। तौदादिकौ परस्मैपदिनौ। स्फुरणं स्फारः। स्फुलनं स्फालः। इन्
हरतेः परिहरणं। परीहारः। इकः। काशृ दीप्तौ। भौ॰ आ॰ निकाशनं नीकाशः। प्रकृत परि
खेदेभ्यः दै॰प॰ विश्रमणं। विश्रामः। इति त्व पाणिनीयं। श्रमेरुदात्तोपदेशत्वान्न घञि वृद्धेर्दुर्ल
भत्वात्। यदि तु धृयन्वि श्रामयेत्यादा विवणि णिचि रहेमाश्रित्य णिजंतात् एरच् क्रिय
ते तदा रूपं सिध्यति। न च णिच्यपि वृद्धिनिषेधः शंक्यः। नोदात्तोपदेशस्येत्यत्र लेतीत्यनुवृत्त्या णिचि
निषेधाभावात्। न चैवमपि मितां ह्रस्वः स्यादिति शंक्यं। वेत्यनुवृत्त्या व्यवस्थितविभाषा

अयणेन ह्रस्वाभावसिद्धेः। वस्तुतस्तु निरुक्तप्रेषणाद्धातोः आसने ऽर्थे णिजिति विवक्षायां
तु न दोष इत्यवधेयं। स्यदो जवे। स्यदिकिं स्यन्दने। भौ। आ। स्यंदनं। स्यदो जवः। अन्यत्र
स्यंदः। अवोदैधौद्मप्रश्रथहिमश्रथाः। उंदी क्लेदने। रौ। प। अवपूर्वः। घञि नलोपो निपात्यते। अवोदनं। अवोदः। ञि
इंधी दीप्तौ। रौ। आ। इंधेर्घञि नलोपो गुणश्च निपात्यते। न धातुलोप इति निषेधादप्राप्तेगु
णस्य निपातनमिति ज्ञेयं। इंधनं। एधः। उदनं। ओद्मः। उंदेरौणादिके मन्प्रत्यये नलो
पो गुणश्चापि निपात्यते। श्रथि शैथिल्ये। भौ। आ। प्रपूर्वस्य हिमपूर्वस्य च घञि नलोपो वृ
द्ध्यभावश्च निपात्यते। प्रश्रंथनं। प्रश्रथः। हिमस्य श्रंथनं। हिमश्रथः। कर्तृकर्मणोः कृति।
संयोगे कर्तरि च कर्मणि षष्ठी स्यात् इति हिमस्येत्यत्र कर्मणि षष्ठी। अकर्तरि च। घञि च।
रंज रागे। भौ। उ। रजनं। रागः। रज्यत्यनेन रागः। प्रास्यते। क्षिप्यते प्रासः। अस्मुदो प्रणे दीप। आयुध विशेषः। २
प्रपूर्वादस्मात्कर्मणि प्रत्ययः। संज्ञायामिति प्रायिकं। तुलनषप्रासौ। भौ। आ। लभ्यते। ४५४
लाभः। कर्मणि घञ्। असंज्ञायां परिमाणाख्यायां। परिमाणं परिच्छित्तिः। आख्यानं आख्या

अनुबाध विवक्षया संबंधेन उक्ता संख्या विवक्षिताविवक्षया एकत्वादि उक्तापार्थं प्रमाहि पाक्वारणिप्रमार्जये दित्यर्थः। बहुत्व
पाचमित्यत्र एकत्वे गृहीत्वा विधेयसंबंधेन उक्ता संख्या अविवक्षिता या उक्ता सैव विवक्षया एकत्वादि उक्तानि भवति।
उक्तिः। परिच्छिन्ने क्रौसत्यामित्यर्थः। कस्य पुनः परिच्छित्तिरिति चेत् प्रत्ययार्थस्येत्युच्यते। आ पक्षुनायागः
ख्याग्रहणं रूढिनिरासार्थं। तेन परिमाणग्रहणेन संख्याग्रहणे। संख्यावाचकशब्देन प्रत्यया कर्तव्यः एक
र्थस्य परिच्छिन्ने क्रौसत्यां घञित्यर्थः। सर्वेभ्यः किं। अन्येष्वापुरस्तादपवादा अनंतरान्वि पक्षुनायागः
धीन्बाधंते नोत्तरान् इति न्यायेन अज्यमेव घञ्बाधेत न तु अपं। एकस्तंडुलनिचाय इ कार्य इत्यर्थः। ४
ति। निचीयते राशीक्रियते निचायः। तंडुलानां निचायः। तंडुलनिचायः। अत्र राश्येकत्वेन स
मुदायिनां परिच्छित्तिर्गम्यते। एरच् इति अचि प्राप्ते घञ्। द्वौ शूर्पनिष्पावौ। निष्पूयते शोध्य
ते तुषाद्यपनयनेन यस्तंडुलादिः स निष्पावः। शूर्पेण निष्पावः। शूर्पनिष्पावः। शूर्पनिष्पाव
श्च शूर्पनिष्पावश्च शूर्पनिष्पावौ। ऋदोरप् इत्यपि प्राप्ते घञ्। शूर्पेणेति करणे तृतीया। तस्याः कर्तृ
करणे कृता बहुलं। कर्तरि करणे च तृतीया कृदंतेन बहुलं प्राग्वत्। इति समासः। अत्र शूर्प
संख्यया तंडुलादेरपि परिच्छित्तिः। शूर्पद्वित्वं तु आर्थिकं न तु शाब्दं। निष्पावगतद्वित्वं तु शाब्दं।

कौ०वृत्ति २
टीका

यद्यप्यत्र निरभ्योः पूल्वोरिति घञ् लभ्यते तथापि सर्वग्रहणबलादनेन भवितुमर्हतीति भावः।
अप्प्रत्ययस्य मुख्योदाहरणमाह। क्षौकाराविति। कॄ विक्षेपे। नौ कीर्यन्ते विक्षिप्यन्ते कारः।
कारश्च कारश्च कारौ। कर्मणि घञ्। अपादिना विक्षिप्तो धान्यादिराशिः कारः। इह प्रत्यया
श्रय एवापवादो न त्वर्थाश्रयः। सर्वेभ्य इति पञ्चमीनिर्देशेन तथैवावगमात्। तेनायं प्रत्य
त्याश्रयो घञ् क्तिनोऽपवादो न भवति। एकान्तिकोच्छ्रितिः। उत्सर्गकान्तश्रयतेः कर्मणि भावे १०६
वा क्तिन्। ऊर्ध्वी सन्तो राशीसन्त इत्यर्थः। दारजारौ। एतौ निपात्येते। अकर्तरि कारक इत्य
धिकारात् ऋदोरबित्यस्यापवादत्वाद् अकर्तरीत्यर्थमिदं वचनं। निपातनमेवाह। णि
लुक् चेति। स्यात् घञ्। लोपे हि सति घञाश्रयवृद्धिर्न स्यात् णिलोपस्य स्थानिवद्भावेन व्यव
धानात्। न च णिच्निमित्तैव वृद्धिरस्तु इति वाच्यं। जारशब्दे मितां ह्रस्व इति ह्रस्वापत्तेः। ज ४५५
नीज्वृषीति ज्वृधातोर्मित्त्वात्। लुकि तु सति तस्य परनिमित्तत्वाभावेन स्थानिवत्त्वाभावा
त् जार इति रूपं सिध्यतीति भावः। दृ विदारणे। कै। विरहे सति दारयन्ति सुखं ते दाराः।

ऋष्वयोऽग्नौ देवाज्जरयन्ति भर्तुः स्नेहं जाराः। अपादाने इति। पुरस्तादपवादन्याये
न इङश्चेत्यस्य अच एवापवादत्वात् स्त्रियां तु क्तिन् स्यादिति न बाधनायायमारम्भः।
उपेत्याधीतेऽस्याः उपाध्याया। उपाध्यायी। या तु स्वयमेवाध्यापिका तत्र वा ङीष्
वाच्यः इति वा ङीष्। या स्वयमध्यापिका तस्या इदं रूपद्वयं पुंयोगे ङीषेव। आतुगा
गमश्चापादिक इत्युक्तं। शॄ वायु। एषु शृणातेर्घञ्। शॄ हिंसायां। कै। शृणाति। योगद्वारा
पाचं छिनत्ति अनेन। शारो वायुः। शृणाति चित्रीकरोत्यनेन। शारो वर्णः। निशृणाति
नाशयति शीतमनेन। नीशारः प्रावरणं। उपसर्गस्य घञीति दीर्घः। रव इति॥
ऋदोरबित्यप्। अभिनिसः स्तनः शब्दे। नौ प। अभिनिस्तन्यते उच्चार्यते। अभिनिःष्टानो
वर्णः। अकर्तरि च कारके संज्ञायामिति कर्मणि घञ्। समियु। सम्युपपदे युद्रुदुभ्यो घञ्
ऋदोरबि त्यस्यापवादः।२ स्यात् भावे अकर्तरि च कारके। यु मिश्रणे अमिश्रणे च। आप। द्रु दु गतौ। नौप। संद्रूयते
प्राप्यते संद्रावः। संदूयते प्राप्यते संदावः। श्रिणी। एभ्यो भावादौ घञ् स्यादनुपसर्गे। श्रि

[illegible]

कौं०वृत्ति २
टीका

सेवायां। णौ। णीञ् प्रापणे। णौ। ष्णा स्नायां। प्रश्रय इति। एरच्। प्रभव इति। ऋदोरप्। प्रादि
समास इति। प्रादयो गताद्यर्थे प्रथमया। गताद्यर्थे प्रादयः प्रथमांतेन समस्यंते स तत्पुरुषः।
बाहुलकादिति। कृत्यल्युटो बहुलमित्यत्र बहुलग्रहणात्। यौतु। टु क्षु शब्दे। आप। रु प्रवणे।
णौ। प। द्रव इति। ऋदोरप्। अवोदः। अवनयनं। अवनायः। उन्नयनं। उन्नायः। प्रेद्रु। द्रु गतौ।
णौ। ष्टुञ् स्तुतौ। आ। उ। स्रु गतौ। णौ। प। स्रव इति। ऋदोरप्। निरभ्योः। पूञ् पवने। क्रै। लूञ् छेद १०७
ने। क्रै। उन्न्योः ग्रः। गॄ निगरणे। णौ। प। उद्गिरणं। उद्गारः। दुवमउद्गिरणे इति निपातनात् ऋका
रस्य इत्वं। निगरणं। निगारः। गर इति। ऋदोरप्। कृ धान्ये। कृ विक्षेपे। णौ। प। भिक्षोत्कर
इति। भिक्षाया उत्करणं। भिक्षोत्करः। ऋदोरप्। यज्ञे समि स्तुवः। समि उपपदे स्तौतेर्भावादौ घ यज्ञविषय कात्र २
ञ् स्यात् [illegible]। संस्ताव इति। संस्तवनं परिचयकरणं। संस्तवः। ऋदोरप्।
प्रे स्त्रः। स्तृञ् आच्छादने। क्रै। बर्हिषः प्रस्तर इति। प्रस्तरणं प्रस्तरः। ऋदोरप्। प्रथने वावशब्दे। ४५

णावादौ २

२घञंताः पुंसि।

परस्य विस्तार इति। विस्तारस्तिर्यगायतिः। छंदोनाम्नि च। शब्दविषयत्वात् पूर्वेणाप्राप्ते विस्तरणं।
विष्टारपंक्तिः। विष्टारपंक्तिश्छंदः। उदि ग्रहः। घञ् स्यात्। उद्ग्राह इति। ग्रहवृदृनिश्चिगमश्चेति
प्राप्तस्य अपोऽपवादः। समि मुष्टौ। संगृह्णात्यस्मिन् संग्राहः मुष्टिः। परिन्योः। अक्षा
दिभिः क्रीडनं द्यूतं। यथाप्रकरणमभ्रेषः। शारान् शारिका इत्यर्थः। परिणयनं। परिणायो
विवाहः। न्ययनं। न्यायो नाशः। एरच्। परावनुपात्यय इणः। क्रमप्राप्तस्य अनतिपातः।
अनुल्लंघनं। अनुपात्ययः। तस्मिन्वाच्ये परावुपपदात् इणो घञ् स्यात् भावादौ। तव पर्ययनं।
तव पर्यायः। त्वत्कर्तृकं क्रमप्राप्तस्य अनुल्लंघनमित्यर्थः। कर्तृकर्मणोः कृतीति कर्तरि
षष्ठी। कालस्य पर्यय इति। कालस्य पर्ययः। क्रमप्राप्तस्य तदुल्लंघनमित्यर्थः। व्युपयोः।
ननु पूर्वसूत्रेण अनुपात्यये पर्यायशब्दो व्युत्पादितः। एवं चेह पर्यायग्रहणं व्यर्थं। अनुपा
त्यय इत्यस्यानुवृत्तिसंभवादिति चेन्न। आहुः। पर्यायग्रहणं पुनर्विधानार्थं तेन न
अभिविधिविवक्षायां परमपि इनुणं बाधित्वा अयमेव घञ् भवतीति। तव विशयनं।

विशायः। त्वत्कर्तृकं क्रमप्राप्तस्य समंतादनुध्यंयनमित्यर्थः। राज्ञः उपशयनं राजो
पशायः। राजकर्तृकं क्रमप्राप्तस्य समंतादनुध्येयानमित्यर्थः। विशाय इति। विशयनं।
विशायः। संशयः। एरच्। उपशाय इति। उपशयनं उपशयः। समीपशयनं। एरच्॥
हस्तादाने। चिनोतेर्भवा दीर्घश्च स्यात् अस्तेये सति आदेयस्य सामीप्येन गम्यमाने पुष्पाणां
प्रचयनं पुष्पप्रचायः। निकटवर्तिपुष्पाणां अस्तेयेन प्रचयनमित्यर्थः। निवासचितिशरीर। १०८
निवासादिषु गम्यमानेषु चिनोतेर्भवा दीर्घश्च स्यात् आदेश्च ककारः। निवासे। निचियतेऽ
स्मिन् निकायः। वसतिस्थानं गृहादि। काश्याः निकायः काशीनिकायः। अधिकरणे घञ्।
प्रत्ययार्थेनाधिकरणेन वसनार्थो लक्ष्यते। चितौ। आकायमिति। आचीयतेऽस्मिन्निष्टका
इत्याकायस्तं। आकायं। अग्निं अग्निस्थलविशेषं चिन्वीत चयनेन निष्पादयेदिति कृत्यर्थः। ५७
अधिकरणे घञ्। समूहे। गोमयस्य निचयनं राशीकरणं गोमयनिकायः। भावे घञ्॥
चयइति। चयनं चहणं चयः। एरच्। निकेचाय इति। निचेयनं निकेचायः। संघेच।

चिनोतेर्भवा दीर्घश्च स्यात् अनौत्तराधर्ये सति प्राणिसमूहे गम्यमाने उत्तरे च अधरे च
उत्तराधरास्तेषां भावः। औत्तराधर्यं न औत्तराधर्यं अनौत्तराधर्यं तस्मिन् भिक्षूणां नि
चयनं भिक्षुनिकायः। सूकरनिचय इति। सूकराणां निचयनं सूकरनिचयः। तत्र पा
नार्थ्ययदोत्तराधरभावेन सूकराः शेरते न ददं प्रत्युदाहरणं। यदा तु भिक्षुवत् पृथक् पृ
थगेवावतिष्ठंते न देशापि भवत्येव घञ्। कर्मव्यतिहारे। कर्मव्यतिहारः क्रियाव्यतिहारः
परस्परकरणमिति यावत् तत्र वर्तमानाद्धातोः स्त्रीलिंगे भावे णच् स्यात्। कर्तृवर्जिते
कारकेन भाति अनभिधानादित्याहुः। णचः स्त्रियामञ्। णजंतात् स्त्रियामञ् स्यात् स च
तद्धितः। ऐच्चेति। न य्वाभ्यामिति प्राप्तस्य ऐचो निषेधेन तद्धितेष्वचामादेरित्यादिवृद्धिरेव।
णचस्तद्धितत्वाभावेऽपि अञस्तद्धितत्वादिति भावः। धातोर्विहितत्वात् णचः कृत्वं। तद्
ग्रहणेन गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया सोपसर्गस्य धातोर्णजंतत्वात् ततोऽपि
तत्प्रयुक्तादिवृद्धिरुपसर्गस्येत्याशयेनोदाहरति। व्यावक्रोशीति। परस्परं व्यवक्रोशनं

थावक्रोशी। अनंतत्वात् टिड्ढेति ङीप्। परस्परं व्यवहसनं व्यावहासी। अभिविधौ। अभि-
विधौ वाच्ये धातोर्भावे इनुण् स्यात्। अणिनुणः। इनुणंतात् अण् स्यात्। तस्य च तद्धितः॥
नस्तद्धिते। नांतस्य भस्य टेर्लोपः स्यात् तद्धिते परे। इति प्राप्ते। इनण्यनपत्ये। इन्नंतमणि
परतः अनपत्येऽर्थे प्रकृत्या भवति। सं समंतात् रवणं सांराविणं। सांराविणमिति। १०८
समंतात् शब्द इत्यर्थः। संशब्दोऽभिविधिद्योतकः। पूर्ववत्सगतिकादण्। अणस्तद्धित-
त्वादादिवृद्धिः। स्वभावतश्चेदमणिनुणंतं नपुंसकं। आक्रोशे। ग्रहवृदृ इत्यपि प्राप्ते य-
मारंभः। अवग्रहः पदस्येति। पदस्य छेदः विशेष इत्यर्थः। निग्रहो निरोधः। प्रेलिप्सायां। प्रे उप-
पदे ग्रहेर्भावादौ घञ् स्याल्लिप्सायां गम्यमानायां। प्रग्रहणं प्रग्राहः। परौ यज्ञे। परावुपपदे ग्रहे-
र्भावादौ घञ् यज्ञे गम्यमाने। परिग्रहणं परिग्राहः स्वीकरणं। उत्तरस्मिन् परिग्राहः। उत्तरपरि-
ग्राहः। स्फ्येन पात्रविशेषेण वेदेः उत्तरभागे स्वीकरणं। नौ वृ धान्ये। नावुपपदे वृञो भावादौ ८५८
घञ् धान्ये वाच्ये। निव्रियते नीवाराः। उपसर्गस्य घञीति दीर्घः। निवरा कन्येति। ग्रहवृदृ इत्या-

दिनाकर्मण्यप्। ननु स्त्रीत्वविशिष्टे कर्मणि परत्वात् क्तिन्न्याय्यो। अजब्भ्यां स्त्रीखलनाः
स्त्रियाः खलनौ पूर्वविप्रतिषेधेन स्तः क्तेः। अत आह। क्तिन्विषयेपीति। प्रवरेति। प्रवि-
यते प्रवरा। उदि श्रयति। श्रि सेवायां। भौ। यु मिश्रणादौ। आ प। पूञ् पवने। कै। द्रु गतौ। भौ। घ।
विभाषाङि। आङि उपपदे रुप्लुवोर्भावादौ वा घञ् स्यात्। पक्षे ऋदोरबित्यप्। अवे ग्रहः।
अवे उपपदे ग्रहे घञ् वा वर्षप्रतिबंधे वाच्ये। अवग्रहणं। अवग्राहः। अवग्रहः। प्रे वणिजां।
तुलाप्रग्राहेणेति। प्रगृह्यते प्रग्राहः सूत्रं तुलायाः प्रग्राहः तुलाप्रग्राहः। रश्मौ च। रथा-
दियुक्तानामश्वादीनां संयमनार्था रज्जुः रश्मिः तस्यामभिधेयायां प्रे उपपदे ग्रहेर्घञ् वा
भावादौ। प्रगृह्यते प्रग्राहः प्रग्रहो वा। वृणोतेः। आच्छादने वाच्ये। प्रव्रियतेऽनेन प्रावारः प्रवरो वा।
परौ भुवः। तिरस्कारे वाच्ये। परिभवनं परिभावः परिभवो वा तिरस्कार इत्यर्थः। एरच्। इवर्णां-
तादच् स्याद्भावादौ। चयनं चयः। जयनं जयः। भयादीनामिति। क्रादिनियमार्थमिति। परत्वा-
द्धि क्तिल्युटौ प्राप्तौ तथाप्यपूर्वविप्रतिषेधोयं फलितः। एवं च वासरूपन्यायोऽत्र न प्रवर्तते

कौ० रत्नि २
टीका

अनपवादत्यादि तिभावः। नीयते नयः। वृष्यते वर्षः। भावे ऽपू। वृषमो वर्षणादि ति भाष्यप्रयो
गाद्वृषेरस्त्यस्युडपि। वर्षणं। स्तरो ऽनप्र। ॠकारांतात् दुवर्णांतात्र भावादौ घप्। स्तृविक्षेपे। तौ।
गृ निगरणे। तौ। शृहिंसायां। क्रै। युमिश्रणादौ। आदादिः। लूञ् छेदने। क्रौ। पूञ् पवने। क्रौ। स्तृञ्
वृञ् आच्छादने क्रौ ४
गृ निगरणे। तौ। शृहिंसायां। क्रौ। युमिश्रणादौ। आदादिः। लूञ् छेदने। क्रौ। पूञ् पवने। क्रौ। स्तृञ्
शसनयोः। अनयोर्वाच्ययोर्विपूर्वस्य स्त्रः षत्वं निपात्यते। विस्तीर्यते ऽनेन सेकादिना। वि
ष्टरो वृक्षः। विस्तीर्यते विष्टर आसनं। वाक्यस्य विस्तर इति। विस्तरणं विस्तरः। ग्रहवृदृ ११०
श्चिगमश्चेत्यप्। निश्चय इत्यत्र अपः प्राप्तिरन्यत्र घञ् इति विवेकः। दृ हिंसायां। सौ। प्रा
घञ्योरपवाद इति। निश्चय इत्यत्र अपः प्राप्तिरन्यत्र घञ् इति विवेकः। दृ हिंसायां। सौ। प्र
वशिरण्योः। घञ्निपासेवचने। वशकांतौ। आ। प। वशनं वशः। रणशब्दे। भौ। प। रणंति शब्दं कु
र्वंत्यस्मिन् रणः संग्रामः। घञर्थे कविधानं। प्रस्थानं। प्रस्थः। आतो लोप इटि चेत्यालोपः।
विहननं। विघ्नः। गमहनजनेत्युपधालोपे हो हंतेरिति कुत्वं। द्वित्वप्रकरणे के। द्वित्वप्रक
रणे तु आदीनां के परे द्वित्वं वाच्यं। डुकृञ् करणे। तौ। करोतिरयोगमननमनेनन्यक्तं।
क्रीडू आर्द्रीभावे। दै। प। क्लेदनं। चिक्लिदं। क्नसु करणदीप्त्योः। दै। प। क्नसनं चक्नसः॥ ५८

उपसर्गे ऽदः। उपसर्गे उपपदे अदेर प्रत्ययः स्याद् भावादौ। प्राद्यते प्रघसः। व्यद्यते विशेषेणान्द्यते
विघसः। वै अदेव शिष्टमन्नं। घास इति। अद्यते घासः। चतुष्पाद्भक्ष्यं शष्पं बालतृणं घास
इत्यमरः। नौ णच। न्यदनं न्यादः। निघसः। व्यथजपोः। व्यथनं व्यथः। जप्यते जपः। उपजाप ब
इति। उपजप्यते उपजापो मंत्रभेदः। स्वनहसोर्वा। स्वननं। स्वनः स्वानः। हसनं हसः हासः।
प्रस्वननं प्रस्वानः। प्रहसनं प्रहासः। यमः। समादिषूपपदेषु अनुपसर्गे च यमेरप्वा स्याद् भावादौ।
नौ गदनदपठस्वनः। क्वणो वीणायां च। नौ उपपदे ऽनुपसर्गे च क्वणतेरप्वा
स्याद्वीणाविषया च। क्वणतेरप्वा। क्वणशब्दे। भौ। प। निक्वणनं निक्वाणः। निक्वणः। क्वणनं
क्वणः। क्वाणः। वीणायां तु प्रक्वणनं। प्रक्वाणः। प्रक्वणः। निक्वाणो निक्वणः क्वाणः क्वणः
क्वणनमित्यपि वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादय इत्यमरः। नित्यं पणः। नित्यं
पणतेरप्स्यात् परिमाणे गम्यमाने। पण्यते। व्यवहारार्थं परिमितो मुष्टिर्बध्यते पणः।
मूलकानां पणः। मूलकपणः। पाणइति। पण्यते। विक्रीयते पाणः। अकर्तरि च कारके इति घञ्।

कौ॰ह॰ ति॰२
टीका

मदोऽनुपसर्गे। मदो हर्षे। दैपा। मदनं मदः। धनस्य मदः। धनमदः। उन्मदनं उन्मादः। भावे घञ्।
प्रमद। एतौ [redacted] हर्षे ततः। प्रमदनं प्रमदः। संमदनं संमदः। प्रसंभ्यां हर्षे इति तु
नोक्तं। प्रसंमदः। संप्रमद इति। हर्षे माभूदिति। प्रमादः। संमाद इति। प्रमदनं प्रमादः। संमद
नं संमादः। प्रमाद इत्यर्थः। समुदोः। अज गतौ क्षेपणे च। पाः संवीयते गोपालेन [illegible]स
मुदितः क्रियते। समजः पशूनां संघः। उदजनं उदजः पशूनां प्रेरणं। वा यौ। अजेर्वी स्यात् यौ १११
इति पक्षे वी भावाभावः। समाज इति। संवीयते राजादिभिः द्रव्यदानार्थं समुदितः क्रियते।
समाजः। ब्राह्मणानां संघः। उदजनं उदाजः। क्षत्रियाणां प्रेरणं। अक्षेषु ग्लहः। ग्लहस्ते ग्लहः। पा
दस्य ग्लह इति। ग्रहणं ग्रहः। भावे ग्रहवृदृ इत्यादिना अप्। निपातनाभावाद् अत्याभावः। प्रजने
सर्त्तेः। प्रथमगर्भग्रहणे वाच्ये सर्तेरप् स्यात्। उपसरणं प्रथमगर्भग्रहणं उपसरः। प्रथ
मगर्भग्रहणमिति काशिकानुरोधेनोक्तं। प्रथमं द्वितीयं वेत्यनाग्रहः किंतु गर्भग्रहणमित्यन्ये। ४५०
अवसरः प्रसर इति। अवसरत्यत्र प्रसरत्यत्र। अवसरः प्रसरः। ह्वः संप्रसारणं च।

न्यादिषूपपदेषु ह्वयतेरप् स्यात् संप्रसारणं च धातोः। ह्वेञ् स्पर्धायां शब्दे च। भौ। प्रह्वाय इति।
प्रह्वानं प्रह्वायः। आदेच उपदेशेऽशिति इत्याकारे कृते आतो युक् चिण्कृतोरिति युक्। आङि
युद्धे। आङि उपपदे ह्वयतेर्भावादौ अप् स्यात् युद्धे वाच्ये। आह्वाय इति। आहूयंतेऽस्मिन् देवाः
आह्वायः। यज्ञः। अधिकरणे घञ्। निपानं। आहूयंतेऽस्मिन् पशवः। आहावः। हनश्च वधः। अं
तोदात्त इति। स्त्रये वधशब्दोंतोदात्त[illegible]त यात् उ आरिंत इति भावः। हननं वधः। घातः। ह
नस्तोऽचिण्णलोरिति नकारस्य तत्वं। हो हंतेरिति हस्य कुत्वं। मूर्त्तौ घनः। हननं काठिन्यं घ
नः। अभ्रस्य घनः। अभ्रघनः। अभ्रकाठिन्यमित्यर्थः। कथं सैं[illegible]धवघनमानयेति। ध
र्मशब्देन धर्मो लक्ष्यते। काठिन्यविशिष्टं सैंधवमानयेत्यर्थः। अंतर्घनो देशे। देशे वाच्ये अं
तर्घन इति निपात्यते। हनः हिंसागत्योः। अंतर्घ्नंति गच्छंति जनाः अत्र। अंतर्घनः। अधि
करणे अप् घनादेशश्च। अंतर्घणः इति पाठे पूर्वपदात्संज्ञायामिति णत्वं। अगारैकदेशे
प्रघाणः प्रघणः। अलिंदाबहिर्द्वारप्रकोष्ठके इत्यमरः। उद्घनोऽत्याधानं। उद्घन इति निपात्य

कौ०टू त्रि२
टीका

उपरिस्थापनं चेद्गम्यमाने। अपघनः। अपघन इति निपात्यते शरीरावयवश्चेद्वाच्यः। अपहन्य
नेन अपघनः। पाणिः पादो वा। अपघात इति। अपहन्यतेऽनेनापघातः शस्त्रादिः। करणे।
अयःप्रभृतिपूर्वपदेषु हन्तेः करणे घनादेशश्च। विहन्यतेऽनेन विघनः। द्रुहन्यतेऽनेन
द्रुघनः। स्तंबे क च। स्तंबो हन्यतेऽनेन। स्तंबघ्नः। कप्रत्यये गमहनजनेत्युपधालोपे होर्हं
न्तेरिति कुत्वं। स्तंबघनः। अप्रपूर्वे घनादेशः। स्तंबघात इति। स्तंबस्य हननं। स्तंबघातः। ११२
भावे घञ्। पर्यंकः पल्यंक इति। अकि[illegible] लक्षणे। भौ। आ। पर्यंक्यते। चित्रीक्रियते। प
र्यंकः। पल्यंकः। [illegible] अकर्तरि च कारके इति घञ्। उपघ्नः। उपघ्न इति निपात्यते
सामीप्ये गम्यमाने। संघोद्घौ। संघोद्घौ निपात्येते गणप्रशंसयोर्गम्यमानयोः। निघो
निमितं। निघ इति निपात्यते समानं चेद्वाच्यं। समंतान्मितं तुल्यत्वेन मानवत्सत्तं। निमितं। ७१
निघाः। वृक्षाः। समारोहपरिणाहाः। समानदैर्घ्यविस्ताराः इत्यर्थः। ड्वितः क्त्रिः। क्त्रेर्मम्
नित्यं। क्त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेऽर्थे मप् स्यान्नित्यं। ऽस्यत ड्वितः। क्त्रेरेन

४ यद्यपि नङन्ताः सर्वे पुल्लिंगास्तथाप्ययं स्त्रीलिंग एव स्वभावात्।४

न विग्रह इति। लौकिकविग्रहो नेत्यर्थः। अलौकिकस्तु भवत्येव। क्त्रेर्मब्नित्यं ततो क्त्रिप्रत्य
यान्तप्रकृतिकात्तृतीयान्तादित्युक्तेः। उप्त्रिममिति। वापेन निर्वृत्तं उप्त्रिमं। ड्वितः। वेवपनं वेपथुः।
टु। ओश्वि। श्वयनं श्वयथुः। यजयाच। भावे अकर्तरि च कारके चेति च अनुवर्त्तते। इष्यते प्रत्य
४ भौ। आ।४ ययज्ञः। याचनं याञ्चा। यतीप्रयत्ने। यतनं यत्नः। विछगतौ। तौ। प। विछनं विश्नः। छ्वोः शूडनुनासि
४ प्रत्ययस्य कित्यादौ नो लोपः।५ केचेति। सतुकस्य छस्य शः। प्रछनं प्रश्नः। रक्ष पालने। रक्षणं रक्ष्णः। स्वपो नन्। भावादौ स्व
पनं स्वप्नः। उपसर्गे। प्रधीयन्तेऽत्र अराः प्रधिः। नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः। प्रधिः रथ
चक्रधारा। अन्तर्द्धिः। अन्तर्हननं। अन्तर्द्धिः। अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यमित्यंतःश
ब्दस्योपसर्गत्वं। उपाधिः कारणं। स्त्रियां क्तिन्। अजपो क्तिनिति। तयोरवकाशः। चयः। लवः।
क्तिनोऽवकाशः। कृतिः। चिनोति लुनोति भ्यां तु स्त्रियामुभयप्रसंगे परत्वात् क्तिन्नित्यर्थः।
स्फातिकाम इति। क्तौ ना स्फात्वर्थ इति। स्फायी वृद्धौ। भौ। आ। अ स्फायि। स्फीतः। गत्यर्थाकर्म
केति कर्त्तरि क्तः। स्फायः स्फीति स्फ्यादेशः। स्फीतं करोति स्फीतयति। स्फीतयति इति

स्फीतिः। अयइः। अजंतादिः स्यादितिकुणादिसूत्रेणकर्त्तरिइः प्रत्ययः। स्फीतेः कामोयस्य
सः। स्फीतिकामः। अयजीषि। परत्वात्करणाधिकरणयोश्चेतिल्युटिप्राप्तेवचनं। इज्यतेऽनये
तिइष्टिः। वचिस्वपीतिसंप्रसारणं। अश्चन्त्रश्चेतिषत्वं। इषइच्छायां। इष्यतेऽनयेतिइष्टिः। स्तू
यतेऽनयेतिस्तुतिः। स्तुत्यादिभ्यः। नेननत्वमिति। कीर्णिरित्यादौरदाभ्यामितिनत्वं। इति
चेतिदीर्घः। लूनिरित्यादौतुल्वादिभ्यइत्यनेननत्वमितिविवेकः। ह्लादइति। ह्लादोनिष्ठा ११२
यामित्यत्रेत्यर्थः। प्रह्लादनंप्रह्लत्तिः। चरगतौभक्षणेच। ञिफलाविशरणे। चरणं चूर्तिः।
फलनंफुल्तिः। तिच्यान्परफलोरुत्तउत्स्याचादौकिति। इत्युत्वेवोरुपधायादीर्घइकइति
दीर्घः। चायतेः। चायृपूजानिशामनयोः। औउउपचायनंउपचितिः। ऋद्धिः। संपदादि
भ्यः। एभ्यः स्त्रीलिंगेभावादौक्विप्स्यात्। पदगतौ। दै। आ। क्तिन्नपीति। अस्त्रियामिति ४२
प्रतिषेधेनस्त्रियांवासरूपविधेरभावादिदमुक्तं। स्यागापा। अज्ञेपवादइति। ~~आतश्चोप~~
~~सर्गे~~स्यादिभ्यं आतश्चोपसर्गेइति। पच्येस्तषिद्भिदादिभ्यइतिप्राप्तस्यअज्ञेपवादः॥

प्रस्थानंप्रस्थितिः। द्यतिस्यतिमास्थामित्यातइत्वं। उपस्थानंउपस्थितिः। संगानंसंगीतिः। घुमास्थे
त्यादिनाईत्वं। संपानंसंपीतिः। पचनंपक्तिः। ऊतियूति। एतेनिपात्यंते। अवरक्षणादौ। अवनंऊतिः।
उदात्तइतीति। मंत्रेवृषेतिसूत्राद्नुवर्त्ततइत्यर्थः। एवंपक्तिवंतस्याघुदात्तत्वेप्राप्तेऊतियूतीत्या
दयोंऽतोदात्ताइतिपर्यवसन्नोऽर्थः। युमिश्रणादौ। आप। यवनंयूतिः। जुगतौ। सौत्रोधातुः। ज
वनंजूतिः। षोंऽतकर्मणि। दैप। सानंसातिः। इत्याभावइति। द्यतिस्यतीतिप्राप्तस्यइत्वस्याभाव
इत्यर्थः। हन्। हन्यतेऽनयेति। हेतिः। हंतेर्नकारस्यनिपातनादित्वं। हिगतौवृद्धौच। सोप। हिनो
तिजयंप्राप्नोत्यनयाहेतिः। निपातनाद्गुणः। ऋतसंशब्दने। चौ। कीर्त्तनंकीर्त्तिः। ण्यासश्रंथेति
युचिप्राप्तेक्तिन्निपात्यतेउदात्तत्वंच। व्रजयजोः। उदात्तइत्येव। व्रजनंव्रज्या। यजनंइज्या। पित्क
रणंतुत्तरत्रउगर्थं। संज्ञायांसमज। संपूर्वोऽजिःसमुदाये। समज्यासभा। मनज्ञाने। दै। आ। मन्या
विदज्ञाने। व्या।पार गत्पाद्यशिरा। नयाहिकुत्स्तोज्ञायतेइतिभावः। ~~विदज्ञानेमौज~~। षुञ्अभिषवे। सौ। ~~सवनंसुत्या~~।
सूयतेसोमोत्रेति। सुत्या। षञ्अभिषवदिवसः। शैङ्तेऽस्यांशय्या। भरणंभृत्या। वेतनं। संभःशय्या।

कौ०ह०त्रि२
टीका

करणं कृत्या। क्रियेति। यद्वा भावकर्मणोः शस्तदा सार्वधातुके यक् रिङ् शयग्लिङ्क्षु इति रिङादेशः।
अन्यत्र तु यगभावेपि शे परतो रिङादेशः कृते इयङि सति रूपं तुल्यं। इच्छा। इषु इच्छायां। तौ। प।
एषणं इच्छा। इषुगमी ति छः। परिचर्यापरिसर्या। शो यक् च निपात्यते इति। शक्त सर्वत्र निपा
तितः। यक् तु यत्र न प्राप्नस्तत्र। परिचरणं। परिचर्या पूजा। मृग अन्वेषणे। चुरादिः। अदंतः।
आत्मनेपदी। मृगयते। स्यां मृगादीन्। मृगया। अट गतौ। अटनं। अटाट्या। यकार निवृत्तिरिति। ११४
हलादिः शेषस्तु नास्ति शः। द्वित्वे धातुद्वित्वे वाभ्याससंज्ञा स्त्रीकारात्। इट्यत्तु भया भाव
दिति भावः। जागर्तेः। जागरणं। जागरा जागर्या। शे परतः सार्वधातुके यक्। जाग्रोविचिण्णलङित्सु इति
गुणः। अः प्रत्ययात्। चिकीर्षणं। चिकीर्षा। कर्त्तुमिच्छेत्यर्थः। पुत्रकाम्यनं। पुत्रकाम्या। आ
त्मनः पुत्रेच्छेत्यर्थः। सुप आत्मनः क्यच्। काम्यच्च उक्तविषये काम्यच् स्यादिति काम्यच्। ४३
ऊंतात् हकारः प्रत्ययः। गुरोश्च। ईह चेष्टायां। भौ। आ। ईहनं ईहा। ऊह वितर्के। भौ। आ। ऊह
नं ऊहा। भज सेवायां। भजनं भक्तिः। नयत्यात्मानं सुखमनयेति नीतिः। निष्ठायां सेटः।

आप्लृ व्याप्तौ। सौ। प। आपनं आप्तिः। अनिट्कोयं धातुः। दीप दीप्तौ। दै। आ। दीपनं दीप्तिः। इदित्यात्
यादितो निष्ठायामिति सूत्रेण दीपेर्निष्ठायामिट् भावः। णितु वेष्टु। एधु ग्रहादि वर्जितानामिण् न
स्यादिति वाच्ये। निग्रहणं निगृहीतिः। ग्रहिज्येति संप्रसारणं। ग्रहोऽलिटि दीर्घ इति इटो दीर्घः। निप
ठनं निपठितिः। षिद्भिदादिभ्योऽङ्। जॄष् वयोहानौ। दै। प। जीर्यत्यनया जरा। अङि कृते। ऋदृशोऽङि
नां५ गुणः। ऋवर्णांतस्य दृशश्च गुणः स्यादङि। इति गुणः। त्रपणं त्रपा। भेदनं भिदा। भित्तिरन्येति।
भिद्यते भित्तिः कुड्यं। छेदनं छिदा। द्वैधीकरण एवायं। अन्यत्र छित्तिश्छिदं। मार्जनं मृजा। कृपेः।
कृपस्पायांगतौ। भौ। आ। अस्मादङ् स्यात् ऋतोः संप्रसारणं च। कृपते उत्कर्षं प्राप्नोत्यनया कृपा।
चिंति पूजि। चिंति स्मृत्यां। पूज पूजायां। कथ वाक्यप्रबंधे। अदंतः। कुबि छादने। चर्च अध्ययने।
चिंत्यादयश्चर्चांताः सर्वे चुरादयः। ण्यन्तेभ्यो ण्यासश्रंथेति युचि प्राप्ते वचनं। चिंतनं चिंता। पूजनं पूजा।
कथनं कथा। कुंबनं कुंबा। चर्चनं चर्चा। आतश्चोपसर्गे। प्रदानं प्रदा। उपदीयते उपदा उपायनं।
श्रदंतरोः। श्रद्धात्यनया श्रद्धा। अंतर्धानं अंतर्धा। ण्यासः। ण्यंतेभ्यः। अः प्रत्ययादित्यकारे प्राप्ते

आसउपवेशने। आसादिः। श्रंथ विमोचनप्रतिहर्षयोः। क्र्यै। प। आभ्यां गुरोश्च हल इत्यकारे प्राप्ते
वचनं। कारणं कारणा। हारणं हारणा। आस्यतेऽस्यां आसना। श्रंथनं श्रंथना। घट्टिविदिघट्ट
चलने। भौ। आ। विदू लाभे। तौ। उ। वदि अभिवादनस्तुत्योः। भौ। आ। घट्टनं घट्टना। वेदनं वेदना।
ज्ञानार्थस्य तु संवित्तिः। वंदनं वंदना। इषेः अनिच्छार्थस्य युच्। इच्छार्थस्य त्विषेरिच्छा इत्येव। अ
न्वेषणं। अन्वेषणा मार्गणं। परेर्वा पर्येषणं पर्येषणा परीष्टिः परितोऽन्वेषणं। रोगाख्यायां ण्वुल्।
धातोर्बहुलं ण्वुल् स्यात् प्रत्ययांतं चेद्रोगस्य संज्ञा। क्तिन्नादीनामपवादः। छर्द वमने। चौ।
प्रच्छर्दनं प्रच्छर्दिका। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इत्यकारस्य इत्वं। प्रवाहयति मुहुर्मुहुः ११५
प्रवर्त्तयतीति प्रवाहिका ग्रहणी। बहुलग्रहणाद्भावे अकर्त्तरि कारके चेत्यस्यानुवृत्तावपि
कर्त्तरि ण्वुल्। चर्च अध्ययने। चौ। विचर्चयति। अध्ययनं करोत्यनया विचर्चिका। प्रत्य
योपसर्गाभ्यां रोगप्रतीतिः। पाम पामा विचर्चिकेत्यमरः। शिरोऽर्त्तिरिति। शिरःपीडा। अर्दि
हिंसायां। चौ। अर्दनं अर्त्तिः शिरसः अर्त्तिः। शिरोऽर्त्तिः। तितुत्रेति नेट्। धात्वर्थनिर्देशे क्रिया
निर्देशे इत्यर्थः। आसनं आसिका। शयनं शायिका। इक्श्तिपौ धातुनिर्देशे एतौ स्तः।।

रोगनाशकानां त्सवा नी ४

धातोर्निर्देशेऽनुकरणे। बहुलमित्यनुवृत्तेः क्वचिन्न। गुप्तिज्किद्भ्यः सन्। भुवो वुग्लुङ्
लिटोः। पच् अयं धातुः। पचिः पचतिः। उपसर्गात्सुनोतिसुवतिस्यति। ध्यायतेः संप्रसा
रणं चेत्यादि निर्देशात् अकर्त्तर्यपि चेत्यपि सार्वधातुके परे शबादयः। एवं भावकर्मवाचिन्यपि
सार्वधातुके यक्। चित्यक्। विभाषा लीयतेरिति यथा। तत्र हि लीलीजेर्यका निर्देशो न तु श्यने लुक्।
वर्णात्कारः। निर्देशे वर्णात्कारः प्रत्ययः स्यात्। वर्णानुकरणादित्यर्थः। न तु वर्णादुच्चार्यमाणा
दिति। तथा हि सति अकार इत्यादावेव स्यान्न तु ककार इत्यादौ। अत्र हि संघातस्योच्चारणं न तु।
अनुकार्यं त्विह वर्णमात्रं। अकारस्योच्चारणार्थत्वात्। कथं तर्हि सकुच्चाया धर्म्यकारं। एवका
रोऽन्यनिरस्त्यर्थ इत्यादिप्रयोगाः इति चेद्बाहुः। क्वचित् संघातादपि भवति। उच्चैस्तरां
वा वषट्कारः। सर्वेऽप्यकाराः प्रत्याख्याता इति भाष्यप्रयोगाद्बहुलवचनाच्चेति। इकार प्र
त्ययस्य धातोरविहितत्वेऽपि धात्वधिकारस्थत्वात् कृत्संज्ञा। तेन कृदंतत्वात् प्रातिपदिकत्वं।
प्रयोजनाभावाच्च ककारस्य इत्संज्ञा। आर्द्धधातुकत्वाभावादिडागमो न। अस्य चौ इत्यादौ तु

कौ०वृत्ति टीका

कारप्रत्ययाभावो बाहुलकादेव। अं अयं वर्णः। अकारः। कं अयं वर्णः ककारः। रादिफः। वास
रूपविधिना कारोऽपि। रकारादीनि नामानि। शृणु एव नो मम पार्वतीत्यादि प्रयोगः साधुरेव। रं अयं
वर्णः रेफः रकारः। मत्वर्थाच्छः। निर्देशो। मतो रर्थो यस्मिन् सः मत्वर्थः। मत्वर्थः अयं प्रत्ययः
मत्वर्थीयः। अकारलोपइति। अनद्धितपरत्वान्नत्वात् यस्येति लोपस्याप्राप्तिरिति भावः।
न सोमत्वर्थे इत्यत्र बाहुलकात् छो न। शैषिकान्मतुबर्थीयादित्यत्र बाहुलकादेव मतुबर्थशब्दात् छः। १२६
इणजादिभ्यः। धात्वर्थनिर्देशे प्राप्तस्य ण्वुलोऽपवादोयं। एवमग्रेपि। अज् [illegible]ः। आजिः।
अतनं७ बाहुलकादजेर्वीभावो न। [illegible] आतिः। इक्वपादिभ्यः। व[illegible] वापिः। वसनं।
[illegible] वासिः। इक्कृष्यादिभ्यः। कर्षणं कृषिः। गृ। गिरणं गिरिः। संज्ञायां। उद्दालकः श्लेष्मा भावेण्वुल्।
तकस्तस्य पुष्पाणि भज्यंते यस्यां क्रीडायां सा उद्दालकपुष्पभंजिका। भंजनं भंजिका उद्दालक
पुष्पाणां भंजिकेत्यन्ये। विभाषाइश्राकरणं कादिः। ण्वुल्। करणं कारिका। स भः शयेति स्व
त्रेण क्यप् शक्तिषु करणे सत्या क्रियासत्तिः। गणसंख्याने। चुरादावदंतः। अतोलोपस्यस्था

ण्वुल्१ ने अं निमित्ता वृद्धिः। इञ्। गणनं गणिः। ण्वुल्। गणनं गणिका। ण्यासश्रन्थो युच्। गणनं गण
ना। डुपचष्। इञ्। पचनं पाचिः। ण्वुल्। पचनं पाचिका। षिद्भिदादिभ्य इत्यङ्। पचनं पचा। स्या
त्पापच्यो भावे इति क्तिन्। पचनं पक्तिः। क्तिन् इत्यस्य [illegible] भावे अङोऽपवादत्वेपि बाहुलकात्
भावे अङ्। वासरूपविधिस्तु नास्ति अस्त्रियामित्युक्तेः। पर्याय। परिपाटी पंक्तिस्तस्याः क्रमः
अनुक्रमेण कथनं पर्यायः। आसनं आसिका। शयनं शायिका। अग्रगमनं अग्रगामिका। अर्हे।
भक्षणं भक्षिका। इक्षोः भक्षिका इक्षुभक्षिका। आक्रोशे। आक्रोशः शापः। नजीवनं अजीवनिः।
नप्रयाणं अप्रयाणिः। कृत्यच इति णत्वं। नपुंसके। हसः। हसितं हसनं। ल्युट् स्यादिति न
पुंसके भावे इति बोध्यं अत एवाह पूर्वेणेति ल्युट् इत्यनेनेत्यर्थः। कर्तरीति किमिति। कर्तरि इति पदा
भावे येन कर्मणा सह संस्पर्शात् शरीरसुखमुत्पद्यते तस्मिन् कर्मण्युपपदे ल्युट् स्यात् इत्यर्थो
भवति सत्येवं। गुरुस्नापनं सुखमित्येव स्यात् नतु गुरोः स्नापनं सुखमिति। नेह इति। स्नानक
र्तृत्वेपि स्नापनेन गुरुः कर्त्ता किंतु शिष्य इत्यर्थः। शरीरग्रहणं किं। पुत्रस्य परिष्वंजनं सुखं मानसं प्रीतिस्त्व
यामौ प्राजः। प्रवयणं प्राजनं। करणाधिकरणयोश्च। इध्मानिर्दिश्यं तेयेन इध्मप्रव्रश्चनः। कुठारः।

कौ० टि० ३ टीका

गौर्दुह्यते यस्यां गोदोहनी स्थाली। अन्तरदेशे। अन्तर्हन्त्यनेन अन्तर्हणनं। देशे तु अन्तर्घन इति मध्ये गच्छ
त्यनेन। अन्तर्घनो देशः। अयनेया। अन्तः एति अनेनेति अन्तरयणं। देशे णत्वाभावः। विग्रह इति
पूर्वोक्त एव। पुंसि संज्ञायां। पुल्लिंगे संज्ञायां प्रायेण घः स्यात्। प्रायेणेत्युक्तेः पुल्लिंगे संज्ञायाम
न्योपि प्रत्ययः। प्रथमोऽर्थः। पुल्लिंगे प्रायेण संज्ञायां घः स्यात्। तेन असंज्ञायामपि क्वचिद्घः।
द्वितीयोऽर्थः। प्रयोगानुरोधेन अस्य स्त्रीकार्यो। छादेर्घे। आकुर्वन्तीति एत्य कुर्वन्त्यस्मिन्व्य
वहारमित्याकरः। खनिः। विसंछाद्यतेऽनेन विसंछादः। गोचरसंचर। व्रज गतौ। व्रजन्ति दुग्धं ११७
प्राप्नुवन्ति गोपालाः अनेन व्रजः। गोष्ठः। अज गतौ क्षेपणे च। व्यजन्त्यनेन व्यजः। नासदंतो।
आपणन्तेऽस्मिन् आपणः पण्यस्थानं। निकषन्ति सुवर्णमस्मिन्। निकषः। अवे तृस्त्रो
ञ्। अवतरत्यनेन अवतारः। स्तृञ् आच्छादने। कौ। अवस्तृणात्यनेन अवस्तारो जवनिका।
हलश्च। विमृज्यतेऽनेन विमार्गः। मृजेर्वृद्धिरिति सूत्रेण वृद्धिः। चजोरित्यादिना कुत्वं। अध्याय
न्याय। अध्यायोऽध्ययनदिवसः। इण् गतौ। नियन्ति उदयं प्राप्नुवन्त्यनेन न्यायः। युमिश्रणे। उ
द्यावः। अवहाराधार। अवहरत्यनेन। अवहारः। धृञ्। आध्रियतेऽस्मिन् आधारः। अव

सखास्थानेन

करणाधिकरणयोश्च

वेति। अनेन अवायः। गमनसाधनं। उदंकः। हलश्चेत्येव सिद्धे उदकप्रतिषेधार्थमिदं। उदंकोदंचन इति।
पुंसि संज्ञायामिति घे प्राप्ते घञ् विहितः। उदके तु घञि प्रतिषिद्धे घ एव स्यान्न तु ल्युडिति चेन्नैवम्।
प्रतिषेधसामर्थ्यान्न घस्याप्रसक्तेः। नहि घे घञि वा रूपविशेषोऽस्ति। न च स्वरे विशेषः। घे सति
सदुत्तरपदप्रकृतिस्वरेणोदात्तता। घञ्यपि थाथादिस्वरेण तथैव। आनयन इति। आनीयतेऽनेन
आनयनः। खनो घ च। आखनत्यनेन आखनः। आखानः। घित्करणमिति। आखन इत्यादौ
चजोरिति कुत्वस्य प्रसक्त्यभावादिति भावः। भजो ग इति। भज सेवायां। भजत्यनेन भगः।
पदमिति। पद गतौ। पद्यतेऽनेन पदं। ननु पदमित्यत्र घस्य किं प्रयोजनमिति चेदत्राहुः। करणाधि
करणयोः पुंसि संज्ञायामिति यदा घः स्यात्तदा पदमिति नपुंसकं न स्यात्। अनेन येद्रवन्तिथ
स्तदा त्विष्टसिद्धिरिति। खनेर्डडर। आखनत्यनेनेति सर्वत्र विग्रहः। एते इति। आखनादयः
षडित्यर्थः। ईषद्दुःसुषु। इह सामान्योक्त्यापि योग्यताबलाद्विशेषणस्य विषयविभागो लभ्यते।
दुरिति कृच्छ्रार्थो इतरौ त्वकृच्छ्रार्थे इति। कृच्छ्रे। दुष्क्रियते दुःखेन क्रियते दुष्करः। अकृच्छ्रे ईषत्क्रि
यते सुखेन क्रियते ईषत्करः। सुक्रियते सुखेन क्रियते सुकरः। निमिमीमीनातिमिनोति

कौ०वृत्ति२ टीका

दीङो ल्यपि च । एषामात्त्वं स्यात् ल्यपि चकारादशित्येज्निमित्ते । विभाषा लीयतेः । लीलीङोरात्त्वं वा
स्यादेज्विषये ल्यपि च । अप्राप्तं प्राप्ते निषिध्यते । खल् । डुमिञ् प्रक्षेपणे । [redacted] सौ [redacted] ।
[redacted] ईषन्निमीयते । सुखेन प्रक्षिप्यते । सु[redacted] । ईषन्निमयः । दुष्प्रमीयते । दुःखेन [redacted] । मीञ् हिंसायां क्र्यै २
हिंस्यते । दुष्प्रमयः । लीङ् श्लेषणे दै । ली श्लेषणे क्र्यै । सुविलीयते । सुखेन श्लिष्यते । सुविलयः । अप्यू
एरजिति सूत्रेण भावे अकर्तरि कारके च । निमीयते । प्रक्षिप्यते । निमयः । मीयते । हिंस्यते । मयः ।
लीयते । श्लिष्यते । लयः । उपसर्गात्खल्घञोः । मौ उ । खल् । ईषत्प्रलभ्यते । सुखेन लभ्यते । ईषत् ११८
प्रलंभः । दुष्प्रलभ्यते । दुःखेन लभ्यते । दुःप्रलंभः । सुप्रलभ्यते । सुखेन प्राप्यते । सुप्रलंभः । घञ् ।
उपालंभनं । उपालंभः । लभेश्च । नुम् स्यादचि न तु शब्लिटोः इति सूत्रेण उपालंभनमित्यत्र नुम् । उप
सर्गात् किमिति । खल् । ईषल्लभ्यते । सुखेन लभ्यते । ईषल्लंभः । घञ् । [redacted] लभ्यते । लाभः । अक
र्त्तरि च कारके इति कर्मणि घञ् । न सुदुर्भ्यां । खल् । सुलभ्यते । सुलभं । दुर्लभ्यते । दुर्लभं । केवला
भ्यां किमिति । खल् । सुप्रलभ्यते । सुप्रलंभः । अतिदुर्लभ्यते । अतिदुर्लभः । कथं तर्हि अतिसु खल् २
लभ्यते । अतिसुलभं । अतिदुर्लभ्यते । अतिदुर्लभं । यदा स्वती इति सुः पूजायां कर्मप्रवचनीयसंज्ञः

स्यात् । अतिरतिक्रमणे च । पूजायामतिक्रमणे चातिः कर्मप्रवचनीयसंज्ञः स्यात् । इति तयोः कर्मप्रवच
नीयत्वं । सोः पूजार्थत्वे तु सुखार्थत्वाभावात् खल् । कर्मप्रवचनीयसंज्ञायन्न स्यात् । कर्तृकर्मणोश्च ।
चकारः समुच्चयार्थः । यदा कर्तृकर्मणोरीषदादीनां च युगपत्प्रयोगस्तदैव प्रत्ययो यथा स्यात् । कर्तृ
कर्मणी द्वन्द्वसमासे च द्वैतयोर्यथासंख्यं प्राप्तं स्वीकृतं च काशिकाकृता न्यासकारहरदत्तादिभिर्ये ।
प्राप्यापि तथैवोक्तं ध्यात्वा त्वभिध्यानुमोदितं न सर्वैर्नादर्शितं यथासंख्यसूत्रस्य भाष्यविरोधादि
ति ध्वनयन्नाह । यथासंख्यं नेष्यत इति । अन्तर्भावितण्यर्थस्य भवतेः करोतिना कर्मकर्तृविष
यस्य करोतेः भवतिना तुल्यार्थतया [redacted] भवतेः कर्मणि करोतेः कर्मकर्त्तरि चोपपदे खल्प्र
त्ययसिद्धिरेव । भवतेः कर्त्तृदुदाहरति । अनाढ्येन आढ्येन दुःखेन भूयते । दुराढ्यंभवं । अनाढ्यकर्तृके
दुःखेनाढ्यंभवनमित्यर्थः । अनाढ्येनाढ्येन ईषद्भूयते सुखेन भूयते । ईषदाढ्यंभवं । अनाढ्यककर्तृके
सुखेनाढ्यंभवनमित्यर्थः । अनाढ्येनाढ्येन [redacted] सुभूयते सुखेन भूयते । स्वाढ्यंभवं । पूर्वोक्त एवार्थः ।
दुःखेन २ कर्मणि तु । अनाढ्यः आढ्यो भूयते भाव्यते इति । दुराढ्यंभवः । देवदत्तकर्तृकं अनाढ्यकर्मकं दुःखे
न आढ्यंभवनमित्यर्थः । अनाढ्य आढ्य ईषद्भूयते सुखेन भाव्यते । ईषदाढ्यंभवः । अनाढ्य आढ्यः सुभूयते

धातोः अध्यारोपितप्रेषणत्वात् २

कौ० द्वि० त्रि० २
टीका

सुखेन भाव्यते स्वाढ्यंभवः। करोतेः कर्मणि। अनाढ्य आढ्यो दुःखेन क्रियते दुराढ्यंकरः। देवदत्त
कर्तृकं अनाढ्यकर्मकं दुःखेन आढ्यभवनमित्यर्थः। अनाढ्यः आढ्यः सुक्रियते सुखेन क्रियते
स्वाढ्यंकरः। अनाढ्य आढ्य ईषत् क्रियते सुखेन क्रियते ईषदाढ्यंकरः। कर्मकर्तरि तु। अनाढ्येन
धातो० ४ आढ्येन स्वयमेव सुक्रियते। नैरन्तर्यप्रेषणत्वात् सुभूयते। स्वाढ्यंकरं। अनाढ्यकर्मकर्तृकर्तृकं — दुःखेन भूय
सुखेन आढ्यभवनमित्यर्थः। अनाढ्येन आढ्येन स्वयमेव दुःक्रियते। दुराढ्यंकरं। अनाढ्येन — ११९
आढ्येन स्वयमेव ईषत् क्रियते सुभूयते। ईषदाढ्यंकरं। आतो युच्। ईषत्पीयते। ईषत्पानः।
दुःपीयते। दुःपानः। सुपीयते। सुपानः। भाषायां। खलोऽपवादो युच्। दुःखेन शास्यते दुःशासनः। युध
संप्रहारे। दुःखेन युध्यते हिंस्यते दुर्योधनः। अन्तर्भावितण्यर्थोऽत्र युधिः। केवले कर्मणोऽसंभवात् ख
लर्थेन न भाव्यमिति भावः। दुःखेन दृश्यते। धृष्यते। मृष्यते। दुर्दर्शनः। दुर्धर्षणः। दुर्मर्षणः। आवश्यकाध
मर्ण्ययोः। अवश्यं करोति। अवश्यंकारी। अवश्यशब्दः प्रत्ययस्थं आवश्यकार्थं द्योतयति। शतं द — २ण्यन्तश्च
दातीति। शतंदायी। शताधमर्ण्यवानित्यर्थः। सत्याघ्यांसे यते। सेव्यः। ऋहलोर्ण्यत्। दीयते। देयं।
अयो यत्। क्वियक्तौ चा दीर्घानुनासिकलोपौ चेति। अनुनासिकस्य क्विझलोरिति दीर्घस्य अनुदात्तोपदेशे

स्वार्थमिति — नतु विकल्पार्थमेवास्तु। अलंकृत्वा। अलं रोदनेन तिकृ^ कौन्प — हयसिद्धमिमितियेन्त्रे। वासरूपन्यायेन तत्सिद्धे ।४
त्यादिना अनुनासिकलोपस्य प्राप्तिरिति बोध्यं। यम उपरमे। रमु क्रीडायां। मौ। आ। वनु याचने। ता। आ। तनु
विस्तारे। तात्। यच्छतात्। यंतिः। रंसीष्ट। रंतिः। वनिषीष्ट। वंतिः। तनुतात्। तंतिः। सनः क्तिचि षणु — २१८
दाने। ता। उ। देवदत्त इति। देवैः। एषदासीष्ट देवदत्तः। तयोरेव कृत्यक्तखलर्था इति कर्मणि। आशिषि
संज्ञायां क्तः। अलंखल्वोः। अलंदत्त्वेति। अव्ययकृतो भावे इति भावे क्त्वा। अपात्रे न देयमित्य
र्थः। प्रामादग्रंथे। अलंखल्वोः किं। न हृतत्यं भवतेति। प्रतिषेधयोः किमिति। अलंकरणे। अलंकारः।
भावे घञ्। उदीच्यां व्यतीहारः। ~~[struck]~~ क्रियायाः विनिमये वाच्ये अपूर्वकाले वर्तमानात्
माङः क्त्वा वा स्यात्। मेङ् प्रणिदाने। प्रणिदानं विनिमयः प्रत्यर्पणं च। मौ। लतात्वस्यास्य माङ् इति
निर्देशः। अपमित्य याचते इति। कुगतिप्रादय इति सूत्रेण क्त्वान्तेन समासे क्त्वैः समासेऽनञ्पूर्
वे इति वक्ष्यमाणेन सूत्रेण क्त्वो ल्यपि सति मयतेरिदिति इकारान्तादेशे कृते ह्रस्वस्य पिति कृती
ति सूत्रेण तुक्। याचित्वा प्रत्यर्पयतीत्यर्थः। परावरा। परेण पूर्वस्य योगे अवरेण परस्य योगे च
ति सूत्रेण तुक्। ... अप्राप्य नदीं पर्वतः। अतिक्र
नतोनः २ — गम्ये यस्मात् तथा तोः कर्त्रीलौ प्रत्ययौ तस्मात् तथा तोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः। अतिक्र
म्य पर्वतं स्थिता नदी इत्यादिषु अप्राप्य तिक्रमणादेः अवस्थानादेश्च पूर्वपरत्वज्ञानाभावात् समा
नकर्तृकयोः इति सूत्रेण क्त्वाप्राप्तिर्नास्ति अतः परावरयोगे क्त्वाविधानार्थं सूत्रं। अप्राप्येति।

कौ० वृत्ति २
टीका

दक्षिणदेशस्थानां गंगामप्राप्य विंध्यः गंगाप्राप्ति विरह विशिष्टदेशस्थो गंगासमीपवर्त्ती विंध्य इत्यर्थः।
अत्र विंध्यात्प्रागंगेति गम्यते। परेण पूर्वस्य योगस्योदाहरणमिदं। अतिक्रम्येति। दक्षिणदेशस्था
एवर नामेवायमपि प्रयोगः। प्रागुक्तविषये अयमपि प्रयोगः। अत्र हि गंगायाः पूर्वो विंध्य इति प्रती
यते। विशेषणविशेष्य संसर्गास्तु मिह्यं तद् इति सम्यगेव। समानकर्तृकयोः। निर्धारणे षष्ठी सप्तमी
वा। धात्वर्थयोर्मध्ये पूर्वः काले यस्य धात्वर्थस्य तत्र विद्यमानादित्यर्थः। क्त्वा स्यादिति। सत्यभावे।
अव्ययकृतो भावे इति वचनात्। भुक्त्वा व्रजति। भोजनोत्तरकालीनं देवदत्तकर्तृकं वर्त्तमानं १२०
गमनमित्यर्थः। द्वित्वमतंत्रमिति। अविवक्षितमित्यर्थः। तेन बहूनामपि समानकर्तृके भवति।
स्वरत्यादेः सुक इति। स्वरति सूतीत्यादिना विकल्पे प्राप्ते आह। स्वरत्यादेरिति। स्वृ शब्दोपतापयोः। भ्वा। षूङ्
प्राणिगर्भविमोचने। आदादिः। षूङ् प्राणिप्रसवे। दि। धूञ् कंपने। स्वौ। क्लिन्नक्लेदि। स्कंदिर् गतिशोषणयोः। भ्वा।
चा। अनिट्। स्यंदू स्रवणे। भ्वा। आ। मृड सुखने। तौ। प। मृद क्षोदे। क्र्या। प। गुध परिवेष्टने। दि। प। गुध रो
षे। क्र्या। प। कुष निष्कर्षे। क्र्या। प। क्लिश [illegible] उपतापे। दि। आ। क्लिशू विबाधने। क्र्या। प। वद व्यक्तायां वा
चि। भ्वा। प। वस निवासे। भ्वा। प। मृदित्वा। गुधित्वा। कुषित्वा। उदित्वेति। यजादित्वात् संप्रसारणं। उषित्वेति। ४५
वसतिक्षुधोरितीट्। यजादित्वात् संप्रसारणं। शासिवसीति षः। गृहीत्वेति। ग्रह उपादाने। क्र्या। प। रुद विद

मुष ग्रहि स्वपि प्रच्छः संश्च। एभ्यः संश्च क्त्वा च कितौ स्तः। इति कित्त्वे ग्रहिज्येति संप्रसारणे। ग्रहोलिटीति
इटो दीर्घः। नोपधात्। ग्रंथ संदर्भे। क्र्या। प। गुंफ ग्रंथे। तौ। प। नोपधात्किमिति। कुथ पूतीभावे। दि। प। रिफ
कत्थन युद्धादिषु। तौ। प। रलो व्युपधाद्धलादेः संश्च। उश्च इश्च वी ते उपधे यस्य तस्माद्धलादे रलंतात्परौ क्त्वा
सनौ सेटौ वा कितौ स्तः। इति विकल्पोऽत्र न भवति नोपधाग्रहणसामर्थ्यादिति स्थितं। वंचि लुंच्य तश्च।
वंचु गतौ। भ्वा। प। वंचु प्रलंभने। चौ। आ। चौरादिकस्य वंचेरूदित्वात् णिजभावपक्षे वचित्वा। वंचित्वेति
रूपद्वयं बोध्यं। लुंच अपनयने। भ्वा। प। ऋतिः सौत्रो धातुर्घृणार्थकस्तस्यार्द्धधातुकविषये ऋते
रीयङ् इत्यस्य विकल्पितत्वात्तदभावे कित्त्वमनेन विकल्प्यते। [illegible]जायामिति। उदितो वेति वि
कल्पप्राप्तो अयमारंभः। अंचित्वेति। न क्त्वा सेडिति कित्त्वाभावान्न लोपो न। गतौ तु इड्विकल्पात् अं
चित्वा अक्त्वा इति रूपद्वयं। लुंजित्वा लोजित्वेति। तीषसहलुभ ने ति इड्विकल्पे प्राप्ते लुभोऽविमोहने
इत्यनेन अविमोहने नित्यमिट्। रलो व्युपधादिति वा कित्त्वं। जृव्रश्च्योः क्त्वि। इत्यस्मात् श्र्युकः किति इति नि
षेधे प्राप्ते श्रयुकः रूदित्वाद्विकल्पे प्राप्ते वचनमिदं। जरीत्वेति। वृतो वा इति इटो वा दीर्घः। उदितो वा।
शमु उपशमे। दि। प। शमित्वेति। इडभावपक्षे च्छ्वोरित्यूठ्। क्रमश्च क्त्वि। क्रमु पादविक्षेपे। भ्वा। प। पवित्वा पूत्वेति।
श्र्युकः किति इति निषेधे प्राप्ते पूङश्चेति वेट्। जांतनशां। भंजो आमर्दने। रौ। प। रंज रागे। नंष्ट्वेति। मस्जि

नशो जसि। नुमस्यात्। तस्य पदे लोपः। रधादिभ्यश्चेती दृपदे न शित्वा। अंजित्वेति। अंजू व्यक्त्यादिषु।
रो।प। [redacted] रवात्वा रवनित्वेति। रवनु अवदारणे। औ। उदितो वेति वेट्। दित्वेति। द्यतिस्य
तिघुमास्थामिति किति। एषामिकारों तादेशः स्यात्तादौ किति। हित्वेति। दधाते र्हिः। तादौ किति। जग्धेति।
अदो जग्धिर्ल्यप्ति किति। अदो जग्धिः स्याध्यपि तादौ किति च। इकार उच्चारणार्थः। जरो जरीति पा
न्ति को धलोपः। समासेऽनञ्। न अनञ्ञनञ् सदृशम्। अव्ययमिति यावत्। तत्पूर्वे पूर्वपदं यस्य स
मासस्येति व्याख्येयः। व्ययेति। प्रकृत्वेति। प्रशब्दः त्वाप्रत्यार्थगतप्रकर्षस्य द्योतकः। सतु कुग १२१
तिप्रादय इति त्वांतेन नित्यं समस्यते। नित्यसमासत्वादस्लौ किं कोत्र विग्रहः। परमकृत्वेति।
परमं यथा तथा कृत्वा परम कृत्वा। सन्महत्परमोत्तमशः पूज्यमानैः। अनेन सूत्रेण क्रियाविशेष
णीभूतस्य परमशब्दस्य त्वांतेन समासः। अव्ययपूर्वपदत्वाभावात्त्वोल्यपून। पत्वतुकोः
को। सिच्यदिति। क्षिपि सिचि चिक्कश्चेति स्वेरड्। को असिच्यदिति स्थिते एङःपदांतादतीति पूर्वरूप
मेकादेशः। तस्यांतादिवच्चेति परादिवत्वेन सात्पदाद्योरिति निषेधाभावादिणः परत्वेन षत्वं
मा सं एकादेशस्यासिद्धत्वेन सत्यकारेणव्यवधानादिणः परत्वाभावान्न भवति। अधीत्येति ५०
इङ् अध्ययने नित्यमधिपूर्वः। अंतरंगानपीति। अल्पापेक्षमंतरंगे। बह्वपेक्षं बहिरंगं।

विधायेत्नि। दधातेर्हिर्ना। प्रधायेति। दोदद्घोरिदत्तन। प्ररवन्येति। जनरवनेत्यात्वंन। प्रस्थायेति।
द्यतिस्यतीति इत्वेन। प्रक्रम्येति। क्रमस्य त्कीति दीर्घेन। चाप्रपदीयेति। छ कारवकारयोः
छ्वोरिति शूठेन। इड भावस्योदाहरणंतु प्ररवन्यप्रदीयेत्याद्येव। नल्यपि। घुमास्थागापेतीईत्वे
प्राप्ते वचनं। कथं तर्हि निपीयस्येति श्रीहर्षप्रयोग इति चेदत्राहुः। पीङ्पाने दैवादिकस्य ल्यपि
प्रा सेवचनं। कथं तर्हि निपीयस्येति श्रीहर्ष प्रयोग इति चेदत्राहुः। विभाषेति। लीगतौ
न दोष इति। मीनातीति। मीञ् हिंसायां। कै। डुमिञ्प्रक्षेपणे। सौ। दीङ् क्षये। दै। विभाषेति। लीगतौ
क्रे। लीङ् श्लेषणे। दै। उन्नायेति। णेरनिटीति णिलोपः। ल्यपि लघु। लघुरक्षपूर्वो यस्मा सलघुपूर्वो ऽर्था
दृसेव तस्मात्परस्येत्यर्थः। णेरनिटीति लोपो वादः। विगणय्येति। गणसंख्याने न्यौ। अदंतः। णाव भिद८
धोपस्थस्यानिवृ यात्नोपधा वृद्धिः। प्रणमय्येति। अमंतत्वान्मित्वे मितांह्रस्वः। प्रवेभ्येति।
मिदेर्यडंतात् बेभिद्य इत्यस्मात् ल्यप्। लोपे यस्य हल इति यलोपः। विभाषापः। अप्राप्त विभाषेयं।
ल्यपः स्थानिनः किंत्वादयिल्यपीति प्राप्ते संप्रसारणं निषेधयितुमाह। ल्यपियेति। कथमि
तिल्यवादेशस्य स्थानिवत्त्वः त्वाप्रत्ययो दुर्लभः। तद्विधौ पूर्वकालइत्युक्तेः। नन्वेवं तदस्ति। एवं पुस्त
स्वपिति पश्चाद्भुङ्क्ते इत्यादितः। यदेवं इस्सतित देवनेन संभीसयतितत्यात्वाप्रत्ययस्य दुर्लभत्वात्
ल्यपः प्रसक्तिरेव नास्तीति भ्रमः। समाधत्ते। व्यादानेत्यादिना। एतेनेश्वरः सर्वं व्याप्य वर्तते इत्या
ल्यपः प्रसक्तिरेव नास्तीति भ्रमः समाधत्ते।

तिष्ठतीत्यादि व्याख्यातं। श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते इत्यादौ तु समानकर्तृकतानिर्वाहार्थं स्थितस्येत्यादि यथासंभवमध्याहार्यम्। आभीक्ष्ण्ये। पूर्वविषय इति। समानकर्तृकयोः पूर्वकाल इत्यर्थः। पायं पायमिति। आतो युक्। नित्यवीप्सयोः। आभीक्ष्ण्ये वीप्सायां च द्योत्ये सर्वस्य पदस्य द्विर्वचनं स्यात्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु इति द्वित्वं। वा दीर्घ इति। गमेर्ण्यन्तात् णमुलि मितां ह्रस्व इति ह्रस्वे कृते वा दीर्घ इत्यर्थः। नुम्चेति। लभेश्च। लभेर्नुम् स्यादचि न तु शब्लिटोः इति नित्यं नुमि प्राप्ते विभाषा चिण्णमुलोरिति वा नुम्। जागरं जागरमिति। क्त्वाप्रत्यये जागरित्वा जागरित्वा। ण्यन्तात् क्त्वाप्रत्यये जागरयित्वा जागरयित्वा। अनेकाच्त्वात् सेट्कोऽयं धातुः। न यदि। यत्शब्दे उपपदे पूर्वकाले यत्प्राप्तं तन्न। यत्र वाक्ये पूर्वोत्तरे क्रिये वर्तेते तद्वाक्यमपरं नाकाङ्क्षते चेत्। इहेति। नन्वनन्तरस्येति न्यायात् णमुल्मा भूत् क्त्वा तु समानकर्तृकयोरिति सूत्रान्तरेण स्यादिति चेत्। अत्राहुः। पूर्वकाले यत्प्राप्तं तन्नेति व्याख्यानात् क्त्वाप्रत्ययोऽपि न भवतीति। अत्र पदानां समूहो वाक्यं इति पक्षोऽङ्गीकार्यः। तेन यदयं भुङ्क्ते ततः पठतीति एकं वाक्यं अत्र पूर्वोत्तरे क्रिये वर्तेते एतद्वाक्यमपरं वाक्यं नाकाङ्क्षते। अतो न यदीति सूत्रेण निषेधः। यदयं भुक्त्वा व्रजति ततोऽधीते इत्यत्र यदयं भुक्त्वा व्रजतीति एकं वाक्यं। ततोऽधीते इति द्वितीयं वाक्यं। तेन अनाकाङ्क्षे इति पदस्य सूत्रस्थत्वे न यद्यनाकाङ्क्षे इति सूत्रेण निषेधो न। यदयं भुक्त्वा व्रजतीति वाक्येन ततोऽधीते इति वाक्यान्तरं आकाङ्क्षते। ततो

न यदीति निषेधाभावात् भुक्त्वेत्यत्र समानकर्तृकयोरिति सूत्रेण क्त्वाप्रत्ययः। अनाकाङ्क्षे इत्यस्य त्यागे तु यत्शब्देन उपपदे पूर्वकाले यत्प्राप्तं तन्नेत्यर्थलाभात् भुक्त्वेत्यत्र क्त्वा न स्यात्। विभाषाग्रे। अग्रशब्दः कालविशेषवाच्येव गृह्यते। प्रथमशब्दसाहचर्यात्। प्रथमे भुङ्क्ते इत्यादौ काल एव हि प्रतीयते। अग्रे इति सप्तम्यन्तस्यानुकरणं। प्रकृतिवदनुकरणमित्यस्य वैकल्पिकत्वाद्विभक्तेर्लुङ् न ततः। अग्रेभोजं इति। अमैवाव्ययेनेति नियमाद्व्यस्तमेवेदं। न त्वत्रोपपदसमासः। अमाप्यान्येन तुल्यविधानमेतत्। नित्यमेव विधिरिति। अग्रेभुक्तेरित्येवं लडादिर्न प्रयुज्यत इति भावः। कर्मण्याक्रोशे। क्त्वोऽपवादः। स्वादुमीत्यर्थग्रहणं व्याख्यानात्तदाह। स्वाद्वर्थेष्विति। स्वादुमि णमुल्। पूर्वपदस्य स्वाद्वर्थवाचकस्य शब्दस्य मान्तत्वं च निपात्यते। मान्तत्वमिति। ननु स्वादौ इत्येव सूत्रमस्तु मास्तु च णमुल्सम्बन्धमेवानुवर्त्यतां। अरुर्द्विषदिति मुम् विधास्यति। एवं च निपातनं विनापि मान्तत्वं सिध्यतीति महल्लाघवमिति चेन्नैवं। अव्ययं तस्य मुम् नस्यादनव्ययस्येति वचनात्। ततश्च स्वादुंकारमित्यत्र च्वौ चेति दीर्घः स्यात्। संपन्नंकारं इत्यादिषु। अस्य च्वावितीत्वं स्यात्। किं च। स्त्रियां वोतो गुणवचनादिति ङीषि स्वाद्वीकारमिति स्यात्। अतोऽत्र स्वादुमीति रूपं निपात्यते। ततः स्थानजन्तत्वान्नेत्वदीर्घौ न वा ङीष्। निपातनमिह भावप्रत्ययमात्रविषयकं तेन स्वादुंकृत्वेत्यपि सिध्यति। स्वादुंकारमित्यत्र स्वाद्वी अम् इति स्थिते णमुल् इत्यलौकिको विग्रहः। त्सोऽण

मुसिस्वाद्वीअम् इत्यस्य स्थाने स्वादुम् इति निपातनं। सुट्टा उपदेशे ऽनुनासिक इत् ।वेर एकस्या अत्य
यादापृक्तुपः। अमैवाव्ययेन नियमात् स्वादुंकारमिति समस्तं पदं। स्वादुं कृत्वा भुंक्ते इति। अव्ययं ते
यादा पूतु पः। अमैवाव्ययेनेति नियमात् व्यस्तमेवाव्ययं ते स्वादु शद्वे स्वाद्वीश
स्वादुशद्वे उपपदे स्वादुं कृत्वेति सिद्धं। अमैवाव्ययेनेति नियमात् व्यस्तमेवा
रे वाउ यादि श्चि डा यस्या। एते क्रियायोगे गतिसंज्ञाः स्युः इति गतिसंज्ञायां। कुगतिप्रादयः। एते स
मर्थेन नित्यं समस्यंते इति समासे कृते। समासेनञ् पूर्वे क्त्वो ल्यप्। इति ल्यबादेशे स्वादुं कृत्ये ति बोध्यं।
अस्वाद्वी स्वाद्वी कृत्वा भुंक्ते अत्र अस्वाद्वी स्वाद्वी श[illegible] ब्द्व्यंतस्य स्वाद्वीशद्वस्य लक्षणार्थाभि
धायकः। लक्षणाया अस्वाद्वीं स्वाद्वीं इत्यर्थवाचकस्य च्व्यंतस्य स्वाद्वीशद्वस्य भावप्रत्ययो तेन कृ १२३
धातुना योगे स्वादुंकारं भुंक्ते इति जायते इत्यर्थः। अस्वाद्वी स्वाद्वी कृत्वा भुंक्ते इत्यनेन [illegible] उच्यते। तेन
स्वाद्वी इत्यस्य भावप्रत्ययी तेन कृञा योगे नास्ति। सति योगे तु अस्वाद्वी स्वादुं कृत्वा भुंक्ते इत्येवं स्यात्।
स्वाद्वी इत्यस्य भावप्रत्ययी तेन कृञायोगे नास्ति। स तियोगे तु अस्वाद्वी स्वादु कृत्वा भुंक्ते एवमकारो लभ्यते। नतु शिरोऽन्यथाकरणं।
शिरोऽन्यथा कृत्वेति। इह हि करोतेरभावे भुजि क्रियागत एव प्रकारो लभ्यते। ७२
अतः आवश्यकः करोतिरिति भावः। यथातथयोरिति। यथाकारमिति। एहुमनई: सन्यदि एछति
तदेद नुत्तरं। अत्रापि वासरूपन्यायेन पक्षे क्त्वा बोध्यः। कर्मणि दृशिविदोः। कन्यादर्शमिति। अत्र दर्शन
विषयीभूतानां सर्वासां कन्यानां वाक्यार्थेऽन्वयात् साकल्यं बोध्यं। ब्राह्मणवेदमिति। विद ज्ञाने। आप

वरई स्त्रायो। कुरादिरदंतः॥

विद्लृलाभे। तौ। ५। विदविचारणे। तौ। अ। ब्राह्मणं वेदित्वा। वेदित्वा। विस्त्वा। विस्त्वा। ब्राह्मणवेदं।
यावति। यावज्जनतरति। [illegible] असाकल्यमनेन दर्शयति। साकल्ये तु हि कर्मणि दृशिविदो
रित्यनेनैव सिद्धं। यावज्जीवमिति। अकर्मकार्थं तु भियोगे देशः कालो भावो गंतव्यो ऽध्वा च कर्म
संज्ञक इति वाच्यं। इत्यनेन कालवाचकस्य यावज्जीवस्य कर्मत्वं। चर्मोदरयोः। कर्मणीत्येवेति।
एवं च पूरेरिति ण्यंतस्य निर्देशोन तु केवलस्येकानिर्देशः। तस्याकर्मकात्वादिति भावः॥
चर्मपूरयित्वा। चर्मपूरं स्तृणाति। चर्मपूरणविशिष्टमाच्छादनं करोति। उदरं पूरयित्वा। उदरपूरं भुंक्ते।
उदरपूरण विशिष्टं भुजिक्रियेत्यर्थः। ऊर्ध्वे पूर्वकालेइतिन संबध्यते। असंभवात् प्रतीतेश्च।
एवमन्यत्रापि यथा संभवं बोध्यं। वर्षप्रमाणइति। गोष्पदप्रमिति। गोः पदं। गोष्पदं। गोष्पदं पूरयित्वा।
गोष्पदप्रं। गोष्पदं सेविता। सेवित प्रमाणेषु। सुट् तस्य षत्वं च निपात्यते। इत्यनेन प्रमाणे गोष्पदं।
गोष्पदपूरण विशिष्टं [illegible] अतीतं वर्षणं तज्ज्ञानं देवः। यावता वर्षणेन गोष्पदं पूर्णं भवति तत् कै०११
वद्वर्षणं कृतवान्। चेलक्नोपं। चेलानि क्नोपयित्वा चेलक्नोपं। [illegible] यीन्ते देश द्वेया। मौ। आ॥
अस्मा देतुम लिचि। अर्तिह्री व्ली ति पुक्। क्नो पो ण्यो वलि इति य लोपः। पुगंतत्वात् गुणः। चेलक्नो
पन विशिष्ट मतीतं वर्षणं तज्ज्ञानं देवः। यथा वर्षणे नचेलानि शद्यंते तथा वृष्ट इत्यर्थः। अन्ये तु

कौ०टी०२
टीका

यथा वर्षणेन चेलान्यार्द्रीभवंति तथा वृष्ट इति व्याचख्युः। निमूलसमूलयोः। निर्गतं मूलमस्य
निमूलं। सह मूलेन समूलं। कषित्वा। निमूलकाषं कषति समूलकाषं कषति। निमूलसमूल
कषणाभिन्नं कषणमिति शाब्दबोधः। तेनेति। अत्रेदं बोध्यं। सामान्यं विशेष्यं। विशेषस्तु विशेष
णं। आक्रोशे दृष्ट इत्यादौ आक्रोशो विशेषणं दृष्टस्तु विशेष्यमिति सर्वजनानुभवात् न तथात्र नि
मूलकषणादिकं विशेषणं केवलकषणं तु विशेष्यमिति। करणे हनः। पादघातं हंति। पादकरण
कं यद्धननं तदभिन्नं हननं करोति। यथाविधीति। करणे हन इति सूत्राभावे तु हिंसार्थानां च स १२४
मानकर्मकाणामिति सूत्रेण तृतीयांते उपपदे। पादघातं हंति। पादघातं मारयति। इति यथाविध्यनु
प्रयोगाभावोऽपि स्यात्। किंच। तृतीयाप्रभृतीन्यन्यतरस्यामिति सूत्रेण। पक्षे पादेन
घातं इति व्यस्तमपि पदं स्यात्। अत उभयनित्यत्वार्थ आरंभः। स्नेहने। उदपेषमिति। पेषंवासवा ७२
हनधिषु च। एषु उत्तरपदेषु उदकस्य उदादेशः स्यात्। हस्ते। हस्तेन वर्तयित्वा। हस्तवर्तं। हस्त
वर्तनं२ करणकवर्तनाभिन्नं करोति। स्वे पुषः। स्वेन पोषित्वा। स्वपोषं। स्वकरणकपोषणाभिन्नं पोषणं
करोति। अधिकरणे। चक्रे बद्ध्वा चक्रबंधं। चक्राधिकरणकबंधनाभिन्नं बंधनं करोति। संज्ञायां।
अनधिकरणार्थ आरंभः। क्रौंचबंधं बद्धः। क्रौंचं बद्ध्वा। क्रौंचबंधं। देवदत्तकर्तृकं क्रौंचाकारबंध

नाभिन्नं यद्वर्तते तद्बंधनं तदाश्रयीभूतः क्रौंचः। कर्त्रोर्जीवपुरुषयोः। जीवेन नष्टा। जीवनाशं। जीव
कर्तृकनाशाभिन्नो नाशः। किंकर्तृक इत्यपेक्षायामर्थात् जीवकर्तृकः। पुरुषेण ऊढ्वा। पुरुष
वाहं। पुरुषकर्तृकवहनाभिन्नं वहनं। किंकर्तृकमित्यपेक्षायामर्थात्पुरुषकर्तृकमेव। ऊर्ध्वे।
ऊर्ध्वेन शुष्का। ऊर्ध्वशोषं। ऊर्ध्वकर्तृकशोषणाभिन्नं शोषणं। किंकर्तृकमित्यपेक्षायामर्थादूर्ध्व
कर्तृकमेव। ऊर्ध्वेन पूरित्वा। ऊर्ध्वपूरं। ऊर्ध्वकर्तृकपूर्णभवनाभिन्नं पूर्णभवनं। किंकर्तृक
मित्यपेक्षायामर्थादूर्ध्वकर्तृकमेव। उपमाने। घृतमिव निधाय घृतनिधायं। घृतनिधानस
दृशनिधानाभिन्नं मतीतं यन्निधानं तदाश्रयीभूतं जलं। अजकेनैव नष्टः। अजकनाशं।
अजककर्तृकनाशसदृशनाशाभिन्नो यो नाशस्तदाश्रय इत्यर्थः। कषादिषु यथैवेति।
निमूलकाषं कषतीत्यादावुदाहृतमित्यर्थः। उपदंशः। तृतीयांते उपपदे समानकर्तृकयोः पूर्व
काले वर्तमानादुपपूर्वाद्दंशेर्णमुल् स्यात्। तृतीयाप्रभृतीन्यन्यतरस्यां। उपदंशस्तृतीयाया
मित्यादीन्युपपदानि अमंतेन सह वा समस्यंते। मूलकेन उपदंश्य। मूलकेनोपदंशं। मूलकोप
दंशं। मूलकोपदंशमिति। अयमर्थः। मूलकेन भुंक्ते। किं कृत्वा। उपदंश्य। किमुपदंश्य। अर्था
न्मूलकमिति संबध्यते। एतावतैवेति। शाब्दान्वयाभावेऽपि आर्थिकान्वयमात्रेणेत्यर्थः। वचन
सामर्थ्यादिति। यदि हि तृतीयांतेन शाब्दान्वये सत्येव प्रत्ययो भवेत्तर्हि करणे हन इतिवदुप

कौ॰ टि॰ २
टीका

दंशः करणे इत्येव स्यात् । तत्र च क्रियान्तरं प्रतिकरणत्वं मूलकेनेत्यस्येष्टमिति भावः ।
हिंसार्थानां । दण्डेनोपहत्य । दण्डोपघातं । दण्डेनोपघातं । कासयतीति । कस विक्षेपे । णौ प्रेरयती
त्यर्थः । दण्डेन ताडयित्वा । दण्डताडं । दण्डेन ताडं । तड आघाते । णौ सप्तम्यां । पार्श्वयोः पार्श्वाभ्यां वा
उपपीड्य । पार्श्वोपपीडं । व्रजे व्रजेन वा उपरुध्य । व्रजोपरोधं । पाणौ पाणिना वा उपकृष्य । पाण्यु
पकर्षं । कर्षेति शपा निर्देशः । कृष विलेखने इत्यस्य गुणसहितस्योच्चारणात् । तत्फलं तु तुदादे
र्व्युदासः । समासत्तौ । सन्निकर्षः समुदायोपाधिः । केशग्राहमिति । केशेषु ग्रहणं न तु वामात्रं सा
न्निकर्षप्रतिपादनपरमेतत् । प्रमाणे । द्व्यङ्गुलोत्कर्षमिति । द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलम् । १२५
तत्पुरुषस्याङ्गुलेरित्यच् समासान्तः । द्व्यङ्गुलेनोत्कर्षपरिच्छिद्येत्यर्थः । स्वल्पः खण्डः खण्डिका ।
उत्कर्ष इति । उत्कर्षणमुत्कर्षः । परिच्छेदः । अपादाने । शय्याया उत्थाय । शय्योत्थायं । शय्याया उत्थायं ।
एवं नाम त्वरन्ते यदवश्यकर्तव्यमपि किं प्रक्षालनादि नापेक्षन्ते । द्वितीयायां च । यष्टिं लोष्टं गृही
त्वा । यष्टिग्राहं । यष्टिंग्राहं । लोष्टग्राहं । लोष्टंग्राहं । एवं च युद्धाय त्वरन्ते यदासन्नं यष्ट्यादिक ७४
मपि गृहीत्वा धावन्ति । नायुधं प्रतीक्षन्ते इति भावः । परिक्लिश्यमानेत्यत्र । उरः प्रतिपिष्य । उरः प्र
तिपेषं । उरोविदारं प्रतिचस्करे इति । उरो विदार्य । उरोविदारं । दृ विदारणे । णौ । हिंसायां प्रतेश्च ।

उपात्प्रतेश्च किरतेः । सुट् स्यात् हिंसायामिति हिंसार्थे सुट् । विक्षिपति । व्याप्यमाने । गेहं गेहमनुप्रविश्य ।
गेहानुप्रवेशमास्ते । गेहं गेहमनुप्रवेशमास्ते । वीप्सायां नित्यवीप्सयोरिति गेहमित्यस्य पदस्य
द्विर्वचनं । आसेव्यमाने । पौनःपुन्ये इत्यर्थः । गेहमनुप्रविश्य अनुप्रविश्य । गेहानुप्रवेशमास्ते ।
गेहमनुप्रवेशं अनुप्रवेशमास्ते । ~~आभीक्ष्ण्ये~~ नित्यवीप्सयोः । आभीक्ष्ण्ये वीप्सायां च द्योत्ये
सर्वस्य पदस्य द्विर्वचनं स्यात् । आभीक्ष्ण्ये तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च इत्यनेन आभी
क्ष्ण्ये अनुप्रवेशमित्यव्ययसंज्ञकृदन्तस्य पदस्य द्वित्वं । एवमग्रेऽपि । गेहानुप्रपातं । पतति
रत्र प्राप्त्यर्थकः । पद गतौ । दैप् । आस्कन्दिर् गतिशोषणयोः । णौ । प्र । अस्यतितृषोः । द्वयोरह्नोः स
माहारः । द्व्यहः । राजाहःसखिभ्यष्टच् इति समासान्तष्टच् । अह्नष्टखोरेवेति टिलोपः । रात्राह्नाहाः पुंसीति
पुंस्त्वं । द्व्यहमत्यस्य द्व्यहात्यासं । द्व्यहमत्यासं । द्व्यहं तर्षित्वा । द्व्यहतर्षं । द्व्यहंतर्षं । नाम्नि । द्वितीयां
ते नाम शब्दे उपपदे आङ्पूर्वात् दिशेः ग्रहेश्च णमुल् स्यात् । नाम आदिश्य । नामादेशं आचष्टे । नामा
र्थं वक्तीत्यर्थः । नाम गृहीत्वा नामग्राहं । अव्यये । अव्यये उपपदे कृञः क्त्वाणमुलौ स्तः । अ
यथाभिप्रेतं रव्याने । स्वाङ्गे तस्प्रत्यये । न तस्प्रत्ययाय स्यात् तस्प्रत्ययस्तस्मिन् स्वाङ्गे उपपदे ।
आद्यादित्वात् सप्तम्यर्थे तसिः । नाधार्था । नार्थौ । विनञ्भ्यां नानाञौ नसह । अस्तहार्थे ट्यग्नावे

कौ०उत्तरि २

८.का वर्त्तमानाभ्यामाभ्यां स्वार्थे प्रत्ययौ । इति विहितौ नानाञौ धार्थाः । द्वित्र्योश्च धमुञ् । इति धमु
ञादयः । संख्याया विधार्थे धा । क्रियाप्रकारे वर्त्तमानात् संख्याशब्दात् स्वार्थे धा स्यात् । इति
धाप्रत्ययो धार्थको भवतीत्याशयेनोदाहरति । एकधा भूयेत्यादि । एवं द्वैधं त्रैधं द्वैधंकारं ।
द्वैधं भूय । द्वैधं भावमित्युदाहर्त्तव्यं । यद्यपि धमुञादि विधौ धइत्यनुवर्त्तते तेषामादेशत्वा
श्रयणात् तस्यानिवद्भावे नापि सिद्धम् । तथापि धमुञन्तात् स्वार्थे डदर्शनमिति डप्रत्ययान्तस्य
संग्रहार्थमर्थग्रहणं । तत्फलं तु द्वैधीकृत्येत्यादि प्रयोगः । द्विरुक्तकृत्वेति । द्विरुक्तवर्जने । १२१
भूद्धीमि । रुओ निरस्यर्थग्रहणे । अन्वर्थेन न्विह अयइत्यकारस्य लोपे पावितिपूर्वस्याण
दीर्घे भूयि इति निर्द्देशस्तु चितं इति चेत् । अत्रोच्यते प्रकृतिवदनुकरणमित्यस्य वैकल्पिकत्वाद
न्वचीत्यादिनिर्द्देशेन दोषः । अयतइत्यादि । अन्वकशब्दस्यानुकरणमात्रे विश्रान्ते देशविशेषवा
चित्वे नियमो नेति ध्वनयितुमिदम् । एवं तोभूत्येत्यर्थ इति । इहान्वकर्ष्टे । न चानुकर्षो ऽननुकर्षो वेति ७५
नस्पृश्यते तस्य देशविशेषमात्रे पर्यवसानात् । प्रमाणान्तरेणाकर्षितानुकरणस्य लाभे पिअन्वकट्ट
स्यतत्समर्पणे व्यापाराभावात् न शुद्धम् । किंतु तत्रैव भवतीति व्यवस्था बोध्या । इति श्रीमद्बोजि
दीक्षितविरचितायां सिद्धांतकौमुद्यामुत्तरार्द्धं समाप्तं । श्रीसांबशिवाय सपरिवाराय नमः ।

उकौमुद्योत्तरार्द्धे पत्रसंख्या षड्विंशतिपत्राणि १२६